Bayerische StaatsBibliothek
Münchener DigitalisierungsZentrum Digitale Bibliothek

Tārānātha Tarkavāchaspati

Sabdastomamahānidhih (samskrtābhidhānam)

Bd.: 1

Calcutta 1869

4 A.or. 2808-1
urn:nbn:de:bvb:12-bsb10219731-4

A. or.
2808
-1-

10219731
A.or. 2808 4°
-1

10219731

10219731

308 4°
A. or. 2808 4° 8/6

Tarkavâchaspati

TRÜBNER & C°
60, PATERNOSTER ROW
LONDON

शब्दस्तोममहानिधि

संस्कृताभिधान

प्रथमखण्डम् ।

गवर्णमेण्टसंस्कृतपाठशालायां व्याकरणाध्यापकेन

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण सङ्कलितम्

तेनैव परिशोधितञ्च ।

कलिकातानगरे

१८२५ संवत्सरे नूतनसंस्कृतयन्त्रे मुद्रितम् ।

S'ABDASTOMA MAHA'NIDHI

PART I.

A SANSKRIT DICTIONARY

COMPILED

BY

TA'RA'NA'THA TARKAVA'CHASPATI

Professor of Grammar in the Govt. Sanscrit College of Calcutta.

CALCUTTA:

THE NEW SANSKRIT PRESS.

1869

16A

Printed By Hari mohan Mookerjea 12, Furkeer Chand Mitter's Street.

PUBLIC CALCA
REC
N° CLASS IS.

Bayerische
Staatsbibliothek
MÜNCHEN

Professor Tàrànàtha Tarkavàchaspati, who is so well known to all students of Sanskrit for his profound knowledge of the ancient literature of his country and for his services to philology is at present engaged, under the auspices of the Government of Bengal, in the compilation of a comprehensive Sanskrit Dictionary. But as considerable time will necessarily elapse before his great work is published, I requested him to undertake the compilation of a smaller Dictionary for the use of Colleges and schools in India. He has, accordingly, with his usual energy and untiring literary industry, commenced this useful work, which he will publish in parts. The present number is the first instalment of five parts of which the Dictionary will consist.

Calcutta
The 1st· February, 1869.

Prasannakumàra Sarvàdhikàrì,
Principal of the Sanskrit College
of Calcutta.

साङ्केतिकशब्दसङ्केतज्ञापनम् ।

सङ्केत	सङ्केतबोध्य	सङ्केत	सङ्केतबोध्य	सङ्केत	सङ्केतबोध्य
पु०	पुंलिङ्गः	न०त०	नञ्तत्पुरुषः	स्वादि०	स्वादिगणीयः
स्त्री०	स्त्रीलिङ्गः	कर्म्म०	कर्म्मधारयः	तुदा०	तुदादिगणीयः
न०	नपुंसकलिङ्गः	द्वि०	द्विगुसमासः	रुधा०	रुधादिगणीयः
पु०स्त्री०	अनपुंसकलिङ्गः	अव्ययी०	अव्ययीभावः	तना०	तनादिगणीयः
पु०न०	अस्त्रीलिङ्गः	ब०	बहुव्रीहिः	क्र्यादि०	क्र्यादिगणीयः
न०स्त्री०	अपुंलिङ्गः	३ब०	तृतीयान्तान्यपदार्थबहुव्रीहिः	चुरा०	चुरादिगणीयः
त्रि०	त्रिलिङ्गः	५ब०	पञ्चम्यन्तान्यपदार्थबहुव्रीहिः	अद०	अदन्त
अव्य०	अव्ययम्	६ब०	षष्ठ्यन्तान्यपदार्थबहुव्रीहिः	पर०	परस्मैपदी
स०	समासः	७ब०	सप्तम्यन्तान्यपदार्थबहुव्रीहिः	आत्म०	आत्मनेपदी
त०	तत्पुरुषः	न०ब०	नञ्बहुव्रीहिः	उभ०	उभयपदी
२त०	द्वितीयातत्पुरुषः	प्रादि०ब०	प्रादिभ्यो धातुजबहुव्रीहिः	सक०	सकर्म्मकः
३त०	तृतीयातत्पुरुषः	द्व०	द्वन्द्वसमासः	अक०	अकर्म्मकः
५त०	पञ्चमीतत्पुरुषः	समा०	समासान्तः	द्विक०	द्विकर्म्मकः
६त०	षष्ठीतत्पुरुषः	शक०	शकन्ध्वादित्वात्पररूपम्	द्विव०	द्विवचनान्तः
७त०	सप्तमीतत्पुरुषः	नि०	निपातनात्	ब०व०	बहुवचनान्तः
ग०	गतिसमासः	+	प्रातिपदिकम्	गौरा०	गौरादित्वात्
शाक०	शाकपार्थिवादितत्पुरुषः	-	धातुः	ब्राह्म०	ब्राह्मणादित्वात्
उप०	उपपदसमासः	भ्वा०	भ्वादिगणीयः	पृषो०	पृषोदरादित्वात्
मयू०	मयूरव्यंसकादि	अदा०	अदादिगणीयः	चतुर्व०	चतुर्वर्णादित्वात्
प्रा०	प्रादिसमासः	जुहो०	जुहोत्यादिगणीयः	व्री०	व्रीह्यादित्वात्
उपमि०	उपमितसमासः	दिवा०	दिवादिगणीयः	सार्व्व०	सार्व्वविभक्तिकः

ओं तत्सत् ।

ग्रन्थारम्भः ।

श्रुत्यार्थाधिगमं सर्व्वप्रकृतिप्रत्ययाभिधम् । अलिङ्गं बहुलिङ्गञ्च शब्दब्रह्माहमाश्रये ॥ १ ॥
वाचामधीश्वरीं देवीं भक्त्या नत्वा वितन्यते । तारानाथद्विजेनायं शब्दस्तोममहानिधिः ॥ २ ॥
यो बबन्ध विना सूत्रं शब्दरत्नस्रजं धिया । अशेषशेमुषीदात्रे तस्मै शेषात्मने नमः ॥ ३ ॥
निःशेषं नाशयन्त्वेनः शेषाशेषसुखानि नः । यतः शब्दविशेषाणां रूपार्थाभ्यां प्रकाशनम् ॥ ४ ॥
सूत्रवार्त्तिकभाष्याणां कारकान् मुनिसत्तमान् । पाणिन्यादीन् प्रणम्येह व्युत्पत्तिर्दर्श्यते मया ॥ ५ ॥
निघण्टुकारिणां ग्रन्था-स्तद्व्याख्याकारिणां तथा । मच्चित्ते द्योतयन्तोऽर्थान् प्रकाशन्तां सदा स्मृताः ॥६॥

मुखबन्धः ।

इह खलु पुरुषा यां-काञ्चित् भाषामभ्यसितुमीहमानाः प्रयतन्ते तदर्थज्ञानसाधनं तत्तद्भाषाव्याकरणं कोषञ्चाधिगन्तुम् । तत्र व्याकरणात् प्रायोयौगिकशब्दमात्राणामर्थज्ञानं, कोषात् पुनः रूढ़ानां शब्दानां केषाञ्चित् यौगिकानामपि । कोषो नाम शब्दानामर्थबोधकं शास्त्रम् । तत्र संस्कृतकोषे प्रायेण लिङ्गसहितस्यैवार्थबोधनम् । तच्च यद्यपि संस्कृतभाषयेव विजातीयभाषयापि भवितुमर्हति, तथापि भाषान्तरेण भाषान्तरस्यार्थज्ञापने, सम्पूर्णतात्पर्य्यार्थस्यास्फुरणात् एकविधभाषयाऽर्थस्य ज्ञापने तु भावार्थस्य स्फुटं स्फुरणात्, समानभाषयापि, प्रकृतिप्रत्ययविभागमप्रदर्श्य अखण्डार्थस्य बोधने तदवयवार्थस्याबोधात् खण्डशस्तथा बोधने तु अवयवशब्दार्थस्यापि सुखेन ग्रहाच्च अवयवार्थप्रदर्शनपूर्व्वकम् एकविधभाषयैवार्थबोधनं युक्तम् । किन्तु प्रसिद्धेषु संस्कृताभिधानेषु अमरकोषादिषु केवलम् अखण्डार्थस्यैव प्रतिपादनात् शब्दानां सर्व्वेषामर्थानामप्रतिपादनात् तत्र कीर्त्तितानामपि शब्दानाम् अकारादिक्रममतिक्रम्यैव पाठेनार्थप्रतिपादनात् व्युत्पित्सूनामतीव दुर्गमत्वेन न तेषां समीचीनता । किञ्च तत्रोक्तानामपि शब्दानामवयवार्थज्ञानमसुलभमेव । नानाकोषपठितानां शब्दानामेकत्र सङ्कलनेन पाणिन्यागममनुसृत्य विविधविद्यावता डाक्तरोपाधिना 'उइलिसन्' साहेबेन, वेदादिशास्त्रादिषु विशेषतः शब्दकल्पद्रुमाभिधाने कृतश्रमाभ्यां विद्वद्भ्यां बोधलिङ्गरथाभ्यां च प्रणीतयोः संस्कृताभिधानयोः प्रकृतिप्रत्ययविभागप्रदर्शनपूर्व्वकं सुपरिपाट्या बहुत्वेऽपि तैः स्वस्वभाषयैव संस्कृतशब्दस्यार्थानां बोधनात् संस्कृतभाषयार्थबोधनमन्तरेण संस्कृतशब्दानामर्थजातस्य अवयवार्थग्रहेण विशेषतो न ग्रहः अपरिचिततत्तद्भाषाणान्तु सुतरामेव । अतः संस्कृतभाषाशब्दानामभिधानं संस्कृतभाषयैव व्याख्यानयुतं

प्रकृतिप्रत्ययादिविभागसहितं सुपरिपाटीकमेकमभिधानं व्युत्पित्सूनामवश्यमपेक्षितमिति निश्चित्य तथाविधाभिधानसङ्कलने ममातितरां सङ्कल्पो बभूव। किन्त्वसौ सङ्कल्पस्तत्प्रचारोपयोगिव्ययार्थार्थसार्थविरहेण निरर्थकतया मुकुलित इव संबभूव।

अथ तथाविधाभिधानप्रचारार्थं मुद्राव्यापारोपयोगिधनवाञ्छया एतद्देशाधिपसंस्थापितविद्यासमाजविभाग-प्रधानाध्यक्षं (डिरकटर) इति पदेऽभिषिक्तं (एसे) इत्युपाधिकं श्रीयुक्तम् एड्च् उड्रो इति नामकं साहेवं प्रत्यावेदितम्। मदावेदितेन च विविधविद्यानुरागवता विद्यावृद्धिविषये एकान्तोत्साहिना तेन प्रोत्साहितः वङ्गगवर्णमेण्ट अयुतं मुद्राः एतत्पुस्तकमुद्राव्ययसाहाय्यार्थं दातुमङ्गीचकार।

एवमेतद्देशाधिपतिनाऽङ्गीकृते प्रचारोपयोगिव्ययानुकूल्ये चिरमुकुलितोऽपि स संकल्पः पुनः फलोन्मुखीबभूव। अथ तथाभिधसंस्कृताभिधाननिर्म्माणाय वेदस्मृतिपुराणमीमांसादिदर्शनज्योतिषतन्त्रवैद्यकव्याकरणालङ्कारादीनि शास्त्राणि समालोड्य बहुलाः शब्दाः सङ्कलिताः। किन्तु तदभिधानस्य बहुविस्तीर्णतया तन्मुद्राकार्य्यसम्पादने बहुकालापेक्षेति। सम्भाव्य तस्मादेव संक्षिप्य साहित्यादिग्रन्थेषु प्रयुक्तशब्दानां प्रसिद्धार्थज्ञानानुकूलम् स्वल्पमभिधानमापाततः संस्कृतविद्यामन्दिरविश्वविद्यालयादिच्छात्राणां पाठार्थमपेक्षितमित्युद्भाव्य च संस्कृतपाठशालाप्रधानाध्यक्षेण (प्रिन्सिपल) पदवीसमारूढेन श्रीयुत वावु प्रसन्नकुमार सर्व्वाधिकारिणा महाशयेन, (प्रसिडेनस्) विद्यालयसंस्कृतप्रधानाध्यापकेन आयुष्मता श्रीयुत वावु कृष्णकमलविद्याम्बुधिभट्टाचार्य्येण च प्रोत्साहित इदं व्यरचयम्।

अत्र च शब्दानां स्थूलाक्षरेण प्रथमं स्वरूपप्रदर्शनम् ततः सङ्केतविशेषेण लिङ्गप्रदर्शनं ततोऽवयवार्थप्रदर्शनम् ततः व्याकरणप्रक्रिया; ततोऽर्थविशेषकथनम्, यदर्थविशेषे लिङ्गभेदः प्रकृतिप्रत्ययभेदश्च तेऽत्र परतो दर्शिताः। 'नाम च धातुजमाह निरुक्ते' इत्युक्तेः सर्व्वशब्दानां धातुमूलतया पाणिनीयगणपठितधातूनपि स्थूलाक्षरेण शब्दक्रममध्ये एव निवेश्य तेषाम् धातूनामर्थविशेषः, गणभेदः, पदनियमः, इट्शून्यतादि, सकर्म्मकत्वादि, लटि लुङि च रूपञ्च दर्शितम्। यद्यपि अर्थविशेषोत्कीर्त्तनं संस्कृतभाषयैव सर्व्वत्र कृतं, तथापि यत्र वङ्गभाषयापि अर्थकथने प्रकृतार्थस्य स्फुटं प्रतीतिर्भवेत् तत्र क्वचित् क्वचित् ग्रन्थवहिर्भूततासूचकेन वेष्टनाकाररेखाद्वयेन वेष्टितया वङ्गभाषयाप्यर्थप्रकाशनं कृतम्।

अत्र च यावता प्रयत्नेन अतीव सुगमता भवेत् तथा यत्नः कृतः। साहित्यप्रचलितशब्दप्रसङ्गात् दर्शनज्योतिषादौ प्रसिद्धाः पारिभाषिकशब्दादयोऽपि एकान्ततो नोपेक्षिताः क्वचित् क्वचित् सारतस्तेऽपि सार्थाः उट्टङ्किताः। अतिप्रामाणिकतया पाणिनीयागमानुसार्य्येव प्रत्ययादिसंज्ञादिकमत्राहृतम्।

एतस्यापि सम्पूर्णपुस्तकस्य एकदा प्रचारे तत्क्रयार्थम् एकदैव बहुद्रव्यापेक्षा स्यादिति अल्पवित्तानां कष्टं भवेत् तन्मा भूदित्यनया धिया खण्डशएव प्रचारे प्रयतमानेन मया प्रथममिदं खण्डं प्राचारि।

सम्भावयामि एतत् पुस्तकं प्रायः पञ्चभिः खण्डैः संपूर्णं स्यादिति। प्रयते च तथा, यथा मासाभ्यां मासाभ्यामेकैकं खण्डं प्रचारितं भवेदित्यत्र। एतस्य सङ्कलने शोधने च भूयान् परिश्रमः स्वीकृतस्तथापि अत्र यत्किञ्चिन्मम स्खलनं सुधीभिः समुद्भाव्येत तत्तैः निजगुणेन परिशोधनीयम्। शिवमस्तु ओं तत्सत्

शब्दस्तोममहानिधिः।

चिदात्मने नमः।

अ पु॰ अव्-ड। विष्णौ। अव्य॰ संबोधने, अधिक्षेपे, निषेधे च।
अंश अदन्तचुरा॰ उभ॰ विभाजने। अंशय-ति ते आंशिश-त् त।
अंश पु॰ अंश-घञ्। विभागे, विभाज्ये, अवयवे, एकदेशे, विभाज्याङ्के, राशिस्त्रिंशभागे च।
अंशक पु॰ अंश-ण्वुल्। ज्ञातौ, दायादे, राशित्रिंशभागे, दिने च। विभाजके त्रि॰ स्त्रियाम् अंशिका।
अंशल त्रि॰ अंश+लच्। बलवति। [स्त्रियाम् अंशिनी।
अंशिन् त्रि॰ अंश-णिनि। भागकारके, अवयविनि, ज्ञातौ च।
अंशु पु॰ अंश-उ। किरणे, प्रभायाम्, वेगे, सूत्रादिसूक्ष्मांशे च।
अंशुक क्ली॰ अंशु+क। वस्त्रे, सूक्ष्मवस्त्रे, शुभ्रवस्त्रे, उत्तरीये च।
अंशुधर पु॰ अंशुधारि-अच्-लुक्। सूर्य्ये। वेगधरे त्रि॰ स्त्रियामंशुधरा।
अंशुपति पु॰ अंशु-पति ६त॰। सूर्य्ये। [स्त्रियामंशुमती।
अंशुमत् पु॰ अंशु+मतुप्। सूर्य्ये। वेगवति अंशुमति च त्रि॰
अंशुमत्फला स्त्री॰ अंशुमत् फलं यस्याः। कदलीवृक्षे।
अंशुमती स्त्री॰ अंशु+मतुप्। शालपर्णीवृक्षे शालपाणि इति ख्याते। अंशुविशिष्टायां स्त्रियाञ्च।
अंशुमाला स्त्री॰ अंशु-माला ६त॰। किरणजाले।
अंशुमालिन् पु॰ अंशु-माला+इनि। सूर्य्ये। किरणजालवति त्रि॰ स्त्रियामंशुमालिनी।
अंशुहस्त पु॰ अंशुर्हस्त इव यस्य ब॰। सूर्य्ये।
अंस अदन्तचुरादि॰ उभ॰ विभाजने। अंसय-ति ते। [च पु॰।
अंस क्ली॰ पु॰ अम्-स। स्कन्धे। अंस-घञ्। विभाज्ये, अवयवे
अंसकूट पु॰ अंस-कूट ६त॰। ककुदे, राजन्योऽशांसकूटक्रथन-

पटुरिति प्रबोधचन्द्रोदयः।
अंसल त्रि॰ अंस+लच्। बलवति।
अंह चुरा॰ उभय॰ भासने। अंहय-ति ते आञ्जिह-त्-त।
अंह भ्वादि॰ आत्म॰ गतौ। अंहते। आंहिष्ट।
अंहति स्त्री॰ अंह-अति, न-हन् क्तिन् वर्णविपर्य्ययः इति वा। त्यागे, रोगे च। अंहती च।
अंहस् क्ली॰ अंह-असि। पापे।
अंह्रि पु॰ अंह-क्रि। पदे, वृक्षमूले च।
अंह्रिप पु॰ अंह्रिणा पिबति अंह्रि-पा-ड। वृक्षे।
अंह्रिस्कन्ध पु॰ अंह्रि-स्कन्ध ६त॰। गुल्फे।
अक वक्रगतौ भ्वादि॰ घटादि पर॰। अकति आकीत्। अकयति।
अक इदित् भ्वादि॰ चिह्नकरणे आत्मने॰। अङ्कते।
अक क्ली॰ कं सुखं न॰त॰। पापे, दुःखे च।
अकच पु॰ न-कच बहु॰। केतुग्रहे। केशशून्ये त्रि॰।
अकरणि स्त्री॰ न-कृ-अनि। आक्रोशभेदे, शापे च। [त्रि॰
अकरा स्त्री॰ न-कृ-अच्। आमलकीवृक्षे। कररहिते, कर्टभिन्ने च
अकर्कश त्रि॰ न-कर्कशः न॰त॰। कोमले, कार्कश्यरहिते च।
अकर्ण त्रि॰ न-कर्ण बहु॰। बधिरे, कर्णरहिते च।
अकर्त्तन पु॰ न-कर्त्तन बहु॰। वामने, खर्व्वे च।
अकर्म्मण्य त्रि॰ कर्म्मन्+य-त् न॰त॰। कर्म्मायोग्ये।
अकर्म्मन् त्रि॰ न-कर्म्मन् बहु॰। कार्य्याक्षमे।
अकल्कन (क) त्रि॰ न-कल्कन (क) बहु॰। दम्भरहिते त्रि॰।
अकल्का स्त्री॰ न-कल्क बहु॰। ज्योत्स्नायाम्। दम्भरहिते
अकल्य त्रि॰ कलासु साधुः कला+यत् न॰ त॰। रोगिणि।

अकस्मात् अव्य० न-कस्मात् न०त०। हठात्कारे, आगन्तुके च

अकाण्ड पु० न-काण्ड न० त०। असमये, अनवसरे च। न काण्डः (स्कन्धः सायको वा यस्य) बहु०। तत्शून्ये त्रि०।

अकाण्डे अव्य०न-काण्डे न०त०। असमये, अनवसरे च। [त्रि०

अकाम पु० कम-घञ् न०त०। अनिच्छायाम्। ब० कामरहिते

अकामतः अव्य० अकाम-तसिल्। अनिच्छाहेतुतः।

अकाय पु० न-काय ब०। राहौ। देहशून्ये त्रि०।

अकार पु० अ+कार। अ-स्वरूपवर्णे। कारः क्रिया न-कारो यस्य ब०। कर्म्मशून्ये त्रि०।

अकारण न० न-कारण न०त०। कारणभिन्ने। न-कारण-(उद्देश्य, हेतु) ब०। निष्प्रयोजने, हेतुशून्ये च त्रि०।

अकार्य्य न० कृ-ण्यत् न० त०। द्यूतक्रियाचौर्य्यसाहसादौ दुष्टकर्म्मणि। ब० कार्य्यशून्ये त्रि०।

अकाल पु० न-काल न०त०। असमये, शुक्रास्तादिनिमित्तकव्रता-द्यकरणायोग्ये काले। कृष्णवर्णभिन्ने त्रि०।

अकालजलदोदय पु० अकाले जलदानामुदयः तत्पु०। कुज्झटिकायाम्। असमये मेघानामुदये च। [च।

अकिञ्चन त्रि० न-किञ्चन मयूरव्यंसकादि त०। दरिद्रे, निर्द्धने

अकिञ्चनता स्त्री० अकिञ्चन+ता। परिग्रहत्यागे, दारिद्र्ये च।

अकिञ्चिज्ज्ञ त्रि०न-किञ्चित्-ज्ञा-क। अल्पज्ञाने, ज्ञानशून्ये च।

अकिञ्चित्कर त्रि० न-किञ्चित्-कृ-अच्। अकर्म्मण्ये, क्रियाशून्ये, निष्प्रयोजने च।

अकुण्ठ त्रि०न-कुण्ठा ब०। अकुण्ठिते, प्रतिभायुक्ते, कार्य्यदक्षे च।

अकुतोभय त्रि० न-कुतः-भय-मयूरव्यंसकादि त०। भयशून्ये।

अकुप्य न० गुप्-यत् कस्य गः न०त०। स्वर्णरूप्ययोः।

अकूपार पु० न-कूप-ऋ-अण्। कच्छपे। न-कु-पॄ-अण् दीर्घः। महापारे,—समुद्रे,—दूरपारे—सूर्य्ये च।

अकूवार पु० न-कु-वृ-अण् दीर्घः। समुद्रे सूर्य्ये च।

अकृत्य न० कृ-क्यप् न०त०। अकार्य्ये, चौर्य्यादिदुष्टकर्म्मणि च। कर्म्मशून्ये त्रि०।

अकृष्टपच्य त्रि० न कृष्टे कर्षणे पच्यते पच्-यत्। कृष्यादिकं विना स्वयं पक्वे नीवारादौ।

अकृष्णकर्म्मन् त्रि० न-कृष्ण-कर्म्मन् ब०। अदुष्टाचारे पुण्यशीले।

अकौशल न० कुशलस्य भावः कुशल+अण् न०त०। अपाटवे। बहु०। पाटवशून्ये त्रि०।

अक्का स्त्री० अक-कन्। मातरि।

अक्त त्रि० अन्ज-क्त। कृताञ्जने, परिमिते, व्याप्ते, संकुले च।

अक्रम त्रि० न-क्रम ब०। क्रमशून्ये, यौगपद्ये, पादशून्ये च।

अक्रान्ता स्त्री० न क्रम-क्त। बृहत्याम्। क्रान्तभिन्ने त्रि०।

अक्रूर पु० न-क्रूर न०त०। यदुवंशीयनृपभेदे। क्रूरभिन्ने त्रि०।

अक्रोध पु० क्रुध-घञ् न०त०। कोपनिवृत्तौ। ब०। कोपशून्य त्रि०

अक्ष व्याप्तौ संहतौ च भ्वादिगणीयः स्वादिश्च पर०। अक्ष्णोति अक्षति।

अक्ष न० अक्ष-अच्। इन्द्रिये, काचोद्भवरसाञ्जने, (धुना) सर्ज्जर-सत्वारे। अक्ष घञ् पु०। द्यूतसाधने पाशकादौ, षोडश-माषकमानरूपे कर्षे, रथावयवे चक्रे, क्रयविक्रयचिन्तायाम्, विभीतकवृक्षे वयड़ा इति ख्याते, सर्पे, शकटे, विवादवि-ज्ञाततत्त्वे, रुद्राक्षे, जपमालायाञ्च।

अक्षक त्रि० अक्ष-ण्वुल्। पाशकादिक्रियाकारिणि, व्यापके च।

अक्षत न० क्षण्-क्त-न त०। यवे, क्षतरहिते च। लाजेषु पु०ब० व०।

अक्षदर्शक पु० अक्ष-दृश्-ण्वुल्। द्यूतकारिणि। व्यवहारादि-दर्शिनि त्रि०। स्त्रियाम् अक्षदर्शिका।

अक्षदृश् पु० अक्ष-(व्यवहार) दृश-क्विप्। व्यवहारनिर्णेतरि। द्यूतदर्शके त्रि०। [अक्षदेविनी।

अक्षदेविन् त्रि० अक्ष-दिव-णिनि। द्यूतकारिणि स्त्रियाम्

अक्षद्यू त्रि० अक्ष-दिव-क्विप्। पाशकादिक्रियाकारिणि, क्लीवे अक्षद्यु।

अक्षधुरा स्त्री० अक्ष-(चक्र) धुर्-(अग्र) ६त०। चक्राग्रे।

अक्षधूर्त्त पु० धुर्व्व-क्त अक्ष-धूर्त्त ७त०। द्यूतकारिणि, शाखोट इति प्रसिद्धे वृक्षे च।

अक्षधूर्त्तिल पु० अक्ष-(शकट) धुर्व-तिल। वृषे।

अक्षपाटक पु०अक्ष-(व्यवहार) पट-ण्वुल्। व्यवहारनिर्णेतरि।

अक्षपाद पु०अक्ष-(चक्षुः) पाद ब०। गौतमे (न्यायदर्शनप्रवर्त्तक मुनौ)। अक्ष-(चक्र) पाद (अवयव) ६त०। चक्राङ्गे।

अक्षम त्रि०क्षम-अच् न०त०। अशक्ते। ब०। क्षमारहिते।

अक्षमा स्त्री० क्षम-अङ् न०त०। ईर्ष्यायाम्, असहने च।

अक्षमाला स्त्री०अक्ष-माला ६त०। जपमालायाम्। [त्रि०।

अक्षय पु०न० क्षि-अच्। क्षयाभावे। ब०। नाशरहिते, क्षयशून्ये च

अक्षया स्त्री० सोमवारे अमावास्यातिथौ, रविवारे सप्तम्यां, कुजवारे चतुर्थ्याञ्च। वैशाखशुक्लतृतीयायामपि।

अक्षय्य न० अक्षयाय हितम् अक्षय+यत्। श्राद्धशेषे देये घृतमधुयुक्ते जले, अक्षयधर्म्मे च।

अक्षर पु० क्षृ-अच् न०त०। अकारादिवर्णे। नाशशून्ये त्रि०। ब्रह्मणि न०। [लेखके।

अक्षरचण (न) त्रि० अक्षरेण वित्तः अक्षर+चण (न)।

अक्षरचुञ्चु त्रि० अक्षरेण वित्तः अक्षर+चुञ्चु। लेखके।

अक्षरजीवक त्रि॰ अक्षर-जीव-ण्वुल् । वर्णलेखनोपजीविनि,
स्त्रियाम् अक्षरजीविका ।

अक्षरजीविन् त्रि॰ अक्षर जीव-णिनि । वर्णलेखनोपजीविनि,
स्त्रियाम् अक्षरजीविनी । [लेखन्यादौ ।

अक्षरतूलिका स्त्री॰ अक्षर-तूलिका ६त॰ । वर्णलेखनद्रव्ये

अक्षरवाट पु॰ न क्षरतीति अक्षरः वट-वेष्टने घञ् ।
बाहुयुद्धभूमौ । [विशिष्टस्त्रियामपि ।

अक्षरसंस्थान न॰ अक्षर-संस्थान ६त॰। वर्णविन्यासे। बहु॰।
लिप्यादौ च ।

अक्षवती स्त्री अक्ष+मतुप् वत्वम् । अक्षक्रीड़ायाम् । अक्ष-

अक्षवित् त्रि॰ अक्ष-विद्-क्विप्। द्यूतज्ञे,व्यवहाराभिज्ञे च।

अक्षशौण्ड पु॰ अक्ष-शौण्ड ७त॰ । द्यूतदक्षे । [च ।

अक्षसूत्र न॰अक्ष सूत्र ६त॰। जपमालासूत्रे,यज्ञसूत्रे,उपवीते

अक्षाग्रकीलक अस्त्री॰ अक्ष (चक्र) अग्र-कीलक ६त॰। चक्रा-
ग्रस्थापिते शङ्कौ । [ह्निते त्रि॰ ।

अक्षान्ति स्त्री॰क्षम-क्तिन् न॰त॰। ईर्ष्यायाम्। ब॰ । क्षमार-

अक्षारलवण न॰ क्षारलवण न॰त॰, ब॰ वा । क्षारलवण-
भिन्ने सैन्धवे,सामुद्रे च। गोक्षीरं गोघृतञ्चैव धान्यं मुद्गा-
स्तिला यवाः । सामुद्रं सैन्धवञ्चैव अक्षारलवणं स्मृतमिति
स्मृतिपरिभाषितेऽपि ।

अक्षि न॰ अश-क्सि । चक्षुषि । [मिति केचित् ।

अक्षिकूटक न॰ अक्षि-कूटक, ६त॰। चक्षुर्गोलके तत्तारकाया

अक्षिगत त्रि॰अक्षिविषयंगतः शाकपार्थिवादि त॰। द्वेष्ये,रिपौ च

अक्षिभेषज पु॰ अक्षि-भेष (रोग) जि-ड । लोध्रविशेषे ।

अक्षिव न॰ क्षिव-क न॰त॰। सामुद्रलवणे । [पाते च ।

अक्षिविकूणित न॰ अक्षि-वि-कूण-क्त। अपाङ्गदर्शने कटाक्ष

अक्षीव पु॰ क्षीव-क,न॰त॰ । सामुद्रलवणे । क्षीवो मत्तो न॰
त॰ । मत्तभिन्ने त्रि॰ ।

अक्षोट पु॰ अक्ष-ओट, अक्षस्येव विभीतकस्येव, उटाः पर्णा-
न्यस्येति वा। पार्व्वतीयपीलुवृक्षे आखरोट इति प्रसिद्धे ।

अक्षोड पु॰ अक्ष-ओड । पार्व्वतीयपीलुवृक्षे।

अक्षोभ पु॰ क्षुभ-घञ् न॰ त॰ । हस्तिबन्धनस्तम्भे । बहु॰ ।
क्षोभरहिते त्रि॰ ।

अक्षौहिणी स्त्री॰अक्ष (शकटादि) ऊहि-णिनि । संख्याविशेष-
युक्तरथादिसेनायाम् । तत्संख्या च २१८७ हस्तिनः । २१८७
रथाः । ६५६१० अश्वाः । १०९३५० पदातयः ।

अखट्ट पु॰ खट्ट-अच् न॰त॰ । पियालवृक्षे पियासाल ख्याते।

अखट्टि स्त्री खट्ट-इ न॰त॰ । अशिष्टव्यवहारे । अखट्टी च ।

अखण्ड त्रि॰खडि-घञ् न॰त॰। संपूर्णे,सकले। खण्डभिन्ने पु॰न॰।

अखण्डन पु॰ खडि ल्युट् ब॰। काले । खण्डनशून्ये त्रि॰।

अखण्डित त्रि॰ खडि-क्त न॰त॰। सम्पूर्णे,खण्डितभिन्ने च ।

अखात न॰ खन-क्त न॰त॰ । देवखाते,मनुष्याद्यखाते च ।
खातभिन्ने त्रि॰ । [गोमांसादौ, भक्ष्यभिन्ने च ।

अखाद्य त्रि॰ खाद-अर्हार्थे ण्यत् न॰ त॰ । भोजनानर्हे

अखिल त्रि॰ न खिल्यते न कणशआदीयते इति खिल-क
न॰त॰ । समग्रे । खिलाभिन्ने कृष्टभूम्यादौ स्त्री॰ ।

अग इदित् गतौ भ्वादि॰ पर॰ । अङ्गति। आङ्गीत् ।

अग वक्रगतौ भ्वादि॰पर॰घटादि। अगति आगीत्। अगयति ।

अग पु॰ न गच्छतीति गम-ड न॰त॰ । वृक्षे, पर्व्वते, सूर्य्ये
च । गमनाकर्त्तरि शूद्रादौ त्रि॰ ।

अगच्छ पु॰ गम-श न॰त॰। वृक्षे ।

अगति स्त्री॰ गम-क्तिन् न॰त॰। उपायाभावे । बहु॰। गति-
शून्ये उपायशून्ये च त्रि॰। [रोगशून्ये अकथने च त्रि॰।

अगद पु॰ नास्ति गदो रोगो यस्मात् ५ब॰। औषधे। ६ब॰ ।

अगदङ्कार पु॰अगदं करोति अगद-कृ-अण् मुम् च । वैद्ये ।

अगम पु॰न गच्छतीति गम-अच् न॰त॰। वृक्षे। अगन्तरि त्रि॰।

अगम्य त्रि॰ न-गन्तुमर्हति गम-यत् न॰ त॰ । गमनानर्हे,
अन्त्यजातिस्त्रियाञ्च स्त्री॰ ।

अगरी स्त्री॰नास्ति गरो विषो यस्याः ५ब॰ङीष् । मूषिकविष
हारिणि देवताड वृक्षे । विषहारिणि द्रव्यमात्रे त्रि॰ ।

अगरु न॰ न गिरति गॄ-उ। अगुरुचन्दने स्वनामप्रसिद्धे ।

अगस्ति पु॰ अगं विन्ध्याचलम् अस्यति अग-अस्-ति शकन्ध्वा-
दि॰ । अगस्त्यनामके मुनौ।

अगस्तिद्रु पु॰ अगस्तिप्रियः द्रुर्वृक्षः शाक॰त॰। वकवृक्षे।

अगस्ती स्त्री॰ अगस्तिनिवासत्वात् दक्षिणस्यां दिशि ।

अगस्त्य पु॰ अगं विन्ध्याचलं स्त्यायति स्तभ्नाति स्त्यै-क।
अगस्त्यनामके मुनौ । [छिद्रे न॰ ।

अगाध त्रि॰गाध प्रतिष्ठायाम् गाध-घञ् न-ब॰। अतिगभीरे।

अगाधजल पु॰अगाध-जल-७ब॰। अतिगभीरजले ह्रदे ।

अगार न॰ अगम् न गच्छन्तमृच्छति प्राप्नोति अग-ऋ-अण् ।
गृहे । [च त्रि॰ ।

अगु पु॰ न गौः किरणो यस्य। राहौ । किरणशून्ये,गोशून्ये

अगुरु न॰न गुरुर्यस्मात्। अगुरुचन्दने स्वनामप्रसिद्धे,शिंशपा-
(शिशु) वृक्षे च । गुरुभिन्ने, उपदेशकशून्ये च त्रि॰ ।

अगुरुशिंशपा स्त्री॰ अगुरुःसारो यस्याः तादृशी शिंशपा
मध्यपदलोपि स॰ । शिशु इति प्रसिद्धे शिंशपावृक्षे ।

अगढ़गन्ध न॰न-गूढ़ो गन्धो यस्य इब॰। हिङ्गुद्रव्ये। अगुह्य-
सौरभे द्रव्यमात्रे त्रि॰ ।

अग्नायी स्त्री॰अग्नि+ऐङ्-ङीष्। अग्नेर्योषिति स्वाहाख्यायाम् ।

अग्नि पु॰ अङ्गति ऊर्द्ध्वं गच्छति अगि-नि नलोपः । अग्नौ
स्वनामप्रसिद्धे तेजोभेदे ।

अग्निक पु॰अग्निवत् कायति प्रकाशते कै-क। इन्द्रगोपकीटे ।

अग्निकण पु॰ अग्नि-कण इत॰ । अग्निच्युतक्षुद्रांशे ।

अग्निकारिका स्त्री अग्नि-कारिका इत॰। अग्निकृत्ये होमा-
धानादौ, अग्न्युद्दीपकौषधिभेदे च । [धानादौ ।

अग्निकार्य्य न॰अग्नि-कार्य्य (कृ-ण्यत्) इत॰। अग्निकृत्ये होमा

अग्निकाष्ठ न॰ अग्नेः (उद्दीपनाय) काष्ठम् तादर्थ्यषष्ठ्या त॰।
अगुरुकाष्ठे ।

अग्निकुक्कुट पु॰ अग्नेः कुक्कुटइव रक्तवर्णस्फुलिङ्गत्वात्। ज्वल-
दग्निव्याप्ततृणपुञ्जे नुडा इति ख्याते ।

अग्निकोण न॰ अग्नेः कोणः इत॰। पूर्व्वदक्षिणयोर्मध्ये दिग्-
भागे तस्य वह्निदैवत्यप्रसिद्धेः । [सीति प्रसिद्धे काचे च ।

अग्निगर्भ पु॰ अग्निर्गर्भे यस्य ब॰। सूर्य्यकान्तमणौ आत-

अग्निचयन पु॰ अग्निश्चीयतेऽनेन चि-ल्युट् । मन्त्रभेदे, काष्ठे
च । [कृतवह्निस्थापने अग्निहोत्रिणि ।

अग्निचित् पु॰अग्निं चितवान् चि-भूतार्थे क्विप् । मन्त्रपूर्व्वक

अग्निज पु॰ अग्नि-जन-ड। अग्निजारवृक्षे । स्वर्णे न॰ ।
अग्निजातद्रव्ये त्रि॰। [न॰ । वह्निजातमात्रे त्रि॰

अग्निजात पु॰ अग्नेर्जातः जन-क्त । अग्निजारवृक्षे स्वर्णे

अग्निजार पु॰अग्निं जारयति जॄ-अण्। अग्निजारनामकवृक्षे

अग्निजाल पु॰ अग्निं जारयति जॄ-अण् लत्वम् । अग्निजार
वृक्षे । [इत॰। अग्निशिखायाम् ।

अग्निजिह्वा स्त्री॰अग्नेर्जिह्वेव। जाङ्गलीवृक्षे। इत॰। अग्नि
जिह्वायाम् । अग्निर्जिह्वा येषां ब॰। देवे

अग्निज्वाला स्त्री॰ अग्नेर्ज्वालेव। गजपिप्पलीवृक्षे ।

अग्निदमना स्त्री॰ अग्निं दमयतीति दमि-ल्यु। गणिकारी-
[नामकक्षुपभेदे ।

अग्निदेवा स्त्री॰अग्निर्देवो यस्याः। कृत्तिकाख्यतारायां तस्या
अग्निदैवतत्वात् । अग्निदैवतमात्रे त्रि॰ ।

अग्निनिर्य्यास पु॰ अग्नेर्निर्यासः (वीरवत् निष्यन्दः) ।
उपचारात् तज्जाते अग्निजारवृक्षे। स्वर्णे न॰ ।

अग्निप्रस्तर पु॰ अग्निं प्रस्तृणाति स्तॄ-अच् अग्नेर्वा प्रस्तरः।
चकमकीति ख्यातेऽग्न्युत्थापके प्रस्तरखण्डे ।

अग्निबाहु पु॰ अग्नेर्बाहुरिव दीर्घशिखत्वात् । धूमे ।

अग्निभ न॰ अग्निरिव भाति भा-क । स्वर्णे । अग्निवत्
प्रकाशवति त्रि॰ ।

अग्निभू पु॰ अग्नेर्भवति भू-क्विप्। कार्त्तिकेये । स्वर्णे न॰ ।
अग्निजातमात्रे त्रि॰ ।

अग्निमणि पु॰ अग्ने-र्मणिः । अग्निसाधने आतसीति प्रसिद्धे
काचे। सूर्य्यकान्ते मणौ च ।

अग्निमथन पु॰ अग्नये मथ्यतेऽसौ मन्थ-ल्युट् नलोपः ।
गणियारीति ख्याते गणिकारीवृक्षे । तत्काष्ठयोर्घर्षणे हि
झटिति वह्निरुद्दीप्यते। अग्निमन्थनमन्त्रे च ।

अग्निमन्थ पु॰अग्नये मथ्यतेऽसौ मन्थ अच्। गणिकारीवृक्षे।

अग्निमारुति पु॰अग्निमारुत+इञ् तस्य कल्पभेदे अग्नि-
वायुरूपयोर्द्देवयोः पुत्रे अगस्त्यमुनौ ।

अग्निमुख पु॰ अग्निर्मुखमिव यस्य। देवे,हुतद्रव्यं हि देवैर-
ग्निद्वारेणैवाश्यते । अग्निर्मुखे यस्य तस्मिन्। विप्रे, शाप-
रूपाग्नेस्तस्य मुखे स्थितत्वात्। अग्निर्मुखः प्रधानमुपास्यो
यस्य तस्मिन् वा । विप्रे । अग्नेर्मुखे तु न॰ ।

अग्निमुखी स्त्री अग्निरिव मुखमग्रं यस्याः गौरादित्वात्
ङीष्। (भेला) भल्लातकवृक्षे,पाकशालायाम्,गायत्रीमन्त्रे च।

अग्निरक्षण न॰ अग्निः रक्ष्यतेऽनेन रक्ष-ल्युट्। राक्षसादि-
भ्योऽग्निरक्षाकारके मन्त्रभेदे, अग्निहोत्रे च ।

अग्निरजस् पु॰अग्निरिव रज्यते दीप्यते रन्ज असु नलोपः।
रक्तवर्णे इन्द्रगोपनामककीटे । अग्निवीर्य्ये, स्वर्णे च ।

अग्निवल्लभ पु॰ अग्नेर्वल्लभः सुखेन दाह्यत्वात् । शालवृक्षे ।
अग्निप्रिये त्रि॰ ।

अग्निवाह पु॰ अग्निं वाहयति गमयति बोधयति वा वाहि
अण् । धूमे, छागे च। वह्निवाहकमात्रे त्रि॰ ।

अग्निवित् पु॰ अग्निं विन्दते विन्द-क्विप् । अग्निहोत्रिणि
साग्निके । [स्वर्णे, वह्निरेतसि च ।

अग्निवीज न॰ अग्नेर्वीजम् तद्रेतोजातत्वात् उपचारात् ।

अग्निवीर्य्य न॰ अग्नेर्वीर्य्यं, तद्वीर्य्यजातत्वादुपचारात् स्वर्णे
वह्निरेतसि, तत्पराक्रमे च। ब॰। अग्नितुल्यपराक्रमवति त्रि॰

अग्निशिख पु॰अग्निरिव शिखा यस्य। कुङ्कुमवृक्षे,कुसुम्भवृक्षे,
अग्नितुल्यशिखे जाङ्गलीवृक्षे च। अग्नितुल्यजटावति त्रि॰

अग्निशेखर पु॰ अग्निरिव शेखरमग्रं यस्य। कुङ्कुमवृक्षे कुसु-
म्भवृक्षे जाङ्गलीवृक्षे च । अग्नितुल्याग्रवति त्रि॰ ।

अग्निष्टोम पु॰ अग्नेः स्तोमं स्तु-मन् षत्वम्। यागविशेषे ।

अग्निष्ठ पु॰ अग्नौ स्थातुमर्हति स्था-क षत्वम्। वह्नौ स्थिति-
योग्ये लौहमये कटाहादिपात्रे ।

अग्निसम्भव पु० अग्नेः सम्भवति भू-अच् । अरण्यकुसुम्भे । अग्निसम्भूतमात्रे त्रि० ।

अग्निसहाय पु० अग्निना सह अयते अय-अच् । वायौ, अग्निसहायधूमवद्वेगवत्त्वात् शीघ्रगतित्वाच्च वनकपोते च ।

अग्निसार न० अग्नौ सारो यस्य अत्यन्ताग्न्युत्तापनेऽपि सारांशादहनात् । रसाञ्जने । अग्नेर्मध्ये तु अस्त्री० ।

अग्निष्वात्त (ष्वात्त) पु० ब०व० अग्नितः (श्राद्धीयविप्रकररूपाग्नेः) सुष्ठु आत्तं ग्रहणं येषां आ-दा-क्त षत्वमिति बहवः । मरीचिपुत्रे पितृगणविशेषे ।

अग्निहोत्र पु० अग्नौ-हूयतेऽत्र हु-त्र । मन्त्रकरणकवह्निस्थापनपूर्व्वकहोमादौ । अग्निहोत्रसंबन्धित्वात् वह्नौ च ।

अग्निहोत्रिन् त्रि० अग्निहोत्र+इनि । अग्निस्थापनपूर्व्वके सायंप्रातरादिकाले होमकर्त्तरि साग्निके ।

अग्नीध् पु० अग्निरिध्यतेऽनेन अग्नि-इन्ध-क्विप् । अग्निप्रज्वालनमन्त्रे ।

अग्नीध्र पु० अग्निरिध्यतेऽनेन कर्त्तां अग्नि-इन्ध-रक् । अग्निरक्षणकारके ब्रह्मापरपर्य्याये ऋत्विग्भेदे । अग्निं धारयत्यत्र अग्निध्र इत्यपि धृ-क । अग्निकृत्ये, होमादौ च ।

अग्नीन्धन त्रि० अग्निरिध्यतेऽनेन अग्नि-इन्ध-ल्युट् । मन्त्रभेदे । स्त्रियां टित्त्वात् ङीप् । भावे ल्युटि । अग्निकृत्ये न० ।

अग्न्याधान न० अग्नेराधानम् आ-धाञ्-ल्युट् ६त० । वेदमन्त्रद्वारा वह्निस्थापने । बहु० । अग्निहोत्रयागे ।

अग्न्यालय पु० अग्नेरालयः अग्नि-आ-ली-अच् ६त० । वेदमन्त्रद्वारा वह्निस्थापनयोग्ये गृहे, तदाधारे-कुण्डे, स्थण्डिले च ।

अग्न्याहित पु० अग्निराहितो येन अग्नि-आ-धाञ् कर्म्मणि क्त, वा परनिपातः । अग्निहोत्रिणि साग्निके ।

अग्न्युत्पात पु० अग्निना कृत उत्पातः (अनिष्टसूचकोपद्रवः) उत्-पत-घञ् ३त० । आकाशस्थाग्निकृतविकारसूचितोपद्रवे, उल्कापाताद्यशुभसूचके, धूमकेतुकृतविकारे च ।

अग्न्युपस्थान त्रि० अग्निरुपस्थीयतेऽनेन अग्नि-उप-स्था ल्युट् । वह्नेरुपस्थानमन्त्रे । स्त्रियां ङीप् । ६त० । वह्नेरुपस्थाने न० ।

अग्र न० अङ्ग-रक् नलोपः । उपरिभागे, शेषभागे, आलम्बने, पूर्व्वभागे, पलपरिमाणे, समूहे च । प्रधाने, अधिके, प्रथमे च त्रि० ।

अग्रकाय अस्त्री० अग्रः-कायः अवयवावयविनोरभेदात् अग्रहस्तवत् कर्म्म० । देहपूर्व्वभागे ।

अग्रग त्रि० अग्रे गच्छतीति अग्र-गम-ड । प्रथमगामिनि । स्त्रियामग्रगा । [प्रधाने च ।

अग्रगण्य त्रि० अग्रे गण्यते अग्र-गण यत् ७त० । अग्रगणनीये,

अग्रगामिन् त्रि० अग्रे गच्छति अग्र-गम-णिनि ७त० । अग्रसरे । स्त्रियामग्रगामिनी ।

अग्रज पु० अग्रे जायते अग्र-जन-ड । ज्येष्ठभ्रातरि । अग्रजातमात्रे त्रि० । ज्येष्ठभगिन्यां स्त्री० ।

अग्रजङ्घा स्त्री० अग्रा जङ्घा अवयवावयविनोरभेदात् क० स० । जङ्घाग्रभागे ।

अग्रजन्मन् पु० अग्रे जन्म यस्य अग्र जन् मनिन् व्यधि० बहु० । ज्येष्ठभ्रातरि, विप्रे च । अग्रजातमात्रे त्रि० ।

अग्रजात पु० अग्रे जातः अग्र-जन् क्त ७त० । ज्येष्ठभ्रातरि, विप्रे च । ज्येष्ठभगिन्यां स्त्री० । पूर्व्वजातमात्रे त्रि० ।

अग्रजाति पु० अग्रा श्रेष्ठा जातिर्यस्य, अग्र-जन-क्तिन् । विप्रे ।

अग्रजिह्वा स्त्री० अग्रा जिह्वा अग्रहस्तवत् क० । जिह्वाग्रभागे । [श्रेष्ठे च ।

अग्रणी त्रि० अग्रे नीयतेऽसौ अग्र नी क्विप् णत्वम् । प्रभौ

अग्रतस् अव्य० अग्रे अग्राद्वा अग्र-तसिल् । पूर्व्वभागे, पूर्व्वभागावधिके च । [अग्रगामिनि । स्त्रियां ङीप् ।

अग्रतःसर त्रि० अग्रतः सरति गच्छति अग्रतस् सृ-ट ७त० ।

अग्रदानिन् पु० अग्रे दानं यस्य अग्र-दान+इनि । प्रेतोद्देशेन यद्दानं दीयते तत्प्रतिग्राहिणि अग्रदानीति ख्याते विप्रे ।

अग्रनख अस्त्री० अग्रं नखं अग्रहस्तवत् क० । नखाग्रे ।

अग्रनासिका स्त्री० अग्रा नासिका अग्रहस्तवत् क० । नासिकाग्रभागे । [शीति ख्याते वृक्षे ।

अग्रपर्णी स्त्री० अग्रे पर्णं यस्याः जातित्वात् ङीप् । आल्कु-

अग्रभाग पु० भज्यते इति भागः एकदेशः अग्रः पूर्व्वः भागः भज-घञ् क० । श्राद्धादौ प्रथमसमुद्धृत्य देये द्रव्ये अवयवस्य अग्रदेशे च । यथा शरस्य शल्याग्रम् ।

अग्रभुक् त्रि० अग्रे देवपित्रादिभ्योऽदत्त्वा भुङ्क्ते अग्र-भुज-क्विप् । औदरिके ।

अग्रमांस न० अग्रं प्रधानं भक्ष्यत्वेन मन्यते मन्-स, दीर्घः क० । हृदयस्थे पद्माकारे (फुलका) इति नामके मांसे । केचित् व्यक्ताग्रमांसमेकं नामेत्याहुः । अग्रमास इति प्रसिद्धे रोगभेदे च ।

अग्रमुख न० अग्रं मुखं अग्रहस्तवत् क० । मुखाग्रे ।

अग्रयान न० अग्रे यानं यस्य या-ल्युट् संज्ञात्वेऽप्यणत्वम् । पुरोगामिनि सैन्ये । अग्रगामिमात्रे त्रि० ।

अग्रलोहिता स्त्री० अग्रमुपरिभागः लोहितं यस्याः ब० । चिल्लीति प्रसिद्धे शाकभेदे ।

अग्रबीज पु० अग्रं शाखाग्रं बीजमुत्पादकं यस्य । छिन्नाग्रतरुखण्डरूढे कलम इति प्रसिद्धे काण्डजाते कुरण्टकादिवृक्षे

अग्रसन्धानी स्त्री० अग्रे फलोत्पत्तेः प्राक् सन्धानं कार्य्यस्य ज्ञानं यस्या ङीप् । यमपञ्जिकायाम् । यत्र हि प्राणिवर्गस्य प्राग्भवीयकर्म्मानुसारेण शुभाशुभसूचनं सर्व्वं लिख्यते सा यमपञ्जिका, केश्चित् यमपट्टिकेति सा कथ्यते । अग्रसन्धानकारिणि तु त्रि० ।

अग्रसन्ध्या स्त्री० अग्रं सन्ध्यायाः सर्व्वोऽप्येकदेशः कालवाचिना समस्यते इत्युक्तेः एक०त० । सन्ध्यापूर्व्वसमये । अग्रा पूर्व्वा सन्ध्या इति क० । प्रातःसन्ध्यायाम् ।

अग्रसर त्रि० अग्रे सरति गच्छति अग्र-सृ-ट ७त० । अग्रगामिनि । स्त्रियां ङीप् ।

अग्रह पु० ग्रहः (परिग्रहः) न०त० । परिग्रहाभावे । बहु० । परिग्रहशून्ये संन्यासिप्रभृतौ त्रि० ।

अग्रहर पु० अग्रे ह्रियते दीयतेऽसौ अग्र-हृ-अच् । अग्रदेये वस्तुनि, भागाग्रे च । अग्र-हृ-ट । अग्रहारिणि तु त्रि० ।

अग्रहस्त पु० अग्रः हस्तः अवयवावयविनोरभेदात् क० । हस्ताग्रे ।

अग्रहायण: अस्त्री० हय ब्रीहिकालयोरिति काले वाच्ये हा-ल्युट् युक् च भावं स्वभावं जहाति हायनो वर्षः अग्रः पूर्व्वः हायनः क० णत्वम् । मार्गशीर्षे मासि तस्य च वर्षादित्वम् अमरकोषादौ मार्गादिमारभ्य कार्त्तिकान्तमासकीर्त्तनात् स्पष्टमवगतम् ।

अग्रहायणी स्त्री० अब्दनि जहातीति हायनो ब्रीहिः अग्राः श्रेष्ठा हायनाः शालयो यस्यां संज्ञात्वात् णत्वं गौरादित्वात् ङीप् । मृगशीर्षनक्षत्रे । तस्य च नक्षत्रस्य रात्रौ प्रथममुदयकाले श्रेष्ठब्रीहीणां धान्यानामुत्पत्तिर्लोके दृश्यते । तच्च नक्षत्रं सौराग्रहायणे मासि रात्रौ प्रथममुदेति ।

अग्रहार पु० अग्रे ह्रियतेऽसौ हृ-घञ् । अग्रहरे (पूर्व्वोक्तेऽर्थे) ब्रह्मचारिणे देये क्षेत्रादौ च । अग्र-हृ-अण् । अग्रहारिणि त्रि० । स्त्रियां ङीप् ।

अग्राह्य त्रि० न-ग्रह-ण्यत् । ग्रहणायोग्ये शिवनिर्म्माल्यादौ प्रतिग्रहायोग्ये तिलाश्वस्वर्णादौ च ।

अग्रिम पु० अग्रे भवः अग्र+डिमच् । ज्येष्ठभ्रातरि । श्रेष्ठे उत्तमे च त्रि० । [च त्रि० ।

अग्रिय पु० अग्रे भवः अग्र+घ । ज्येष्ठभ्रातरि । श्रेष्ठे उत्तमे

अग्रीय पु० अग्रे भवः अग्र+छ । ज्येष्ठभ्रातरि । श्रेष्ठे उत्तमे च त्रि० । [गामिनि ।

अग्रेगा त्रि० अग्रे गच्छति अग्र-गम-क्वनिप् अलुक्स० । अग्र-

अग्रेगू त्रि० अग्रे गच्छति अग्रे-गम-डू+अलुक्स० । अग्रसरे-सेवके ।

अग्रेदिधिषू पु० दिधिं धैर्य्यं स्यति निरस्यति, दिधिषूः द्विरूढा पुनर्भूः योषित् दिधि-सो-कू-षत्वम् अग्रे प्रधाना दिधिषूर्यस्य अलुक्स० कबभावाद्ध्रस्वत्वे । पुनर्भूविवाहकारिणि । निपातनात् अस्य ह्रस्वान्ततापीष्यते । प्रागूढकनिष्ठभगिन्या अनूढज्येष्ठभगिन्यां च । ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा तु दिधिषूः स्मृतेति मनूक्तेः । एतत्पक्षे च अग्रे स्वविवाहात् पूर्व्वं दिधिषूः ज्येष्ठाविवाहकालासहनरूपधैर्य्यलोपकारिणी अनुजा यस्या इति विग्रहः ।

अग्रेवण न० अग्रे वनस्य ७त० अलुक्स० णत्वञ्च । वनाग्रदेशे ।

अग्रेसर त्रि० अग्रे सरति गच्छति अग्रे सृ-ट अलुक्स० ७त० । अग्रगामिनि स्त्रियां ङीप् । [च त्रि० ।

अग्र्य पु० अग्रे भवः अग्र+यत् । ज्येष्ठभ्रातरि । प्रधाने श्रेष्ठे

अघ इदित् गतौ भ्वादि० आत्मने० सक० सेट् । अङ्घते । आङ्घिष्ट ।

अघ पापकरणे अदन्तचुरादि० उभय० । अघयति-ते ।

अघ न० चुरा० अघ अच् । पापे, व्यसने, दुःखे च ।

अघमर्षण त्रि० अघं पापं मृष्यतेऽनेन अघ-मृष-ल्युट् । सर्व्वपापनाशार्थं जप्ये मन्त्रादौ । स्त्रियां ङीप् ।

अघोर पु० घुंण-डीर । न घोरः (शान्तः) न०त० । महादेवे । घोरभिन्ने त्रि० । भाद्रकृष्णचतुर्द्दश्यान्तु स्त्री० ।

अघोष पु० घुष-घञ् न० त० । वर्णोच्चारणबाह्ययत्नविशेषे । स च खयां यमः खयः+क ×पौ विसर्गः शर एव च । एते श्वासानुप्रदानाः अघोषाश्च विवृण्वते इति शिक्षोक्तदिशा खयादिवर्णानामुच्चारणप्रयत्नः ।

अघ्न्य पु० न हन्ति सृष्टिकर्तृत्वात् न-हन-यक् निपातनात् साधु । प्रजापतौ । न हन्यते स्त्रीहत्याया निषिद्धत्वात् । स्त्रियां गवि तु स्त्री० ।

अङ्क (नक) संख्याकरणे चिह्नयुक्तकरणे अदन्तचुरादि० उभ० सक० सेट् । अङ्कय-ति-ते आङ्किक-त्-त । अङ्कापयति ते इति केचित् ।

अङ्क पु० अङ्क-घञ् । दृश्यकाव्यविशेषे अङ्क इति प्रसिद्धे नाटकपरिच्छेदे, पर्व्वते, चिह्ने, रेखायां, युद्धभूषणे, समीपे च । क्रोडे तु अस्त्री० ।

अङ्कति पु० अन्च-(गतौ) अति कुत्वम् । वाते । पूजनार्थत्वे कर्म्मणि अति। ब्रह्मणि अग्नौ च। अग्निहोत्रिणि त्रि०। स्त्रियाम् अङ्कती च ।

अङ्कन त्रि० अङ्क-ल्युट् । अङ्कनसाधनद्रव्ये दागनीति प्रसिद्धे स्त्रियामङ्कनी । चिह्नकरणमात्रे न० ।

अङ्कपालि (ली) स्त्री० पा-अलि अङ्क-पालि ६त० वा ङीप् । क्रोडप्रान्ते । अङ्केन पालयतीति अङ्क-पालि-इ । उपमातरि (धाइमा) इति प्रसिद्धायाम् । अङ्कस्य पालिरिव त० । आलिङ्गने च ।

अङ्कपालिका स्त्री० अङ्कपालि+क । धात्र्याम्, वेदिकायां, क्रोड़प्रान्तभागे, आलिङ्गने च ।

अङ्कस् न० अन्ज-असुन् कुत्वम् । चिह्ने, शरीरे च ।

अङ्कित त्रि० अङ्क-क्त । चिह्निते, चित्रिते, कृतसंख्यायाञ्च ।

अङ्किन् त्रि०अङ्कः (आलिङ्गनस्थानत्वेन) अस्यास्ति अङ्क+इनि । अङ्केनालिङ्ग्ये-मृदङ्गादिवाद्यभेदे, क्रोड़विशिष्टे च । स्त्रियामङ्किनी ।

अङ्कुर अस्त्री० अङ्क-उरच् । वीजादभिनवोत्पन्ने, मृत्तिकामुद्भिद्य जाते च तृणवृक्षादौ, जले च । शीघ्रमुत्पद्यते इति साधर्म्यात् रुधिरे, लोम्नि च ।

अङ्कुरक पु० अङ्कग्रते यत्नेन सञ्चीयतेऽसौ अन्च-घुरच् ततः क । पक्ष्यादीनां वासस्थाने वासा इति ख्याते ।

अङ्कुश अस्त्री० अङ्क-उशच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहास्त्रभेदे डाङ्श इति ख्याते।

अङ्कुशदुर्द्धर पु०दुःखेन धार्य्यते व्यवस्थाप्यते दुर्-धारि खल् तस्य: अङ्कुश-दुर्द्धर ३त० । दुर्दान्तहस्तिनि ।

अङ्कूर पु० अङ्क-खर्जूरादित्वात् ऊरच् । अभिनवोत्पन्ने तृणवृक्षादौ । [लौहमयेऽस्त्रभेदे ।

अङ्कूष अस्त्री० अङ्क ऊषच् । हस्तिचालनोपयोगिनि वक्राग्रे

अङ्कोट (ठ) (ल) पु० अङ्कग्रते लक्ष्यते कीलकैः । अङ्क-ओट (ओठ) (ओल) । पीतवर्णसारे गन्धयुक्तपुष्पे दीर्घकण्टकयुक्ते रक्तवर्णफले आकोड़ इति ख्याते वृक्षे ।

अङ्कोलक पु० अङ्कोल+क । आकोड़ इति ख्याते वृक्षे ।

अङ्कोलसार पु० अङ्कोलस्य सारः ६त० । अङ्कोटवृक्षजाते विषभेदे ।

अङ्कोलिका स्त्री० अङ्क-वल् अच् संप्रसारणे अङ्कोला+क । आलिङ्गनक्रियायाम् ।

अङ्क्य पु० अङ्के क्रोडे स्थापयित्वा वाद्यतेऽसौ अङ्के साधुः अङ्क-यत् । सार्द्धतालत्रयायामं चतुर्द्दशाङ्गुलाननः । हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के स हि वाद्यते इत्युक्तेः क्रोडे स्थापनपूर्व्वकं वादनीये मृदङ्गादौ । अङ्कनीये त्रि० ।

अङ्ग चिह्नयुक्तकरणे अदन्तचुरादि उभय० सकर्म्मक० सेट् अङ्गय-ति ते आञ्जिग-त् त । मतान्तरे अङ्गापयति ते ।

अङ्ग न० अङ्ग-अच् । देहे,अवयवे,अप्रधाने,उपाये, मनसि च ।

अङ्गग्रह पु० अङ्ग-ग्रह ६त० । देहवेदनायाम् ।

अङ्गज न०अङ्गात् जायते अङ्ग-जन-ड । रुधिरे। पुत्रे,केशे च पु० । देहजातमात्रे त्रि०।

अङ्गण (न) न०अङ्गत्यत्र अङ्ग-ल्युट् पृषोदरादित्वात् वा णत्वम्। (उठान) इति प्रसिद्धे प्राङ्गणे ।

अङ्गति पु० अनक्ति यात्यनेन करणेन। अन्ज-अति कुत्वम् । वाहने । अज्यते पूज्यते कर्म्मणि अति । ब्रह्मणि, अग्नौ च । अग्निहोत्रिणि त्रि०। स्त्रियाम् अङ्गती च ।

अङ्गद न० अङ्गं दायति शोधयति दै-क । ताड़,वाजु, इति च प्रसिद्धे वाहुभूषणे । बालिपुत्रे-वानरे पु० । अङ्गदानकर्त्तरि त्रि० । दक्षिणदिग्गजकरिण्यां स्त्री० ।

अङ्गना स्त्री०प्रशस्तमङ्गमस्ति यस्याः अङ्ग+न। अङ्गसौष्ठववत्यां योषिति,योषिन्मात्रे, उत्तरदिग्गजकरिण्याञ्च ।

अङ्गनाप्रिय पु०प्री-क अङ्गना-प्रिय ६त० । अशोकवृक्षे तत्पुष्पेण स्त्रियः स्वाङ्गं भूषयन्तीति । योषित्प्रियमात्रे तु त्रि० । [आलिङ्गने ।

अङ्गपालि स्त्री० अङ्गं पाल्यते संबध्यतेऽत्र अङ्ग-पाल-इ ।

अङ्गपालिका स्त्री० अङ्गं देहं पालयतीति अङ्गपालि-ण्वुल् । धाइमा इति ख्यातायाम् उपमातरि । अङ्गपालनकारके त्रि० ।

अङ्गमर्द्द पु० अङ्गं मर्द्दयति संवाहयति अङ्ग-मर्द्द-णिच् अच् । देहसंवाहके-सेवके । अङ्गमर्द्दनकारके त्रि० ।

अङ्गमर्द्दक पु० अङ्गं मर्द्दयति अङ्ग-मर्द्द-णिच् ण्वुल् । देहसंवाहके-सेवके ।

अङ्गमर्द्दिन् पु० अङ्गं मर्द्दयति अङ्ग-मर्द्द-णिच्-णिनि। अङ्गमर्दके सेवके । अङ्गमर्दनकारके त्रि० स्त्रियां ङीप् ।

अङ्गरक्त पु० अङ्गेन रक्तः रन्ज-क्त ३त० । कम्पिल्यदेशजाते-रक्तवर्णचूर्णवति-गुडारोचनीति वाणिजेषु वैद्येषु च प्रसिद्धे वृक्षभेदे । रक्ताङ्गमात्रे त्रि० ।

अङ्गरक्षणी स्त्री० अङ्गं रक्ष्यतेऽनया अङ्ग-रक्ष-ल्युट् ङीप्। आङ्राखा इति प्रसिद्धे वस्त्रे । अङ्गरक्षणकारके त्रि० ।

अङ्गराग पु० अङ्गं रज्यतेऽनेन अङ्ग-रन्ज-करणे घञ् । अङ्गलेपने कुङ्कुमादौ । भावे घञि । अङ्गस्य विलेपने ।

अङ्गराज् पु० अङ्गेषु तन्नामकदेशेषु राजते राज-क्विप् ७त०। अङ्गदेशाधिपे कर्णे ।

अङ्गव न० अङ्गे स्वावयवे वाति अन्तर्भवति अतिशोषणात् सङ्कुचताङ्गमिव भवति अङ्ग-वा-ड । शुष्कफले ।

अङ्गविकृति पु० वि-कृ-क्तिन् अङ्गस्य विकृतिश्चालनादिर्यस्मात् ५त० । मृगीनाडा इति ख्याते अपस्माररोगे। ६त० । अङ्गस्य विकारे स्त्री० ।

अङ्गविक्षेप पु० वि-क्षिप-घञ् अङ्गस्य विक्षेपः चालनं यत्र ब०। अङ्गुल्यादिविन्यासभेदेन त्रिंशद्विधे नृत्ये । ६त०। अङ्गस्य चालनमात्रे ।

अङ्गवैकृत न० विकृतस्य भावः विकृत+अण् अङ्गेन अङ्गचेष्टया वैकृतं हृदयभावो ज्ञायते यत्र बहु० । आकार इति ख्यातायाम्-हृदयगतभावावेदकचेष्टायाम् । ६त० । अङ्गस्य विकारे न० ।

अङ्गस् पु० अन्ज-असुन् कुत्वञ्च । पक्षिणि इत्युज्ज्वलदत्तः ।

अङ्गसंस्कार पु० अङ्गं संस्क्रियतेऽत्र अङ्ग-सम्-कृ आधारे घञ् । देहसंशोधनादिसंस्कारकारके स्नाने गोधूमचूर्णादिनाङ्गमर्द्दने च । भावे घञ् ६त० । अङ्गस्य संस्कारे विलेपनादौ। अङ्गं संस्करोति अङ्ग-सम्-कृ-कर्त्तरि-अण् । कुङ्कुमादौ त्रि० ।

अङ्गहार पु० अङ्गं ह्रियते चाल्यतेऽत्र अङ्ग-हृ आधारे घञ् । अङ्गुल्यादिविन्यासभेदेन त्रिंशद्विधे नृत्ये । भावे घञ् ६त० । अङ्गस्य हरणमात्रे ।

अङ्गाङ्गिभावः पु०अङ्गस्य अङ्गिनश्च भावः। गौणमुख्यभावे ।

अङ्गाधिप पु० अधि पा-क अङ्ग-अधिप ६त० । अङ्गदेशपतौ कर्णे । अत्र अङ्गाधिपतिरित्यपि ।

अङ्गार अस्त्री० अङ्ग-आरन् । अर्द्धदग्धे-अग्निसंक्रान्ते अग्निशून्ये वा आङार इति प्रसिद्धे-काष्ठखण्डे । मङ्गल ग्रहे पु० । रक्तवर्णे त्रि० ।

अङ्गारक पु० अङ्गार+स्वार्थे क । रक्तवर्णत्वात् मङ्गलग्रहे, कुरण्टकवृक्षे, भीमराज इति ख्याते-भृङ्गराजवृक्षे च । अल्पार्थे क । स्फुलिङ्ग इति विख्याते-अङ्गारक्षुद्रांशे ।

अङ्गारक न० तैलमङ्गारकं नाम सर्व्वज्वरविनाशनमिति वैद्यकपरिभाषिते तैलविशेषे ।

अङ्गारकमणि अस्त्री० अङ्गारकस्य मणिः ६त०। प्रवाले तस्य मङ्गलग्रहस्वामिकत्वस्य ज्योतिषे प्रसिद्धिः ।

अङ्गारधानिका स्त्री० अङ्गाराणि धीयन्तेऽस्याम् अङ्गार-धा-आधारे ल्युट् टित्त्वात् ङीप् ततः स्वार्थे कप् टाप्। अङ्गाराधारे (आङ्टा) इति (धुनची) इति च प्रसिद्धे पात्रभेदे ।

अङ्गारपरिपाचित न० अङ्गारे (ज्वलदग्निव्याप्तकाष्टखण्डे) परिपाच्यते परि-पच स्वार्थे णिच् क्त । काबाब इति प्रसिद्धे-पक्वमांसादौ।

अङ्गारपुष्प पु० अङ्गारमिव लोहितवर्णं पुष्पं यस्य ब० । जियापुति, इति ख्याते इङ्गुदीवृक्षे ।

अङ्गारमञ्जरी स्त्री० अङ्गारमिव रक्तवर्णा मञ्जरी यस्याः ब० समासान्तकबभावाद्ह्रस्वत्वे संज्ञात्वात् । रक्तवर्णे-(करमचा) इति ख्याते करञ्जवृक्षे ।

अङ्गारवल्ली स्त्री०अङ्गारमिव रक्तफलत्वात् रक्ता वल्ली क० । रक्तवर्णफलवत्यां-कुँच इति प्रसिद्धायाम्,-गुञ्जालतायां करञ्जवृक्षे च ।

अङ्गारशकटी स्त्री० शक्नोति वोढुं शकटम्, अल्पं शकटं, शकटी,घट्यादिवत् अल्पार्थे ङीप् अङ्गारस्य शकटी ६त० । (आङ्टा) धुनाचीति च प्रसिद्धे अङ्गाराधारे पात्रभेदे ।

अङ्गारि स्त्री०अङ्गार+मत्वर्थे ठन् पृषोदरादित्वात् कलोपः । अङ्गाराधारे आङ्टा इति प्रसिद्धे पात्रविशेषे ।

अङ्गारिका स्त्री० अङ्गारं विद्यतेऽस्याः अङ्गार+मत्वर्थे ठन् टाप् । आङ्टा इति ख्याते अङ्गारपात्रे ।

अङ्गारिणी स्त्री०अङ्गार+इनि। अङ्गारधानिकायां (आङ्टा इति ख्याते पात्रे) । अङ्गारवति त्रि० ।

अङ्गारित पु० अङ्गारमिवाचरतीति अङ्गार+क्विप् ततः कर्त्तरि क्त । पलाशकलिकोद्गमे । अङ्गारं करोतीत्यर्थे णिचि क्त। दग्धप्राये त्रि० ।

अङ्गिका स्त्री० अङ्गम् आच्छादयति अङ्ग+इनि-के स्त्रियां टाप् । आङ्राखा इति प्रसिद्धे कञ्चुकवस्त्रे ।

अङ्गिन् त्रि० अङ्ग+इनि । प्रधाने,अवयवविशिष्टे, देहवति च ।

अङ्गिरस् पु० अङ्ग-असि इरागमः । स्वनामख्याते ऋषिभेदे ब्रह्मणोमुखजाते पुत्रे ।

अङ्गीकार पु०अनङ्गम् अस्वकीयम् अङ्गं क्रियते अङ्ग च्वि-कृ-घञ्। स्वीकारे अभ्युपगमे ।

अङ्गीकृत त्रि० अङ्ग-च्वि-कृ कर्म्मणि क्त । अभ्युपगते स्वीकृते

अङ्गुरि (री) स्त्री० अङ्ग-उलि-रलयोरेकत्व स्मरणात् रत्वम् । आङुल इति प्रसिद्धायाम् हस्तपादशाखायाम् वा ङीप् अङ्गुरीयोरगच्छतेति रघुः ।

अङ्गुरीय न० अङ्गुलौ भवम् अङ्गुलि-छ । वाह्लमूलादित्वात् वा रत्वम् । अङ्गुलिभूषणे आङ्टीति प्रसिद्धे ।

अङ्गुरीयक न० अङ्गुलौ भवम् अङ्गुलि-छ । वाह्लमूलादित्वात्

वा रत्ने स्वार्थे क। अङ्गुलिभूषणे आङुटीति ख्याते।

अङ्गुल पु॰ अङ्ग-उल। हस्तपदशाखायां आंगुल इति ख्यातायाम् वात्स्यायनमुनौ अङ्गुष्ठे च। यवोदरैरङ्गुलमष्टसंख्यैरिति भास्कराचार्य्योक्तेः अष्टयवोदरपरिमाणे तु न॰।

अङ्गुलि (ली) स्त्री॰ अङ्ग-उलि। हस्तपदशाखायाम् आङुल इति ख्यातायाम्। वा ङीषि अङ्गुली च। हातशुण्डा इति ख्याते गजकर्णिकारवृक्षे च।

अङ्गुलितोरण न॰ अङ्गुल्याः तोरणमिव कृतम्। चन्दनादिद्वारा कृते ललाटस्थार्द्धचन्द्राकृतितिलके।

अङ्गुलित्र न॰ अङ्गुलिं त्रायते अङ्गुलि+त्रै-क। चामाटीति प्रसिद्धे ज्याकर्षणकृतखेदवारणार्थम् अङ्गुलिबद्धे चर्म्मणि बद्धगोधाङ्गुलित्र इति भट्टिः।

अङ्गुलित्राण न॰ अङ्गुलिस्त्रायतेऽनेन त्रै-क ६त॰। चामाटीति प्रसिद्धे ज्याकर्षणकृतखेदनिवारणार्थम् अङ्गुलिबद्धे चर्म्मणि।

अङ्गुलिमुद्रा स्त्री॰ अङ्गुल्या मुदं राति अङ्गुलि+मुद् रा-क ६त॰। धारयितुर्नामाक्षरमुद्रासहिते आङुटीति प्रसिद्धे अङ्गुलीभूषणे।

अङ्गुलिमोटन न॰ अङ्गुल्योर्मोटनं मर्दनं यत्र ब॰। अङ्गुलिद्वयमर्दनजाते तुड़ि इति प्रसिद्धे शब्दे।

अङ्गुलिषङ्गा स्त्री॰ अङ्गुलौ सङ्गो यस्याः षत्वम् ब॰। (याउ) इति प्रसिद्धे अङ्गुलिसंश्लेषकारके यवागूद्रव्ये।

अङ्गुलिसन्देश पु॰ अङ्गुल्या अङ्गुलिध्वनिना सन्दिश्यते सं-दिश-घञ्। अङ्गुलिध्वनिद्वारा संज्ञादाने, अङ्गुलिस्फोटनमात्रेऽपि।

अङ्गुलिस्फोटन न॰ अङ्गुल्योः स्फोटनं ताड़नं यत्र ब॰। (तुड़ि) इति प्रसिद्धे अङ्गुलिद्वयमर्दनजाते शब्दे।

अङ्गुलीपञ्चक न॰ अङ्गुलीनां पञ्चकम् पञ्चसंख्या। हस्तस्थानामङ्गुलीनां समुदाये तास्च अङ्गुष्ठ तर्ज्जनीमध्यमानामिका कनिष्ठानामिकाः। [प्रसिद्धे अङ्गुलिभूषणे।

अङ्गुलीयक न॰ अङ्गुरीयकवत् वा रलाभावः। आंगुटीति

अङ्गुलीसम्भूत पु॰ अङ्गुलौ सम्भूतः सम्-भू-क्त ७त॰। नखे। अङ्गुलिसम्भूतमात्रे त्रि॰।

अङ्गुष्ठ पु॰ अङ्गौ पाणौ प्राधान्येन तिष्ठति अङ्गु-स्था-क अम्बाम्बेत्यादिना षत्वम्। वृद्धाङ्गुलौ। अम्बाम्बेति सूत्रेऽङ्गुशब्दप्रयोगात् अङ्गुशब्दोऽपि हस्तवाचीति ज्ञापितम्।

अङ्गुष्ठमात्र त्रि॰ अङ्गुष्ठ+परिमाणार्थे मात्रच्। अङ्गुष्ठमध्यपर्व्वपरिमिते। अङ्गुष्ठमात्रोह्यवरोऽपि दृष्ट इति श्रुतौ।

अङ्गूष पु॰ अङ्ग-ऊष। नकुले वाणे च।

अङ्घस् न॰ अङ्घ-असि। पापे।

अङ्घ्रि पु॰ अघि गतौ इ। चरणे वृक्षमूले च।

अङ्घ्रि पु॰ अघि गतौ क्रि। चरणे वृक्षमूले च।

अङ्घ्रिप पु॰ अङ्घ्रिणा मूलेन पिबति सिक्तजलादिकम् पा-क ३त॰। वृक्षमात्रे।

अङ्घ्रिपर्णिका स्त्री॰ अङ्घ्रौ मूले अङ्घ्रेरारभ्य वा पर्णमस्याः ब॰ जातित्वात् ङीष् ततः स्वार्थे के ह्रस्वे टाप्। सिंहपुच्छाकारपुष्पवति चाकुलिया, इति ख्याते वृक्षे। अङ्घ्रिपर्णीत्यपि नाम।

अङ्घ्रिवल्लिका स्त्री॰ अङ्घ्रेरारभ्य वल्लीव पर्णवत्त्वेन ततः स्वार्थे के ह्रस्वे टाप्। सिंहपुच्छाकारपुष्पवति चाकुलिया, इति प्रसिद्धे वृक्षे। अङ्घ्रिवल्लीत्यपि नाम।

अच अविस्पष्टकथने उभय॰ भ्वादि॰ सक॰ सेट्। अचति ते। आचीत् आचिष्ट।

अच पूजने गतौ च इदित् पर॰ भ्वादि॰ सक॰ सेट्। अञ्चति आञ्चीत् आनञ्च। अञ्च्यात् गतौ तु अच्यात्।

अच अव्यक्तकथने इदित् उभय॰ भ्वादि॰ सक॰ सेट्। अञ्च-ति ते। आञ्चीत् आञ्चिष्ट। [चक्षुर्भिन्ने न॰।

अचक्षुस् त्रि॰ चक्ष-उसि ब॰। मन्दनेत्रे नेत्रहीने च। न॰त॰।

अचण्डी स्त्री॰ चडि कोपने अच् गौरादित्वात् ङीष् न॰ त॰। शान्तस्वभावायां गवि। कोपनभिन्ने त्रि॰।

अचर न॰ न चरति चलति-चर-अच् न॰ त॰। स्थावरे स्थितिशीले पृथिव्यादौ चराणामन्नमचरमिति मनुः। चलनशून्ये त्रि॰।

अचल पु॰ न चलति चल-अच् न॰त॰। पर्व्वते, गौंज इति ख्याते शङ्कौ, शिवे, ब्रह्मणि च। पृथिव्यां स्त्री॰। चलनशून्ये त्रि॰।

अचलत्विष् पु॰ अचला शतधा प्रक्षालनेनापि मालिन्यानपगमात् स्थिरा त्विट् कान्तिर्यस्य ब॰। कोकिले। स्थिरकान्तिमति त्रि॰। कर्म्म॰। स्थिरायां कान्तौ स्त्री॰।

अचिन्त्य न॰ चिन्ति-कर्म्मणि यत् न॰त॰। चिन्तयितुमियत्तया परिच्छेत्तुमशक्ये परब्रह्मणि। चिन्तयितुमशक्ये वस्तुमात्रे त्रि॰। अचिन्त्याः खलु ये भावा इति स्मृतौ।

अचिर न॰ चि-रक् न॰त॰। अल्पकाले। अल्पकालस्थायिनि द्रव्यमात्रे त्रि॰।

अचिरद्युतिः स्त्री॰ अचिरा बहुकालस्थायिनी द्युतिर्यस्याः ब॰। विद्युति। अल्पकालस्थायिद्युतिमति त्रि॰। कर्म्म॰। अल्पकालस्थायिन्यां कान्तौ स्त्री॰।

अचिरप्रभा स्त्री० प्र-भा अङ् अचिरा अचिरस्थायिनी प्रभा यस्याः ब० । विद्युति । च्युता दिवः स्यात्तु रवाचिरप्रभेति भट्टिः । अल्पकालस्थायिप्रभावति त्रि० । कर्म्म० अचिरायां दीप्तौ स्त्री० ।

अचिररोचिस् स्त्री० अचिरं रोचिर्यस्याः ब० । विद्युति । अचिरप्रभावति त्रि० । कर्म्म० । अचिरप्रभायाम् न० ।

अचिरांशु स्त्री० अचिरा अंशवोऽस्याः ब० । विद्युति । अल्पकालस्थायिकिरणवति त्रि० । कर्म्म० । अचिरकिरणे पु० ।

अचिरात् अव्य० अचिरं अततीति क्विप् । शीघ्रे, अविलम्बे च ।

अचिराभा स्त्री० अचिरप्रभावत् । आ-भा-अङ् । विद्युति

अचेतन त्रि० चित-णिच्-युच् चेतना ज्ञानम् ब० । चेतनाशून्ये । चित-ल्यु न०त० । ज्ञानविशिष्टभिन्ने ।

अचेतस् त्रि० चित-असि ब० । विवेकशून्ये, दुष्टचित्ते, चित्तशून्ये च । अव्ययी० । चित्ताभावे अव्य० ।

अचैतन्य त्रि० चेतनस्य भावः चेतन+यक् ब० । चैतन्यरहिते, ज्ञानशून्ये च । न०त० । ज्ञानभिन्ने न० ।

अच्छ अव्य० छो-क न०त० । आभिमुख्ये ।

अच्छ त्रि० न छति दृष्टिम्, न+छो क० । स्वच्छे निर्म्मले च । भल्लूके, स्फटिके च पु० ।

अच्छभल्ल पु० अच्छ-आभिमुख्येन भल्लते गच्छति अच्छ+भल्ल-अच् । भालुके । अत्र भल्ल इत्यपि पृथक् नाम ।

अच्छम् अव्य० न-छो कमुन् । आभिमुख्ये ।

अच्छिद्र त्रि० छिद-रक् ब० । छिद्रशून्ये, अङ्गहानिः छिद्रं तच्छून्ये वैदिककर्म्मणि च ।

अच्छिद्रावधारण न० अच्छिद्रतया साङ्गतयावधारणम् अव धारेर्ल्युट् । कृतस्य वैदिककर्म्मणोऽच्छिद्रतया अवधारणे कृतैतत्कर्म्माच्छिद्रमस्त्वित्यभिलापरूपे ।

अच्छोद त्रि० अच्छम् उदकं यस्य उदकस्योदभावः । निर्म्मलजलवति तडागादौ । तन्नामकप्रसिद्धे सरसि न० ।

अच्युत पु० च्योतते च्युत-क न०त० । विष्णौ । च्युतिशून्ये त्रि०

अच्युताग्रज पु० अच्युतस्य कृष्णस्य अग्रे जायते अग्र+जन-ड ६त० । बलभद्रे ।

अच्युताङ्गज पु० अच्युतस्याङ्गात् जायते अङ्ग+जन-ड । ६त० । कामदेवे । तदङ्गजातमात्रे त्रि० ।

अच्युतात्मज पु० आत्मनोऽङ्गात् जायते जन-ड ६त० । कामदेवे ।

अच्युतावास पु० आ-उष्यते सेव्यतेऽत्र आ-वस-घञ् ६त० । अश्वत्थवृक्षे । अश्वत्थः सर्व्ववृक्षाणामित्युक्तेस्तस्य तद्रूपत्वात्तदावासत्वम् ।

अच्युति स्त्री० च्यु-क्तिन् न०त० । क्षरणाभावे । बहु० । नाशशून्ये त्रि० ।

अज गतौ क्षेपणे च भ्वादि० पर० सक० सेट् । अजति । अवैषीत् आजीत् । अजिता वेता ।

अज दीप्तौ इदित् चुरादि० उभय० सेट् अक० । अञ्जयति ते । आञ्जिजत् त ।

अज पु० न जायते जन-ड न०त० । ब्रह्मणि, विष्णौ, हरे, जीवात्मनि ईश्वरे, छागे, मेषराशौ, सूर्य्यवंशीयराजभेदे दशरथपितरि, अजात् विष्णोर्जाते कामदेवे च । जन्मरहिते त्रि० । जगत्कारणे सत्त्वरजस्तमोगुणात्मके प्रधाने अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानामिति श्रुतेः । छाग्याञ्च स्त्री० ।

अजकर्ण पु० अजस्य कर्ण इव कर्णो यस्य ब० । छागतुल्य लम्बायमानपत्रयुक्ते पियासाल, इति ख्याते छागकर्णे, वृक्षे मरिचपत्रे च ।

अजकर्णक पु० अजकर्णइव कायति पत्रद्वारा प्रकाशते कै-क । पियासाल इति ख्याते वृक्षे ।

अजकव अस्त्री० अजो विष्णुः को ब्रह्मा च वाति शरत्वेनात्र वा+अधिकरणे क ६त० । शिवधनुषि । वावुइ इति ख्याते वर्वरीवृक्षे पु० ।

अजकाव अस्त्री० अजकौ विष्णुब्रह्माणौ अवतीति अण् उप०स० । शिवधनुषि ।

अजक्षीर न० अजायाः क्षीरं पुंवद्भावः । छागदुग्धे ।

अजग पु० अजं छागं यज्ञाङ्गत्वेन गच्छति गम-ड ६त० । विष्णौ । अजेन गन्तरि वह्नौ च ।

अजगन्धा स्त्री० अजस्य गन्धइव गन्धोऽस्याः । जोयानीति ख्यातायां वनयमान्याम् ।

अजगन्धिका स्त्री० अजस्य गन्ध इव गन्धो यस्याः ब० ततः स्वार्थे के टाप् । वावुइ इति प्रसिद्धे वर्वरीशाके ।

अजगन्धिनी स्त्री० अजस्य मेषस्य गन्धो लेशः एकदेशः शृङ्गमिति यावत् तद्यस्याः फलाकारेणास्तीति अजगन्ध+इनि ङीप् । गाडरशिङ्गा इति प्रसिद्धे अजशृङ्गीवृक्षे ।

अजगर पु० अजं छागं गिरति गिलति गॄ अच् । वृहत्सर्पे ।

अजगव पु० अजगो विष्णुः शरत्वेन त्रिपुरासुरवधकालेऽस्यास्ति अजग+व । शिवधनुषि । [धनुषि ।

अजगाव पु० अजगं विष्णुमवति अव-अण् उप०स० । शिव-

अजघन्य त्रि० न जघन्य (अधम) न०त० । अधमभिन्ने श्रेष्ठे च ।

अजजीविक त्रि० जीव्यतेऽनया जीवयतीति वा जीव-

वुण्-ण्वुल् वा अजएव क्रयविक्रयादिभ्यां पालनादिना वा जीविका जीवनोपायोऽस्य ब०। छागक्रयविक्रयादिना जीविकावति।

अजटा स्त्री० नास्ति जटा शिफा यस्याः ब०। (भुंइआमला) इति प्रसिद्धे शिफारहिते वृक्षभेदे।

अजडा स्त्री० अजडयति स्पर्शमात्रादङ्गमर्द्दनार्थं चालयति न+जड-णिच् ततः अच्। आलकुशीति प्रसिद्धे वृक्षभेदे।

अजथ्या स्त्री० अजानां समूहः। अज+थ्यन् स्त्रीत्वात् टाप्। अजसमूहे। तद्घ्राणावर्णत्वात् स्वर्णयूथिकायाञ्च।

अजदण्डी स्त्री० अजस्य ब्रह्मणोदण्डोऽस्याः ब० गौरा० ङीष्। ब्रह्मदण्डीवृक्षे ब्रह्मणो यज्ञार्थदण्डस्य तदीयकाष्ठेन करणात्तथात्वम्।

अजननि स्त्री० न+जन-आक्रोशे अनि। आक्रुश्यमाने जन्माभावे। अर्थाभावे अव्ययी०। जनन्या अभावे अव्य०।

अजन्य स्त्री० लौकिकहेतुभिर्न जन्यते न+जन-णिच्-यत्। शुभाशुभसूचके दैवकृते भूकम्पादावुत्पाते। जन्यभिन्ने त्रि०

अजप पु० असत्ं जपति निन्दार्थे नञ्, जप्-अच्। कुपाठके। अजं पाति रक्षति अज+पा-क। छागपालके त्रि०।

अजपा स्त्री० प्रयत्नेन जपितुमशक्या अयत्नोच्चारिता जप-अच्। श्वासप्रश्वासयोः वहिर्गमनागमनाभ्याम् अक्षरनिष्पादनरूपे जपे, हंसः, सोऽहमिति वा मन्त्रभेदे च। जपशून्ये त्रि०।

अजपात् (द) पु० अजस्य पाद इव पादोऽस्य वा अन्त्याकार लोपः। रुद्रभेदे तद्देवताकत्वात् पूर्व्वभाद्रपदनक्षत्रे च।

अजभक्ष पु० अजैर्भक्ष्यतेऽसौ भक्ष घञ् ६त०। वावुइ इति प्रसिद्धे वर्वरीवृक्षे तत्पत्रमजैरतिप्रीतितो भक्ष्यते।

अजमीढ पु० अजो मीढ़ः यज्ञे सिक्तः यत्र ब०। आजमीर इति प्रसिद्धे देशे। तद्देशाधिपे राजनि अस्त्रि। आजमीढ़ः युधिष्ठिरे।

अजमोदा स्त्री० अजस्य मोद इव मोदो गन्धो यस्याः अजं मोदयति वा। मुद-घञ् ६त०। मोदि-अन् वा। उग्रगन्धवत्यां वनयमान्याम् यमानीमात्रे च।

अजम्भ पु० नास्ति जम्भो दन्तोऽस्य ब०। भेके तस्य दन्ताभावात्। दन्तशून्ये त्रि०।

अजय पु० जि-अच् न०त०। वीरभूमिनगरसन्निधाने अजय इति नामके नदविशेषे च। अजेन छागेन यातियाक ३त०। छागवाहने अग्नौ पु०। अजेये जयशून्ये त्रि०। अव्य० जयाभावे। नास्ति जयो मादकत्वेनास्याम् सिद्धि, भाङ्, इति च प्रसिद्धनामिकायाम् विजयायाम् स्त्री०।

अजय्यं स्त्री० जि-शक्यार्थे यत्। जेतुमशक्ये दुर्जये शत्रौ।

अजरा स्त्री० जॄ-अङ् न०ब०। (घृतकुमारी) इति प्रसिद्धे वृक्षे तस्य जराभावात्। जराशून्ये त्रि०। जराभावे अजरसम् अव्य०।

अजर्य्य न० न जीर्य्यति जॄ-यत् न०त०। सौहार्दे।

अजलोमन् पु० अजस्य लोमेव लोम (मञ्जरी) यस्य उपमान ब०। (शूकशिम्बी) इति ख्याते अजलोमवन्मञ्जरीविशिष्टे वृक्षभेदे।

अजवीथी स्त्री० अजेन ब्रह्मणा निर्म्मिता वीथी पदं ३त०। गगनसेतुरूपे (यमनाला) इति ख्याते, छायापथे। याम्यारभ्य अगस्त्यस्थानपर्य्यन्तं पितृयानपथः।

अजशृङ्गी स्त्री० अजस्य मेषस्य शृङ्गमिव फलमस्याः ब०। (गाड़लशिङ्गा) प्रति प्रसिद्धे मेषशृङ्गतुल्यफलवति वृक्षे।

अजस्र न०। न-जस र। सन्तते विच्छेदरहिते। तथाभूतकालस्थायिनि वस्तुमात्रे त्रि०।

अजहत्स्वार्था स्त्री० न जहत् स्वार्थोयाम् न+हा-शतृ २ब०। स्वार्थापरित्यागेन परार्थविबोधिकायां लक्षणायाम्। यथा श्वेतो धावतीत्यादौ श्वेतगुणापरित्यागेन तद्वति लक्षणा।

अजहल्लिङ्ग पु० न जहत् लिङ्गं यम् हा-शतृ २ब०। नियतलिङ्गके विशेष्यस्यान्यलिङ्गकत्वेऽपि स्वलिङ्गात्यागेन विशेषणे शब्दे। तथा चान्यत्र विशेषणस्य विशेष्यानुसारिलिङ्गत्वनियमेऽपि अस्य न तथा नियमः। यथा वेदः श्रुतिर्वा प्रमाणम्।

अजहा स्त्री० न जहाति शूकान्। न+हा-श। आल् कुशीति ख्याते वृक्षे।

अजागर पु० जागृ-णिच्-अच् न जागरो यस्मात् ५ब०। सेवनेन निद्राराहित्यकारके यदपेक्षयाऽन्यस्मिन् जागरणकर्त्तृत्वं नास्ति तादृशे (भीमराज) इति ख्याते भृङ्गराजे। भृङ्गराजः सुजागर इति रभसवाक्यात् तस्यात्यन्तनिद्राराहित्यकारित्वम्।

अजाजी स्त्री० अजेन छागेन आजोविक्षेपो गन्धोत्कटत्वात् त्यागो यस्याः अज-घञ् वीभावाभावः ब०। सर्व्वभक्षेणापि छागेन गन्धोत्कटतया त्यज्यमाने, जीरा इति प्रसिद्धे जीरके वृक्षे।

अजाजीव पु० अजैस्तद्दुग्धपोषणादिना तत्क्रयविक्रयादिना वा आजीवति। आ-जीव-अच् ३त०। छागमात्रके तत्क्रयविक्रयाभ्यामाजीविनि च।

अजातककुद् पु० न जातं ककुदंस्कूटं यस्य जन-क्त ब० ककुदशब्दस्यान्त्याकारलोपः। अपूर्णककुद्वति अल्पवयस्के गवादिवत्से।

अजातशत्रु पु० जातस्य जन्तुमात्रस्य न शत्रुः अश्राद्धभोजीत्यादिवत् नञोऽव्यवहितेन शत्रुशब्देनान्वयात् असमर्थसमासः। युधिष्ठिरे राजनि। एवमजातारिरपि तत्रैव।

अजाति स्त्री०जन-क्तिन् न०त०। अनुत्पत्तौ।ब०। जातिशून्ये जात्यादौ जन्मशून्ये च नित्ये त्रि०।

अजादनी स्त्री० अजैरद्यमानाद्यतेऽसौ अन्यस्य दुःस्पर्शत्वेनाजैरेवाद्यते इति वा अद्-कर्म्मणि ल्युट् ङीप्। दुरालभा इति विचिति इति च प्रसिद्धे स्पर्शेन दुःखदायके वृक्षभेदे।

अजानि पु० नास्ति जाया यस्य ब० जायाया निङादेशः। जायारहिते।

अजानेय पु० अजेऽपि विक्षेपेऽपि आनेयो यथास्थानं प्रापणीयो आरोही येन अज-विक्षेपे अप् वीभावाभावः आ-नी-कर्म्मणि यत् ततः ब०। वक्षस्यस्त्रप्रहारेऽपि निर्भयेन यथास्थानमारोहिणः प्रापके अश्वे, उत्तमाश्वे च।

अजप्रिया स्त्री०अजानां प्रिया। कुल इति ख्याते वदरीवृक्षे।

अजि पु० अज-इ। तेजसि। गतिमति त्रि०। तेन पदाजिः।

अजिन न० अज-इनन् वीभावाभावः। चर्म्मणि।

अजिनपत्रा (त्री) (त्रिका) स्त्री० अजिनं चर्म्मेव सुश्लिष्टं पत्रं पक्षो यस्याः ब०। चार्म्मचिका इति प्रसिद्धे पक्षिभेदे (त्री) इत्यत्र गौरादित्वात् ङीष्। ततः स्वार्थे के ह्रस्वे टापि-पत्रिका इत्यपि।

अजिनफला स्त्री० अजिनं (चर्म्मविकारत्वात् भस्त्रा) इव फलं यस्याः अजिनपूर्व्वकत्वेन जातिलक्षणं ङीषं बाधित्वा टाप्। टेपारी इति प्रसिद्धे भस्त्राकारफले वृक्षभेदे।

अजिनयोनि स्त्री० अजिनस्य चर्म्मणः योनिः कारणं ६त०। हरिणमात्रे। [चत्वरे।

अजिर न० अज-किरन् वीभावाभावः। उठानइति ख्याते

अजिह्म त्रि० हा-मन् द्वित्वालोपौ ततः न०त०। सरले

अजिह्मग पु० अजिह्मं सरलं गच्छति गम-ड। वाणे। सरलगामिनि त्रि०।

अजिह्व पु०जि वन् डुक् च जिह्वा रसना सा नास्ति यस्य ब०। भेके। जिह्वाशून्ये त्रि०।

अजीर्ण न० जॄ-भावे क्त न०त०। जठरानलमान्द्येन भुक्तान्नादेरपाके, रोगभेदे च। कर्त्तरि क्ते जीर्णभिन्ने त्रि०।

अजीव त्रि० जीव-भावे घञ् ब०। जीवनरहिते मृते शवे च।

अजीवनि स्त्री० न जीव्यात् न+जीव-आक्रोशे अनि। अभिशापविषये जीवनाभावे।

अजेय त्रि० जेतुमशक्ये न+जि-यत्। जयायोग्ये।

अजैकपाद्(द) पु० अजस्य छागस्य एकः पाद इव पादो यस्य उपमा०ब० वा पादस्यान्त्याकारलोपः। रुद्रविशेषे, तद्देवताके पूर्व्वभाद्रपदनक्षत्रे च।

अज्झूका स्त्री०अर्जयति या सा अर्जि-उक रकारस्य जत्वम्। नाट्ये नटकर्म्म तद्विषयकथने वेश्यायाम्।

अज्झटा स्त्री० अचति दोषं नाशयति अच-क्विप् झटति संहन्यते झट्-अच् ततः कर्म्म०। (भुंइ आमला) इति प्रसिद्धे वृक्षे।

अज्ञ त्रि० न जानाति न+ज्ञा-क। ज्ञानशून्ये,मूर्खे, अल्पज्ञे च

अज्ञान न० ज्ञा-भावे ल्युट् न०त०। ज्ञानविरोधिनि ज्ञाननाश्ये (अविद्या) इति वेदान्तप्रसिद्धे जगत्कारणे, ज्ञानाभावे च। ब०। ज्ञानशून्ये त्रि०।

अञ्चति पु० अन्च-अति। वायौ।

अञ्चल पु० अन्च-अलच्। प्रान्तभागे वस्त्रप्रान्ते च।

अञ्चित त्रि० अन्च-क्त। पूजिते, आकुञ्चिते च। अञ्चितसव्यपादमिति भट्टिः।

अञ्चितभ्रु स्त्री० अञ्चिता पूजिता वक्रीकृता वा भ्रूर्यया। सुन्दरयोषिति वक्रीकृतभ्रुवि च स्त्रियाम्। कर्म्म० (भ्रू) तथाभूतभ्रूलतायाम् स्त्री०।

अञ्ज (न्ज) मिश्रणे गतौ व्यक्तीकरणे च रुधादि० पर० सक० वेट्। अनक्ति। आञ्जीत्। अञ्जिता अङ्क्ता। वि-व्यक्तीकरणे व्यनक्ति कालवित्तयेऽपि योग्यतामिति माघः।

अञ्जन न० अज्यतेऽनेन करणे ल्युट्। कज्जले। भावे ल्युट्। मिश्रीकरणे, गमने,मालिन्ये, व्यक्तीकरणे च। कर्त्तरि ल्यु। उत्तरदिग्गोहस्तिन्यां हनुमतो-मातरि च स्त्री०। णिचि युच्। शक्तिलक्षणाभिन्ने शक्यलक्ष्यान्यार्थबोधके शब्दव्यापारे,स्त्री०। अन्यार्थवीकृत्व्याप्तिरञ्जनेति काव्यप्रकाशः।

अञ्जनकेशी स्त्री० अञ्जनमिव केशो यस्याः ५त०। केशसंस्कारके हट्टविलासिनीनामके गन्धद्रव्ये। यत्संयोगात् केशस्य कृष्णता स्यात्।

अञ्जनाधिका स्त्री० अञ्जनादधिका कृष्णत्वात् ५त०। (आजनाइ) इति ख्याते कीटभेदे।

अञ्जनावती स्त्री० अञ्जनं विद्यतेऽस्याः अधिककृष्णवर्णत्वात् अञ्जन+मतुप् वत्वं दीर्घश्च। ऐशानकोणस्य हस्तिन्याम्।

अञ्जनिका स्त्री० अञ्जना स्वार्थे के टाप् कापि पूर्व्वाकारस्य

इत्वम्। (आजनाद) इति प्रसिद्धे अञ्जनाख्ये कीटभेदे।

अञ्जनी स्त्री॰ अज्यते चन्दनकुङ्कुमादिभिरसौ अनज-कर्मणि ल्युट् ङीप्। कुङ्कुमाद्यनुलिप्तायाम् स्त्रियाम्। करणे ल्युटि कटुकावृक्षे, कालाञ्जनवृक्षे च।

अञ्जलि पु॰ अनज-अलि। संयुतकरपुटे, कुडवपरिमाणे च।

अञ्जलिका स्त्री॰ अञ्जलिरिव कायति प्रकाशते अञ्जलि+कै-टाप्। बालमूषिकायाम्।

अञ्जलिकारिका स्त्री॰ अञ्जलेः कारिका करणं कृ-धात्वर्थनिर्द्देशे ण्वुल्। कृञ्जलिकरणे अञ्जलेरिवकारिका स्पर्शमात्रेण पत्रपुटस्य संपुटीकरणात् कृ-ण्वुल् इत॰। लजालु इति ख्यातायाम् लज्जाशीललतायाम् सा हि स्पर्शमात्रात् सङ्कोचेन पत्रपुटं संपुटं कुर्व्वती अञ्जलिमिव करोति। अञ्जलेः कारः करणं नित्ययोगेन अस्त्यस्याः। कृ-भावे घञ् इत॰ ततः नित्ययोगे मत्वर्थीयः ठन् ठस्येकः टाप्। प्रतिमायां तस्या हि यत् निर्म्माणसमये अञ्जलिकरणं तत् नित्ययोगेन तिष्ठति। अञ्जलि+कृ-कर्त्तरि ण्वुल्। विनयेनाञ्जलिकारके त्रि॰।

अञ्जस त्रि॰ अनज-असच्। सरले।

अञ्जसा अव्य॰ अनज-भावे अच् अञ्जं गतिं विलम्बं वा स्यति सो-क्विप्। विलम्बाभावे शैघ्ये याथार्थ्ये च।

अट गतौ भ्वादि॰ सक॰ पर॰ सेट्। अटति आटीत्।

अटनि (नी) द्वि॰ अटति मौर्व्वीम् अट-अनि वा ङीष्। धनुरग्रे गुणारोपणस्थाने।

अटरूष पु॰ अटति भ्रमति अट-अच् तं रोषति हिनस्ति रुष-क अटद्भिर्वा रुष्यते न युज्यते रुष-क। (वासक) इति ख्याते वृक्षे। [ङीषि दीर्घता। वने।

अटवि (वी) स्त्री॰ अटन्ति चरमे वयसि यत्र अट-अवि वा

अटाट्या स्त्री॰ अट-यङ्-भावे अ. स्त्रीत्वात् टाप्। परिभ्रमणे वृथागमने च।

अट्ट अतिक्रमे वधे च भ्वादि॰ आत्म॰ सक॰ सेट्। अट्टते। आट्टिष्ट। [आट्टिटत् त।

अट्ट अनादरे चुरादि॰ उभय॰ सक॰ सेट्। अट्टयति ते।

अट्ट पु॰ अट्टयति अनाद्रियतेऽन्यद्यत्र अट्ट-चु॰ घञ्। प्रासादस्योपरिगृहे, प्राचीरोपरिस्थसैन्यगृहे, तत्र स्थिता हि नरा अन्यान् हीनतया नाद्रियन्ते, अतिशये च। तस्मिन् सति च अन्योत्कर्षेऽनादरः।

अट्टट्ट अव्य॰ अट्टप्रकारः अट्टस्य गुणवाचितया प्रकारे द्वित्वम् शकन्ध्वादि॰ पररूपम्। अत्युत्कटे हासे।

अट्टहास पु॰ अट्टेनातिशयेन हासः हस-घञ् ३त॰। उच्चहासे।

अट्टहासक पु॰ अट्टहास इव कायते कै-क। अट्टहासेन दन्तानां बहिर्निर्गमादतिशुभ्रत्वं तद्वत् शुभ्रे कुन्दवृक्षे।

अट्टालक पु॰ अट्ट इव प्रासादोपरिगृहमिव अलति पर्य्याप्तो भवति अल-ण्वुल्। प्रासादोपरिस्थे इष्टकादिगृहे।

अट्टालिका स्त्री॰अट्टाल+स्वार्थे क। इष्टकादिनिर्मिते राजगृहे

अठ गतौ भ्वादि॰ पर॰ सक॰ सेट्। अठति। आठीत्।

अठि गतौ इदित् आत्म॰ भ्वादि॰ सक॰ सेट्। अण्ठते।

अड उद्यमे भ्वादि॰ पर॰ अक॰ सेट्। अडति। आडीत्।

अड व्याप्तौ स्वादि॰ पर॰ सक॰ सेट् वेदएवास्य प्रयोगः। अड्णोति। आडीत्। [अड्डति। आड्डीत्।

अड्ड अभियोगे समाधाने च भ्वादि॰ पर॰ सक॰ सेट्।

अण शब्दे भ्वादि॰ पर॰ अक॰ सेट्। अणति। आणीत्।

अण जीवने दिवा॰ आत्मने॰ अक॰ सेट्। अण्यते आणिष्ट।

अण(न)**क** त्रि॰अणति यथेच्छम् नदति अण-अच् ततः कुत्सायाम् क। अधमे, निन्दिते च। दन्त्यमध्यश्चायम्।

अणव्य त्रि॰ अण-उन् अणुस्तस्य सूक्ष्मशस्यस्य भवनं चेत्रम् अणु+यत्। सर्षपादिसस्योत्पत्तियोग्ये (सुनाभूमि) ख्याते चेत्रे

अणि पु॰स्त्री॰अणति शब्दायते अण-इन्। आरा इति ख्याते रथचक्राग्रस्थिते कीलके सूच्याद्यग्रभागे च। स्त्रीत्वे वा ङीष्। अत्वादेर्दीर्घतापीष्यते। तेन आणिः आणी।

अणिमन् पु॰ अणोर्भावः अणु+इमनिच्। सूक्ष्मत्वे सूक्ष्मपरिमाणे, ऐश्वर्य्यभेदे च यद्वशात् सूक्ष्मीभूय सर्व्वत्र गन्तुं शक्नोति! ऐश्वर्य्याणि च। अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वञ्च तथा कामावसायिता इत्युक्तानि। एतेषां स्वरूपाणि ऐश्वर्य्यपदार्थनिरूपणे वक्ष्यन्ते।

अणीयस् त्रि॰ अणु+ईयसु। अतिसूक्ष्मे अणोरणीयान् महतो महीयानिति श्रुतिः। स्त्रियाम् (सी)।

अणु त्रि॰अण-उन्। क्षुद्रे, सूक्ष्मपरिमाणवति,द्रव्ये,लेशे च। स्त्रियाम् अण्वी च। (चिना, काङ्नी, श्यामा) प्रभृति सूक्ष्मधान्ये पु॰।

अणुक त्रि॰ अणु+निपुणार्थे क। निपुणे। स्वार्थे क। सूक्ष्मे अल्पे क। क्षुद्रे।

अणुभा स्त्री॰ अण्वी सूक्ष्मा भा दीप्तिर्यस्याः ब॰। विद्युति।

अण्ड न॰ अमन्ति संप्रयोगं यान्ति अनेन अम-ड टवर्गादित्वेऽपि डस्य नेत्वम्। पुंसोऽङ्गावयवे,पक्षिडिम्बे, वीर्य्ये च।

अण्डज पु॰ अण्डात् डिम्बात् जायते जन-ड। अण्डजाते

पक्षिणि, सर्पे, मत्स्ये, कांकलास इति ख्याते कृकलासे च। अण्डजातमात्रे त्रि०। मृगनाभिकस्तूर्य्यान्तु स्त्री०।

अण्डालु पु० अण्ड+आलु। डिम्बविशिष्टे मत्स्ये।

अण्डीर पु० अण्डः पुमवयवभेदः अस्यास्तीति अण्ड-ईरन्। पुरुषे, समर्थे च।

अत बन्धने इदित् भ्वादि० पर० सक० सेट्। अन्तति। आन्तीत्

अत बन्धने भ्वादि० पर० सक० सेट्। अतति। आतीत्।

अत प्रापणे, सातत्ये, गतौ च भ्वादि० पर० सक० सेट्। अतति। आतीत्। क्ते अतितः।

अतट पु० तद्यते आहन्यतेऽम्भसा इति तटं जलाघातस्थानं तन्नास्ति यस्य ब०। आड़रीति प्रसिद्धे आलम्बनस्थानशून्ये, पर्व्वताद्युच्चस्थाने, भूमेरधोभागे च।

अतल न० अस्य भूखण्डस्य तलं पृषोदरात् इदमोऽत्वम्। सप्तपातालमध्ये प्रथमखण्डे, भूमेरधोभागे। तलशून्ये त्रि०।

अतलस्पर्श त्रि० न तलस्याधोभागस्य स्पर्शो यत्र ब०। अतिगभीरे।

अतस पु० अत-गतौ असच्। वाते। सातत्यार्थात् अत-असच्। आत्मनि। गौरादित्वात् ङीषि। तिसि, मसिना इति ख्याते अतसीवृक्षे। तत्सूत्रजाते क्षौमवस्त्रे न०।

अति अव्य० अत-इ। पूजायाम्, उत्कर्षे, अतिक्रमणे, अतिशये च।

अतिकथ त्रि० अतिक्रान्तः कथाम्। कथनायोग्ये, अश्रद्धेये, नष्टे च। [मके वृक्षे।

अतिकन्दक पु० अतिरिक्तः कन्दः यस्य ब०। हस्तिकन्दना-

अतिकेशर पु० अतिरिक्तानि केशराण्यस्य ब०। कुब्जकवृक्षे।

अतिक्रम पु० अति-क्रम-घञ् ह्रस्वः। उल्लङ्घने। अतिक्रान्तः क्रममिति प्रादि स०। क्रमोल्लङ्घने त्रि०।

अतिगण्ड पु० परिभाषया विष्कुम्भावधि षष्ठे योगे।

अतिगन्ध पु० अतिशयितो गन्धो यस्य ब०। चम्पकवृक्षे। अतिशयितगन्धवति त्रि०।

अतिचरा स्त्री० अतिक्रम्य चरति दुर्गभूमिजातत्वात् दुःप्रापत्वाच्च अति+चर-अच्। पद्मचारिणीवृक्षे उत्तरदेशभवे, तत्पर्य्याये पद्माभेतिशब्ददर्शनात् स्थलपद्मिन्यामिति केचित्

अतिचार पु० अतिशयेन चारः अतिक्रम्य वा चारः अति+चर-घञ्। अतिशयितगमने, ज्योतिःशास्त्रप्रसिद्धे मङ्गलादिग्रहपञ्चकस्य सूर्य्यसंपर्कविशेषात्तत्तेजोऽसहिष्णुतया वक्रशीघ्रादिगत्या स्वस्वभोग्यकालमुल्लङ्घ्य राश्यन्तरगमने, अस्य विशेषस्तु वृहदभिधाने दर्शयिष्यते।

अतिचारिन् पु० अति+चर-णिनि। पूर्व्वोक्तातिचारवति ग्रहे। अतिक्रम्य अतिशयेन वा गन्तृमात्रे त्रि०।

अतिच्छत्र पु० अतिक्रान्तश्छत्रम् प्रादि० स०। छातिया इति प्रसिद्धे स्थलतृणविशेषे, तालमाखना इति प्रसिद्धे जलतृणभेदे च। स्वार्थे क। अत्र अतिच्छत्रकोऽपीति नाम। छत्राकारपत्रपुष्पवति सुल्फा इति प्रसिद्धे शाकभेदे स्त्री०। चौरस्वामिमते छत्रा इत्येव नाम। छत्रातिक्रमकारिणि त्रि०। अतिक्रमेऽव्ययी०। छत्रातिक्रमे अव्य०।

अतिजगती (ति) स्त्री० अतिक्रान्ता जगती द्वादशाक्षरपादां वृत्तिं प्रा०स०। त्रयोदशाक्षरपादके छन्दोभेदे। जगतीं भुवनमतिक्रान्तवति त्रि०। तत्र पुंसि क्लीवे च (अतिजगति)।

अतिजव त्रि० अतिशयितो जवोयस्य ब०। अतिवेगवति। द्रुतगामिनि च।

अतिजागर पु० अतिशयितो जागरो निद्राराहित्यं यस्य ब०। नीलवके पक्षिणि तस्य सर्व्वदा जागरूकत्वात्। निद्राराहित्यवति त्रि०। [पक्षिणाम् अतिदीर्घगमने।

अतिडीन न० अतिक्रान्तं डीनं पक्षिगतिभेदं प्रा० स०।

अतितराम् अव्य० अति+तर-ततः आम्। अत्यन्तातिशये।

अतितीक्ष्ण त्रि० अतिशयेन तीक्ष्णः कटुरसो यस्य ब०। मरीचादौ। सजना इति प्रसिद्धे शोभाञ्जने पु०।

अतितीव्रा स्त्री० अतिशयेन तीव्रा पाकादौ दुर्ज्जरत्वात् प्रा०स०। ग्रन्थिमत्यां गाँटदूर्व्वा इति ख्यातायां दूर्व्वायाम्। अतितीव्रगुणके त्रि०।

अतिथि पु० अतति गच्छति न तिष्ठति अत-इथिन्। अध्वयोगेन आगन्तुके गृहागते, विषये च तस्य इन्द्रियेषु संसर्गमात्रकाले एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुमीयते।

अतिथिसपर्य्या स्त्री० अतिथीनां सपर्य्या पूजनम् सपरधातुः कण्ड्वादिः तेन यक् ततो अङ्। प्रत्यहं गृहस्थस्य कर्त्तव्यपञ्चयज्ञमध्ये मनुष्ययज्ञेऽतिथिपूजनादौ।

अतिदिष्ट त्रि० अति-दिश-क्त। अतिदेशस्य कर्म्मणि। यथा प्रकृतिवत् विकृतिः कर्त्तव्येति वाक्येन प्रकृतिभूतदर्शयागादेरङ्गकार्य्याणि प्रयाजादीनि विकृतौ पश्वादियागेऽतिदेश्यन्ते। अतिदेशोनाम इतरधर्म्मस्य इतरस्मिन् प्रयोगाय प्राप्तिः इति मीमांसायां स्थितम्। करणव्युत्पत्त्या तदुपदेशवाक्यमपि तथा।

अतिदीप्य पु० अतिशयेन दीप्यते अति-दीप-कर्त्तरि यत्। रक्तचित्रके लालचिता इति ख्याते वृक्षे।

अतिदेश पु० अति-दिश-घञ् । अतिदिष्टशब्दार्थे व्याख्यात रूपेऽर्थे । अतिदिश्यतेऽनेनेति करणे घञि तत्प्रतिपादक-वाक्येऽपि ।

अतिधन्वन् पु० अतिरिक्तं धनुर्यस्य ब० धनुषोऽनङ् । उत्कृष्ट-धनुर्युक्ते योधे । मरुस्थलातिक्रमकारिणि त्रि० ।

अतिधृति स्त्री० अतिक्रान्ता धृतिम् अष्टादशाक्षरपादिकां वृत्तिं प्रा० स० । ऊनविंशत्यक्षरपादके छन्दोभेदे । धृतिर्धैर्य्यं सन्तोषो वा तदतिक्रमकारिणि त्रि० ।

अतिनु (नौ) त्रि० अतिक्रान्तोनावम् प्रा०स० क्लीवे ह्रस्वः । नौकातिक्रमकारिणि । पुंसि स्त्रियां च अतिनौ ।

अतिपतन न० अति-पत-ल्युट् । अतिक्रमे, अत्यये च । पातातिक्रान्तरि त्रि० ।

अतिपत्ति स्त्री० अति-पद क्तिन् । अनिष्पत्तौ, अतिक्रमे च । पत्तिं सेनामतिक्रान्ते त्रि० ।

अतिपन्न त्रि० अति+पद क्त । अतिक्रान्ते ।

अतिपथिन् पु० अतिशयितः सुन्दरः पन्थाः प्रा०स० अतेः पूजार्थत्वात् न समासान्तः । सत्पथे ।

अतिपातक न० अतिक्रान्तोऽत्यन्तदुष्टत्वेनान्यत् पातकं प्रा० स० । पुंसां मातृस्नुषादुहितृगमनजन्ये स्त्रीणाञ्च पुत्रपितृ-श्वशुरगमनजन्ये पातकविशेषे । पातकमतिक्रान्तवति पुण्यशीले त्रि० । [प्रातःकाले ।

अतिप्रगे अव्य० अति प्रगीयतेऽस्मिन् काले गै-के । अत्यन्त

अतिप्रश्न पु० अति+प्रच्छ नङ् । निरुत्तरप्रश्ने ।

अतिप्रसक्ति स्त्री० अति-प्र-सनृज-क्तिन् । अत्यन्तासक्तौ, प्रसङ्गमतिक्रम्यान्यत्र संबन्धे अतिप्रसङ्गे च । लक्ष्ये लक्षण-संबन्धः प्रसङ्गः अलक्ष्ये तत्सम्बन्धोऽतिप्रसङ्गः । प्रस-ङ्गमतिक्रान्तवति त्रि० ।

अतिप्रसङ्ग पु० अति-प्र-सनृज घञ् । अतिप्रसक्तिवदर्थे ।

अतिबल त्रि० अतिशयितं बलं यस्य ब० । अतिशयितबल-वति । अतिशयितं बलं यस्याः ५ब० । अत्यन्तबलाधायि-कायां पीतवर्णायां बेड़ियाला इति ख्यातायां लतायां, विश्वामित्रेण कृशाश्वमुनितः शिक्षिते रामाय दत्ते अस्त्र-विद्याभेदे च स्त्री० । अतिशयितं बलम् प्रा०स० । अत्यन्ते बले, सामर्थ्ये, सैन्ये च न० ।

अतिभूमि स्त्री० अतिशयिता भूमिर्मर्य्यादा प्रा० स० । अति-मर्य्यादायाम्, आधिक्ये च । अतिक्रमेऽव्ययी० । मर्य्या-दातिक्रमेऽव्य० । भूमिं भुवं मर्य्यादां वाऽतिक्रान्तवति त्रि० ।

अतिमङ्गल्य पु० अतिमङ्गलाय हितम् अतिमङ्गल+यत् । विल्ववृक्षे । अतिमङ्गल्याढ्ये अतिमङ्गलयुक्ते च त्रि० ।

अतिमर्य्याद अव्य० । अतिक्रमे अव्ययी० । मर्य्यादातिक्रमे । प्रा०स० । मर्य्यादामतिक्रान्तवति त्रि० ।

अतिमात्र त्रि० अतिक्रान्तो मात्रामत्यं प्रा०स० । अति-शयिते, मात्रातिक्रमकर्त्तरि च ।

अतिमुक्त त्रि० अतिशयेन मुक्तः विदेहकैवल्यं गतः अति मुच-कर्त्तरि क्त । निर्व्वाणमुक्तिमति । अतिक्रान्ता मुक्तां शौभ्रात् प्रा०स० । माधवीलतायां पु० ।

अतिमुक्तक त्रि० अतिमुक्त-स्वार्थे क । निर्व्वाणमुक्तिमति । अतिशयितमुक्ते च । अतिशयेन मुक्तं विस्तारोऽस्य मुच-भावे क्त ब० । कप् । अतिविस्तृते तिन्दुकवृक्षे पु० ।

अतिमोदा स्त्री० अतिशयितो मोदो यस्याः ब० । नवमल्लि-कायाम् । अत्यन्तमोदवति त्रि० ।

अतिरथ पु० अतिक्रान्तो रथं रथिनम् प्रा० स० । योध विशेषे "अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु स" इत्युक्तलक्षणे । रथातिक्रमकारके त्रि० ।

अतिरसा स्त्री० अतिशयितो रसो यस्याः ब० । रास्ना इति ख्यातायां मूर्व्वालतायाम् । [यज्ञविशेषे ।

अतिरात्र पु० अतिक्रान्तोरात्रिम् प्रा०स० अच्-समासान्तः ।

अतिरिक्त त्रि० अति-रिच-क्त । अतिशयिते, श्रेष्ठे, भिन्ने, शून्ये च । भावे क्त । अतिशये आधिक्ये न० ।

अतिरूक्ष त्रि० अतिशयितः रूक्षः प्रा० स० । अत्यन्तरूक्षे स्नेहशून्ये । तथाभूते कङ्कोद्रादिधान्ये पु० । अति-क्रान्तोरूक्षम् । अतिशयस्निग्धे त्रि० । [आधिक्ये च ।

अतिरेक पु० अति-रिच् घञ् । अतिशये, भेदे, प्राधान्ये,

अतिरोग पु० अतिशयितो रोगः रुज घञ् । क्षयरोगे ।

अतिरोमश पु० अतिशयितः रोमशः अतिरोमन्+श । वनजाते छागे । अत्यन्तरोमाढ्ये त्रि० ।

अतिवक्तृ त्रि० अति-वच-तृच् । वावदूके, वाचो युक्तिदक्षे च ।

अतिवर्णाश्रमिन् पु० अतिक्रान्तोवर्णानाश्रमिणश्च प्रा०स० । ब्राह्मणादिवर्णभिन्ने ब्रह्मचर्य्याद्याश्रमिभिन्ने च पञ्चमाश्र-मिणि "यो वेदान्तमहावाक्यश्रवणेनैव केशव । आत्मान-मीश्वरं वेद सोऽतिवर्णाश्रमी भवेदिव्या" द्युक्तलक्षणे ।

अतिवर्त्तिन् त्रि० अति-वृत-णिनि । अतिक्रमकारके ।

अतिवर्त्तुल पु० अतिशयितः वर्त्तुलः वृत-उल । वाटुलाकलाइ इति ख्याते वर्त्तुलाकारके कलाये । अत्यन्तवर्त्तुले त्रि० ।

अतिवाद पु० अति-वाद-घञ् । अत्युक्तौ, कठोरवाक्ये, अप्रियवाक्ये च ।

अतिवादिन् त्रि० सर्व्वानतीत्य वदतीति अति-वद-णिनि। सर्व्वानतिक्रम्य वदनशीले, सर्व्वमतखण्डनेन स्वमतव्यवस्थापके च। [क्रान्ते च।

अतिवाहित त्रि० अति+वह-णिच्-क्त। यापिते, अति-

अतिविकट पु० अतिशयेन विकटः वि+कटच्। दुष्टहस्तिनि। अतिकराले त्रि०।

अतिविषा स्त्री० अतिक्रान्ता विषम् प्रा० स०। आइच् इति ख्यातायां लतायाम्। विषातिक्रमकारके त्रि०।

अतिवृत्ति स्त्री० अति-वृत-क्तिन्। अतिक्रमे। वृत्तिर्जीविकां तामतिक्रान्ते त्रि०।

अतिवृष्टि स्त्री० अति-वृष-क्तिन्। अत्यन्तवृष्टौ शस्योपघातकोपद्रवरूपे ईतिभेदे।

अतिवेल त्रि० अतिक्रान्तो वेलां मर्य्यादाम् कूलं वा प्रा०स०। अतिशयिते, निर्मर्यादे, समुद्रकूलातिक्रमकारके च। (अतिक्रमे अव्ययी०। वेलातिक्रमे अव्य०)

अतिव्याप्ति स्त्री० अतिशयेन लक्ष्यमलक्ष्यञ्चाविशिष्य व्याप्तिर्व्यापनम् अति-वि-आप्-क्तिन्। अतिशयव्यापने 'लक्ष्यस्येवालक्ष्यस्यापि व्यापने'। तथाच यत्र यस्य स्थितिरुचिता ततोऽन्यत्रापि तस्य सम्बन्धे अतिव्याप्तिः। यथा पृथिव्याः गन्धो लक्षणं तत्रैव तस्य स्थितिरुचिता तस्य वाय्वादौ सत्त्वप्रसङ्गे अतिव्याप्तिः। यथा वा धूमे वह्नेर्व्यापकता न तु जले, तस्याः जले प्रसक्तौ अतिव्याप्तिः।

अतिशक्ति स्त्री० अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यम् देहजं बलम् वा प्रा०स०। अतिशयिते सामर्थ्ये, अधिकवीर्य्ये च। अतिक्रान्तः शक्तिम् प्रा०स०। सामर्थ्यातिक्रमकारके त्रि०। अतिशयिता शक्तिर्यस्य ब० अतिशयबलवति त्रि०। अतिक्रमेऽव्ययी०। शक्त्यतिक्रमे अव्य०।

अतिशक्करी स्त्री० अतिक्रान्ता शक्करीम् चतुर्द्दशाक्षरपादिकां वृत्तिम् प्रा०स०। पञ्चदशाक्षरपादके छन्दोभेदे।

अतिशय पु० अति-शीङ्-अच्। आधिक्ये, अतिरेके, च। अतिक्रान्तः शयं हस्तं प्रा० स०। हस्तातिक्रमकारके त्रि०।

अतिशयित त्रि० अति-शीङ्-क्त। अधिके, अतिक्रान्ते च।

अतिशयोक्ति स्त्री० अतिशयेन उक्ति निर्द्देशः वच-क्तिन्। अर्थालङ्कारविशेषे अलङ्कारशास्त्रप्रसिद्धे। सा०१०परि०

अतिशायन न० अति-शीङ् ल्युट् अतिशायने मतुबिति सूत्रनिर्द्देशात् दीर्घः। आधिक्ये, प्रकर्षे च।

अतिशीत न० अतिशयितं शीतम् प्रा० स०। अत्यन्तशीतलस्पर्शे। तद्विशिष्टे त्रि०।

अतिशोभन त्रि० अति+शुभ-ल्यु। अत्यन्तशोभान्विते, श्रेष्ठे च।

अतिसन्ध्या स्त्री० अत्यासन्ना सन्ध्या प्रा० स०। पूर्व्वदिवसीयरात्रिशेषदण्डादिसूर्य्योदयपर्य्यन्तः, सूर्य्यास्तात् पूर्व्वोत्तरदण्डात्मकश्च कालः सन्ध्या तस्याः आसन्ने काले।

अतिसर्ग पु० अति+सृज-घञ्। दाने, कामचारानुज्ञायां यथेच्छं क्रियतामित्याद्यभिलापरूपायाञ्च। रुगं सृष्टिमतिक्रान्तरि त्रि०।

अतिसर्ज्जन न० अति+सृज-ल्युट्। दाने, बधे, विप्रलम्भे च।

अतिसायम् अव्य० अत्यासन्नं सायम् प्रा०स०। सूर्य्यास्तकालः सायम् तस्यासन्ने काले।

अति(ती)सार पु० अतिशयेन सारयति रेचयति अति+सृ-णिच्-अच्। बहुद्रवीभूतमलनिःसारके उदरामये रोगे। अतेर्दीर्घतापि वा।

अति(ती)सारकिन् त्रि० अतिसाररोगोऽस्यास्ति अतिसार+इनि कुक् च्। अतिसाररोगवति। अतेर्दीर्घतापि वा।

अतिसृष्ट त्रि० अति+सृज-क्त। दत्ते, प्रेरिते।

अतिसौरभ पु० सुरभेर्भावः अणि सौरभम्, अतिशयितं तदस्य ब०। अत्यन्तामोदवति आम्रे। सौरभान्विते वस्तुमात्रे त्रि०।

अतीत त्रि० अति+इन्-क्त। अतिक्रम्य गते, नाशप्रतियोगिनि भूते काले ततकालवृत्तिपदार्थमात्रे च।

अतीन्द्रिय त्रि० अतिक्रान्तमिन्द्रियं तद्विषयत्वात् प्रा०स०। इन्द्रियायोग्ये अप्रत्यक्षे, नेत्रश्रोत्रनासिकारसनात्वक्चेतांसीन्द्रियाणि तैर्ग्रहीतुमशक्ये विषये। [त्मन्तेऽत्यन्ताश्रये च।

अतीव अव्य० अत्येव-इवः अवधारणे प्रा०स०। अवधृता-

अतुल त्रि० तुल-णिच् अ तुला सा नास्ति यस्य ब०। उपमाशून्ये, अत्यन्तशोभाढ्ये च। तिलवृक्षे पु०।

अतुल्य त्रि० तुलां सादृश्यमर्हति तुला+यत् न०त०। अनुपमे, सौन्दर्य्यातिशयशालिनि च।

अतृप्ति स्त्री० तृप-क्तिन् अत्यन्ताभावार्थे-न०त०। तृप्तिराहित्ये। ब०। तृप्तिरहिते, असन्तोषिणि, लोलुपे, च त्रि०।

अतृट बधे भ्वा० आत्म०सक०सेट्। अट्टते आट्टिष्ट। णिचि अट्टयति ते आतिट्टत् त।

अत्ता स्त्री० अतति संवर्धाति अत-तक् इडभावः। मातरि, श्वश्वाञ्च। स्वार्थे के कापि अत इत्वे। अत्तिका च।

अत्यन्त न० अतिक्रान्तोऽन्तं सीमाम् प्रा०स०। अतिशये। तद्युक्ते सर्व्वपरिच्छेदान्ति क्रान्ते त्रि०। अतिक्रमेऽव्ययी०। परिच्छेदातिक्रमे नाशातिक्रमे च अव्य०।

अत्यन्तकोपन त्रि॰ अत्यन्तं कुप्यति अत्यन्त+कुप-ल्यु २त॰स॰। अत्यन्तकोपशालिनि।

अत्यन्तगामिन् त्रि॰ अत्यन्तम् अन्तात्ययं गच्छति अति+अन्त-अत्यये अव्ययीभावः ततः-गम-णिनि। आत्यन्तिके, अतिशयगमनशीले च। स्त्रियामत्यन्तगामिनी।

अत्यन्तसंयोग पु॰ अत्यन्तेन साकल्येन संयोगः संबन्धः व्याप्तिरिति यावत् अन्तमवसानमतिक्रान्तः संयोगो वा अत्यन्त+सम्+युज-घञ्। सन्ततसंबन्धे।

अत्यन्ताभाव पु॰ अत्यन्तः नित्यः अभावः कर्म्म॰। नास्तीति वाक्याभिलप्यमाने नाशप्रागभावभिन्ने संसर्गाभावे। यथा भूतले घटोनास्ति इति वाक्येन न्यायमते भूतले घटाभावः प्रतीयते। स च न नाशः नापि प्रागभावः। नाशप्रागभावयोस्तु न अत्यन्तता प्रतियोगिकाले तयोरसत्त्वात्।

अत्यन्तिक त्रि॰ अत्यन्तं गच्छति अत्यन्त+ठ ठस्येक। अतिशयितभ्रमणकारिणि।

अत्यन्तीन त्रि॰ अन्तस्यात्ययः अत्यन्तम् अत्यये व्ययी॰ अत्यन्तं गामी अत्यन्त+ख। अतिशयितगतिशीले।

अत्यम्ल पु॰ अतिशयितोऽम्लोरसः फलपत्रादौ यस्य ब॰। तेंतुल इति प्रसिद्धे तिन्तिड़ीवृक्षे। अत्यन्ताम्लरसवति वस्तुमात्रे त्रि॰। वनवीजपुरे टावालेवु इति प्रसिद्धे वृक्षे स्त्री॰।

अत्यम्लपर्णी स्त्री॰ अत्यम्लं पर्णं यस्याः जातित्वात् ङीष्। अत्यम्लपत्रयुक्ते वनवीजपुरे टावालेवु इति ख्याते वृक्षे।

अत्यय पु॰ अति+इन्-अच्। अतिक्रमे, अभावे, विनाशे, दोषे, कृच्छ्रे, अतिक्रम्य गमने, कार्य्यस्यावश्यम्भावाभावे च।

अत्यर्थ न॰ अतिक्रान्तमर्थमनुरूपस्वरूपं गति॰स॰। अतिशये। तद्विशिष्टे त्रि॰। अत्यये अव्य॰। अर्थाभावे अव्य॰।

अत्यल्प त्रि॰ अतिशयितोल्पः प्रा॰स॰। अत्यन्ताल्पे अणुतरे।

अत्यष्टि स्त्री॰ अतिक्रान्ता अष्टिं षोड़शाक्षरपादिकां वृत्तिं गति॰स॰। सप्तदशाक्षरपादके छन्दोभेदे।

अत्याकार पु॰ अतिशयेन आकारः तिरस्कारः अति-आ-कृ-घञ्। तिरस्कारे। अतिशयित आकारो मूर्त्तिः प्रा॰स॰। महादेहे। अतिशयित आकारो यस्य ब॰। तद्विशिष्टे त्रि॰।

अत्यागिन् त्रि॰ त्यज-विणुन् मन्दार्थे नञ् त॰। कर्म्मफलाननुसन्धानेन कर्म्मानुष्ठायिनि, त्यागिभिन्ने च।

अत्याचार पु॰ अत्युत्कट आचारः आ+चर-घञ् प्रा॰स॰। अनुचिताचरणे। अतिक्रमे अव्ययी॰। अचारातिक्रमे अव्य॰।

अत्याधान न॰ अति-आ-धा ल्युट्। अतिक्रमणे, सम्बन्धमात्रे, उपरिस्थापने च। अव्ययी॰। आन्याधानातिक्रमे अव्य॰।

अत्याल पु॰ अतिशयेन समन्तात् अलति पर्य्याप्नोति अति+आ+अल-अच्। लालचिता इति ख्याते रक्तचित्रक वृक्षे, तस्य अत्यल्पकालेन समन्तात् व्यापनात्।

अत्याश्रम त्रि॰ अतिक्रान्तआश्रमान् तद्विहितधर्म्मान् गति॰स॰। सर्व्वाश्रमत्यागिनि पञ्चमाश्रमिणि संन्यासिनि। तत्रात्याश्रमिन् इत्यपि। अतिशयित आश्रमः प्रा॰स॰। उत्तमाश्रमे संन्यासे पु॰।

अत्याहित न॰ अत्यन्तमाधीयते तन्निवारणार्थं मनोदीयतेऽस्मिन् आ+धा-क्त। अत्यन्तभीतौ, प्राणहानिशङ्काकरे अनर्थे च।

अत्युक्ति स्त्री॰ अतिशयेन अनौचित्येन वा उक्तिः अति+वच-क्तिन्। अतिशयोक्तौ, अन्याय्योक्तौ, निर्गुणे जने आरोपितगुणेन स्तवने।

अत्युक्था स्त्री॰ उक्था एकाक्षरपादिका वृत्तिः अतिक्रान्ता ताम् गति॰स॰। द्व्यक्षरपादके छन्दोभेदे। उक्थनामकसामभेदातिक्रान्तरि त्रि॰।

अत्यूह पु॰ अतिशयेन ऊहते शब्दायते अति+ऊह-अच्। कालकण्ठे डेओ इति प्रसिद्धे दात्यूहे पक्षिणि। अतिशयेन ऊहस्तर्कः प्रा॰स॰। अतिशयवितर्के। नील इति ख्यातौषधौ नीलिकायां स्त्री॰। अतिक्रमेऽव्ययी॰। वितर्कातिक्रमे अव्य॰।

अत्र अव्य॰ अस्मिन् एतस्मिन् वा इदम्+एतद्+वा सप्तम्यास्त्रल् प्रकृतेरनुभावश्च। अस्मिन् एतस्मिन् वेत्यर्थे।

अत्रभवत् त्रि॰ इदम्+एतद्+वा प्रथमायास्त्रल्। पूज्यार्थे, श्लाघ्ये, च। स्त्रियामत्रभवती।

अत्रि (त्त्रि) पु॰ अद-त्रिन् सप्तर्षिमध्ये मुनिविशेषे। अत्र पक्षे वा तलोपे अत्रिरित्यपि। त्रिभिन्ने त्रि॰ बहुवचनान्तः।

अत्रिजात पु॰ अत्रेर्नेत्रात् जातः जन-क्त ५त॰। चन्द्रे, अपत्यार्थं तपस्यां कुर्व्वतोऽत्रेर्नेत्रात् जातो हि चन्द्रः।

अत्त्रि (त्रि) न् पु॰ अद-त्रिनि। सप्तर्षिमध्ये मुनिभेदे। पक्षे तलोपः।

अथ अव्य॰ उ॰-अर्थ-ड पृषो॰ रलोपः। संशये, आरम्भे, आनन्तर्य्ये, प्रश्ने, विकल्पे, प्रकरणे, समुच्चये, पक्षान्तरे च। मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोऽप्ययं श्रुत्या मङ्गलसाधनं भवति।

अथकिम् अव्य॰ अथ+कायते कवते वा डिम्। स्वीकारे।

अथर्व्वन् पु॰ अथ+ऋ-वनिप्। अथर्व्वनामकमुनिविशेषे, तन्मुनिदृष्टतया तुरीये वेदे च।

अथर्व्वविद् पु॰ अथर्व्ववेदं तदुक्तं कर्म्म वा वेत्ति विद-क्विप्।

अथर्व्ववेदस्य शन्नोदेवीरभीष्टयइत्यादिकस्य, तद्विहिताभिचारादिकर्म्मणश्च वेत्तरि वशिष्ठादौ।

अथवा अव्य॰ अथ+वा-क्विप्। पक्षान्तरे।

अथो अव्य॰ अर्थ-डो पृषो॰ रलोपः। अथशब्दार्थे आरम्भादौ।

अद बन्धने भ्वा॰ पर॰ इदित् सक॰ सेट्। अन्दति। आन्दीत्।

अद भक्षणे अदने च अदा॰ पर॰ सक॰ अनिट्। अत्ति अघसत् जघास अत्ता अत्स्यति सनि जिघत्सति।

अद् अव्य॰ अद-क्विप्। आश्चर्य्ये।

अदत्ता स्त्री॰ न॰ दा-क्त। अपरिणीतायाम् स्त्रियाम्। अदत्तमात्रे त्रि॰। अप्राशस्त्ये न॰त॰। अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैरित्याद्यभिहितलक्षणे दानाभासेनार्पिते दत्त्वापि प्रत्याहर्त्तुं योग्ये त्रि॰। [चौरे।

अदत्तादायिन् त्रि॰ अदत्तमादत्ते आ+दा-णिनि ६त॰।

अदभ्र त्रि॰ दन्भ रक् दभ्रमल्पं न॰त॰। अनल्पे अदभ्रदर्भामधिशय्य स स्थलीमिति भारविः।

अदर्शन त्रि॰ दृश-भावे ल्युट् न॰ब॰। दर्शनायोग्ये, अतीन्द्रिये, नाशे, व्याकरणशास्त्रपरिभाषिते लोपे च। अव्ययी॰। दर्शनाभावे अव्य॰।

अदल पु॰ दल्यते भिद्यते इति दलं पत्रं दल—कर्म्मणि घञ् न॰ ब॰। दलशून्ये हिजल इति ख्याते वृक्षे। पत्रशून्ये वृक्षमात्रे त्रि॰। घृतकुमार्य्यां स्त्री॰।

अदस् त्रि॰ न दस्यते उत्क्षिप्यतेऽङ्गुलिर्यत्र इदन्तया निर्द्धारणाय पुरोवर्त्तिन्येवाङ्गुलिनिर्द्देशः सम्भवति नापुरोवर्त्तिनि। न+दस-क्विप्। अपुरोवर्त्तिनि परोक्षे ज्ञाते वस्तुनि।

अदाह्य पु॰ दग्धुमशक्ये दह-ण्यत् न॰त॰। निराकारतया दाहा[illegible]रमात्मनि। दाहानर्हे महारोगिप्रभृतौ त्रि॰।

अदिति [illegible] न+दा-डिति वा ङीप्। दातुं छेत्तुमयोग्यायाम् [illegible] दितिरसुरमाता तद्विरोधिन्यामदितौ सुरमातरि [illegible] पतेः कन्यायाम् काश्यपपत्न्याम्, अदितिदेवताके पु[illegible] त्रे च। दो-क्तिन् दितिः खण्डस्तद्रहिते त्रि॰।

अदितिज पु॰ अदिते[illegible] जन-ड ५त॰। देवे।

अदीन त्रि॰ दी-क्त न[illegible] तर्य्यरहिते उदारे।

अदृष्ट न॰ दृश-क्त न॰त[illegible] पुण्यरूपे भाग्ये, इन्द्रियायोग्यत्वात् वस्त्वादृष्ट[illegible] अदृष्टहेतुके भयादौ च। दृष्टभिन्ने त्रि॰। [पूर्व्वमदृष्टे।

अदृष्टपूर्व्व त्रि॰ न पूर्व्वं [illegible] सुपेति स॰ परनि॰।

अदृष्टि स्त्री॰ विरुद्धा दृष्टिः [illegible] र्थे न॰त॰। क्रूरदृष्टौ, सरोषवक्रदृष्टौ, दर्शनाभावे च। ब॰। दृष्टिशून्ये त्रि॰।

अद्धा अव्य॰ अत्यते अत् तं सन्ततं गमनं ज्ञानं वा दधाति क्विप्। याथार्थ्ये, साक्षात्कारे, स्फुटे, अवधारणे, अतिशये च।

अद्भुत न॰ अततीत्यत् अव्ययमाकस्मिकार्थे तथा भाति भा-डुतच्। आकस्मिके उल्कापातादौ, आलङ्कारिकप्रसिद्धे नवरसान्तर्गतविस्मयस्थायिभावके रसे च। तद्वति त्रि॰।

अद्भुतस्वन पु॰ अद्भुतः स्वनो यस्य स्वन-अच् ब॰। महादेवे। कर्म्म॰। आश्चर्य्यशब्दे। ब॰। तथाशब्दवति त्रि॰।

अद्य अव्य॰ अस्मिन्नहनि इदम्शब्दस्य निपातः सप्तम्यर्थे। अस्मिन् दिवसे। आधारार्थत्वेऽपि अस्य समासान्तरघटकता तेनाद्यदिवसादारभ्य इति, अद्यप्रभृत्यवनताङ्गीति कुमारः।

अद्यतन त्रि॰ अद्य भवः अद्य+ट्यु तुडागमश्च। अद्यभवे वस्तुमात्रे। स्त्रियामद्यतनी।

अद्यत्वे अव्य॰ इदम्शब्दस्य इदानीमित्यर्थे निपा॰। अधुनार्थे।

अद्यश्वीना स्त्री॰ अद्य श्वः परदिने वा प्रसोष्यते। अद्यश्वस्+ख टिलोपः। आसन्नप्रसवायां गर्भिण्याम्।

अद्रि पु॰ अद-क्रिन्। पर्व्वते, वृक्षे, सूर्य्ये, परिमाणभेदे च।

अद्रिकर्णी स्त्री॰ अद्रिः अद्रिनामिका गिरिर्वालमूषिका तस्याः कर्णः कर्णतुल्यं पत्रं यस्याः गौरादित्वात् ङीष्। बालमूषिकातुल्यपत्रायाम् अपराजितालतायाम्।

अद्रिकीला स्त्री॰ अद्रयः कुलाचलाः कीलाः शङ्कव इव यस्याः ब॰। भूमौ।

अद्रिज न॰ अद्रौ जायते जन-ड ७त॰। शिलाजतु इति ख्यातप्रसिद्धे गन्धद्रव्ये। गेरि इति प्रसिद्धे द्रव्ये इति केचित्। पार्व्वत्यां स्त्री॰। पर्व्वतभवमात्रे त्रि॰।

अद्रितनया स्त्री॰ अद्रेर्हिमाचलस्य तनया। पार्व्वत्याम्।

अद्रिभिद् पु॰ अद्रिं भिनत्ति भिद्-क्विप् ६त॰। इन्द्रे।

अद्रिभू स्त्री॰ अद्रावपि भवति भू-क्विप् ७त॰। अपराजितालतायाम् तस्याः पर्व्वतेऽप्यतिकठोरभूमिके जायमानत्वात्।

अद्रिराज पु॰ अद्रीणां राजा टच्। हिमाचले।

अद्रिसार पु॰ अद्रेः सार इव। लौहे।

अद्रीश पु॰ अद्रीणां अद्रेर्वा ईशः ६त॰। हिमाचले, शिवे च।

अद्वय न॰ द्वावयवं द्वयं नञा ब॰। सजातीयविजातीयस्वगतभेदशून्ये परब्रह्मणि। सजातीयद्वितीयरहिते, द्वयशून्ये च वस्तुमात्रे त्रि॰। नास्ति द्वयं यस्य मते ब॰। बुद्धभेदे पु॰।

अद्वयवादिन् पु॰ अद्वयं वदति सर्व्वमेव वस्तु चित्स्वरूपं नान्यदतो द्वितीयमस्तीति वदतीति वद-णिनि। अद्वैतवादिनि वैदान्तिके वाह्यार्थाभावेन ज्ञानात्मकं सर्व्वं वस्तु

स्वीकर्त्तरि बौद्धे च । स्त्रियां-वादिनी ।

अद्वितीय त्रि० न द्वितीयः सदृशो यस्य ब० । सजातीय द्वितीयरहिते । केवले एकस्मिन् परमात्मनि न० ।

अद्वैत त्रि० द्विधा इतं भेदं गतम् द्वीतम् तस्य भावः द्वैतं तन्नास्ति यस्य ब० । सजातीयादिभेदशून्ये केवले परमात्मनि ।

अद्वैतवादिन् त्रि० अद्वैतं सर्व्वमेव चिदात्मकं वदतीति वद-णिनि । सर्व्वमेव चिदात्मनि रज्ज्वादाविव रजतादिवत् आरोपितं सत् प्रतिभाति तद्याथार्थ्यज्ञाने च यथा रजत-बुद्धिर्निवर्त्तते एवं चिदात्मनि याथार्थ्येनावगते सर्व्वं बाह्यं वस्तु निवर्त्तते इति वादिनि वैदान्तिके बुद्धविशेषे च ।

अधःक्षिप्त त्रि० अधो नीचे क्षिप्तम् क्षिप्-क्त शाक०त० । अधोमुखेन स्थापिते न्यञ्चिते न्युब्जीकृतेऽधस्तान्निहिते च ।

अधःपुष्पी स्त्री० अधोमुखानि पुष्पाण्यस्याः जातित्वात् ङीष् । सुल्फा इति ख्याते अवाक्पुष्पीवृक्षे ।

अधन त्रि० नास्ति धनं स्वाधीनतया यथेष्टमुपयोक्तुं यस्य ब० । भार्य्यापुत्रदासादिषु तेषां धनस्वामित्वेऽपि कार्य्ये यथेष्ट-विनियोगस्य पत्यादिसापेक्षत्वात् अधनत्वम् भार्य्यापुत्रश्च दासश्च त्रयएवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यै ते तस्य तद्धनमिति स्मृत्युक्तेः । निर्धने, अल्पधने च ।

अधम त्रि० अवर-अम अवरस्याधादेशः । कुत्सिते, हीने च ।

अधमर्ण त्रि० अवश्यदेयम् ऋणं तत् अधमं शोध्यं यस्य ब० । अवश्यदेयर्णशोधके खातक इति प्रसिद्धे ऋण-ग्रहीतरि ।

अधमाङ्ग न० अधमम् अङ्गम् कर्म्म० । चरणे ।

अधर पु० न ध्रियते धृङ्-अच् न०त० । ठोट इति ख्याते ऊर्द्ध्वे, नीचे वा ओष्ठे । धरणं धरा तत्संबन्धरहिते हीने, तले, नीचे च त्रि० ।

अधरात् अव्य० अधर+प्रथमायाः पञ्चम्याः सप्तम्या वा आति । अधोभागे । विवक्षावशात् अधरात्-रमणीयम् आगतो वसति वेत्यर्थानुसन्धानेन प्रथमान्ताद्यर्था बोध्याः ।

अधरेण अव्य० अधरस्मिन् देशे, काले, दिशि वा अधर+एनप् । आसन्ने नीचे देशादौ अवरस्यां दिशि च ।

अधरेद्युस् अव्य० अधरस्मिन्नहनि अधर+एद्युस् । अधरदिवसे

अधर्म्म पु० ध्रियतेऽनेन धृ-मन् स्मिन् विरोधे न०त० । धर्म्मवि-रोधिनि वेदनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिं-सादौ च । पुण्यरूपधर्म्मशून्ये त्रि० । गुणाद्यपरपर्य्यायः धर्म्मस्तद्रहिते ब्रह्मणि न० ।

अधश्चर: पु० अधःकर्म्मणि स्तेयादौ चरतीति चर-ट । चौरे । अधःस्थानगामिनि तु त्रि० । स्त्रियाम् ङीप् ।

अधःशय्या स्त्री० शीङ्-क्यप् शय्या ७त० । भूमिशयने ।

अधस् अव्य० अधर+असि अवरशब्दस्थाने अधादेशश्च । पाताले, अधःस्थानमात्रे च । तत्रापि अर्थवशात् प्रथमा पञ्चमीसप्तम्यर्था उन्नेयाः ।

अधस्तात् अव्य० अधर+अस्ताति । अधःशब्दवत् नीचार्थे ।

अधि अव्य० न+धा-कि । अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधि-कृत्येत्यर्थे, उपरि, आधिक्ये, अतिशये च । आधीयते दुःख मनेनेति आ+धा-कि वा ह्रस्वः । मनःपीड़ायाम् पु० ।

अधिक त्रि० अधि+क । अतिरिक्ते, अनेकस्मिन्, अर्थालङ्कार भेदे (सा०१०परि० द्रष्टव्यम्)

अधिकरण न० अधि+कृ-ल्युट् । आधारे, व्याकरणशास्त्रे परिभाषिते अधिकरणसंज्ञके कर्तृकर्म्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गृहस्य कर्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाकक्रिया-श्रयत्वम्. पूर्व्वोत्तरमीमांसाशास्त्रप्रसिद्धे एकार्थप्रतिपादके न्यायसमुदाये अधिक्रियते निर्णयार्थं विचारोऽस्मिन् विषयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयात्मकपञ्चाङ्गबोधकवाक्यस-मुदाये च । तत्र विचारार्हं वाक्यं विषयः तस्यार्थविषये सन्देहः इदमित्थं न वेति विकल्पः । तत्र सन्दिह्यमानयोः पक्षयोः असत्पक्षे युक्तिप्रदर्शनवाक्यं पूर्व्वपक्षवाक्यं सिद्धान्तः पूर्व्वपक्षोक्तां युक्तिं खण्डयित्वा सत्पक्षे युक्तिप्रदर्शन-वाक्यम् । ततश्चेत्याद्यभिलापेन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णायकवाक्यमिति विस्तरस्तु वृहदभिधाने ।

अधिकरणविचाल पु० अधिकरणस्य विचालः अन्यथाकरणं वि-चल घञ् ६त० । द्रव्यस्य अवस्थान्तरकरणेन संख्या-न्तरकरणे, विचालो नाम यदेकमनेकं क्रियते अनेकं वैकं क्रियते इति भाष्यम् । एकस्य राशेः पञ्चधाविभागे, पञ्चा-त्मकस्य वा एकधा विभागेऽधिकरणस्य संख्याया विचालः ।

अधिकर्म्मिक पु० (न०) अधिकृत्य हट्टं कर्म्मणेऽलम् अधि-कर्म्म-ठ । हट्टाध्यक्षे, हट्टस्थवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते च ।

अधिकाङ्ग पु० अधिकोऽङ्गात् । वर्म्मधरैर्योधैर्हृदयमध्ये वर्म्मदार्ढ्यार्थं बद्धपट्टिकादौ । ब० । अधिकाङ्गवति त्रि० ।

अधिकार पु० अधि+कृ-घञ् । आरम्भे, यथेष्टं क्रयविक्रयादि कर्तृत्वसम्पादके स्वामित्वे, विनियोज्यपुरुषेण संबन्धे, यथा विहितकर्म्मणि ब्राह्मणादेरधिकारः । राज्ञां छत्रचिह्ना-दिधारणादौ, यथाऽयं छत्रधारणेऽधिकारी, प्रकरणे,

व्याकरणशास्त्रे पूर्व्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवृत्तौ च ।

अधिकारविधि पु० अधिकारे फलस्वाम्ये विधिर्विधानम् वि+धा-कि ७त० । कर्म्मजन्यफलभोक्तृज्ञापके विधौ यथा यजेत इत्यनेन यागजन्यफलभोक्ता स्वर्गकामीति ज्ञाप्यते ।

अधिकार्थवचन न० अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्म्मादतिरिक्तस्य वचनम् वच-ल्युट् ६त० । स्तुत्यर्थवादे, निन्दार्थवादे च ।

अधिकृत पु० अधि+कृ-क्त । आयव्ययाद्यवेक्षके, अध्यक्षे कर्म्मजन्यफलसंबन्धिनि च । स्वामित्ववति त्रि० । [च ।

अधिक्षिप्त त्रि० अधि+क्षिप-क्त । स्थापिते, निन्दिते, कृताधिक्षेपे

अधिक्षेप पु० अधि+क्षिप-घञ् । तिरस्कारे ।

अधिगत पु० अधि+गम-क्त । ज्ञाते, प्राप्ते, स्वीकृते च ।

अधिगम पु० अधि-गम-घञ् । ज्ञाने, प्राप्तौ, स्वीकारे च ।

अधित्यका स्त्री० अधि+त्यकन् । पर्व्वतस्योपरिभूमौ ।

अधिदेवता स्त्री० देवएव देवता अधिका देवता देवताया अपीश्वरत्वात् । देवानामपि सूर्य्यादिग्रहादीनामीश्वरे रुद्रादौ । ते च स्मृत्युक्ता बोध्या यदधिष्ठानात् सूर्य्यादयः स्वस्वकार्य्यं कुर्व्वन्ति ।

अधिदैवत न० देवतैव स्वार्थे अण् । अधिदेवतावत् समासार्थौ । हिरण्यगर्भे, अन्तर्यामिनि पुरुषे च पु० । स च दैवतानि चक्षुरधिष्ठातॄणि सूर्य्यादीनि तत्तत्कर्म्मणि नियुज्य चक्षुरादीनीन्द्रियाण्यनुगृह्णातीति तस्य सर्व्वदेवतेश्वरत्वम् ।

अधिनाय पु० अधिनीयते वायुना गन्धाधारसूक्ष्मांशनयनद्वारा तत्तत्स्थानं ह्रियतेऽसौ अधि+नी-घञ् । गन्धे ।

अधिप त्रि० अधि+पा-क । राजनि, प्रभौ च ।

अधिपति पु० अधि+पा-डति । प्रभौ । [प्रभौ ।

अधिभू पु० अधिभवति स्वामीभवति स्वाम्यर्थेऽत्राधिः भू-क्विप् ।

अधिमांसक पु० अधिको मांसो यत्र ब० कप् । दन्तरोगविशेषे "हनूस्थे पश्चिमे दन्ते महाशोथोमहारुजः । लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसक इति वैद्यकम् ।

अधिमास पु० अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रोमासः प्रा०स० । मलमासे असंक्रान्तमासोऽधिमासो निरुक्त इतिस्मृतेः रविसंक्रान्तिवर्जितो मासोऽधिमासः । तथाहि मीनादिस्थोरविर्येषामारम्भः प्रथमे क्षणे । ते चैत्राद्या इत्युक्तदिशा मेषस्थे रवौ यस्य चान्द्रमासस्यारम्भः स वैशाख इत्येवं वैशाखादिलक्षणे स्थिते यस्मिन् चान्द्रमासे रवेः राश्यन्तरसंक्रमो न, तस्य तदुत्तरस्य च चान्द्रमासस्य उभयोर्मेषस्थे रवौ आरम्भात् उभयोरपि वैशाखता, तत्राद्योऽधिमासः संक्रान्तिहीनत्वात् द्वितीयः शुद्धः इति स्मृतौ प्रसिद्धम् ।

अधिराज पु० अधिको राजा प्रा०स० टच् । सार्व्वभौमे ।

अधिरोहिणी स्त्री० अधिरुह्यतेऽनया अधि+रुह-करणे ल्युट् । मइ इति, सिड़ि इति च प्रसिद्धे काष्ठवंशादिनिर्म्मिते उच्चस्थानारोहणसाधने सोपानद्वन्द्वे ।

अधियज्ञ पु० अधिकृतः स्वामितया यज्ञो यस्य ब० । विष्णौ ।

अधियोगः युज-घञ् योगः अधिकोयोगः प्रा०स० । ज्योतिषप्रसिद्धे यात्रिकशुभयोगे । स च गमनसमयलग्ने, तस्माद्वा चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे वा स्थाने बुधजीवभार्गवाणां मध्ये द्वयोरेकत्र, उक्तस्थानमध्ये अन्यतमस्थाने वा स्थितौ सत्यां योगः तत्र यातुः क्षेमं शत्रुहानिश्च फलम् । मुहूर्त० या० प्र० ।

अधिवास पु० अधि+वस-घञ् । निवासे । दासेर्घञि । गन्धमाल्याद्यैः संस्कारे । अधिवासयति देवता अनेन अधि+वस-णिच् करणे घञ् । यज्ञारम्भपूर्व्वदिवसे देवतास्थापनादिकर्म्मणि ।

अधिवासन न० अधि+वस-णिच् अधिकरणे ल्युट् । यज्ञारम्भात् पूर्व्वदिवसे देवतास्थापनादौ । भावे ल्युट् । गन्धमाल्याद्यैः पूज्यादेः संस्कारकरणे ।

अधिवासित त्रि० अधि-वस-णिच्-क्त । गन्धमाल्यादिभिः कृतसंस्कारे, कृतप्रागुक्ताधिवासे देवादौ च ।

अधिविन्न स्त्री० विद-भावे क्त । अधि उपरि विन्नं विवाहोऽस्याः । कृतसपत्निकायाम् अध्यूढायाम् स्त्रियाम् । कृतपूर्व्वविवाहायाः उपरि पत्या पुनर्विवाहकरणे प्रागूढाया भार्य्याया अधिविन्नत्वम् । अधिविन्नास्त्रियै देयमिति स्मृतिः ।

अधिश्रयण न० अधि उपरि श्रयणं पाकार्थं स्थापनं श्रीञ्-भावे ल्युट् । चूल्ल्या उपरि स्थापने, तत्पूर्वकपाके च । अधिश्रीयते पच्यतेऽत्र, करणे ल्युट् टित्त्वात् ङीप् । चूल्ल्याम् आका इति, चूला, इति च ख्यातायाम् स्त्री० ।

अधिष्ठातृ त्रि० अधि+स्था-तृच् षत्वम् । अध्यक्षे, नियमितकार्य्यविशेषाकरणेन कृताकृतावेक्षके च ।

अधिष्ठान न० अधि-स्था ल्युट् । नियमितकार्य्यविशेषाकरणेन सान्निध्यमात्रकरणे, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च । अधिकरणे ल्युटि । पुरे । करणे ल्युटि । चक्रे, प्रभावे च चक्रेण प्रभावेन च प्रवृत्तकृत्यादिसम्भवात् ।

अधीत त्रि० अधि+इङ्-क्त । पठिते । भावे क्त । अध्ययने न० ।

अधीतिन् त्रि० अधीतमनेन अधीत+इनि । कृताध्ययने ।

अधीन त्रि० अधिगतमिनं प्रभुं गतिस० । आयत्ते धनाधीन इत्यादौ तु धने अधि-इति वाक्ये समासे अध्युत्तरपदात् ख ।

अधीर त्रि० धीरः धैर्य्यान्वितः न० त० । चञ्चले ।

अधीश त्रि० अधिक ईशः प्रा० स० । अधिकप्रभौ सार्व्वभौमे ।

अधीश्वर त्रि० अधिक ईश्वरः प्रा० स० । सार्व्वभौमे स्त्रियां ङीप् ।

अधीष्ट न० अधि+इष-भावे क्त । सत्कारपूर्व्वकनियोगे । कर्म्मणि क्त । सत्कारपूर्व्वकं नियोजिते त्रि० ।

अधुना अव्य० अस्मिन् काले इदम्शब्दस्य नि० । संप्रतीत्यर्थे ।

अधुनातन त्रि० भवार्थे अधुना+ट्युल् । इदानीन्तने स्त्रियां ङीप् ।

अधृष्ट त्रि० धृष-निर्लज्जत्वे क्त न० त० । लज्जाशीले । [नीये ।

अधृष्य त्रि० धृष-अर्हार्थे यत् न० त० । धर्षणायोग्ये अनभिभव-

अधोंऽशुक न० अधर+प्रथमार्थे असि अधरस्य अधादेशश्च । परिधानवस्त्रे ।

अधोऽक्षज पु० अक्षात् इन्द्रियात् जायते अक्षजं प्रत्यक्षज्ञानम् जन-ड ५ त० अधरमप्राहकत्वाद्धीनं तद्यस्य ब० । अधर-प्रथमार्थे असि अधादेशश्च । इन्द्रियायोग्ये, "अधो न क्षीयते जातु यस्मात्तस्मादधोऽक्षज इत्युक्त" लक्षणे, वा विष्णौ ।

अधोजिह्विका स्त्री० अल्पा जिह्वा जिह्विका अल्पार्थे क अधोऽधरा जिह्विका कर्म्म० । आलजिभ इति ख्यातायाम् तालुस्थजिह्विकायाम् । [भागे पातालकोके ।

अधोभुवन न० अधोऽधरं भुवनं लोकः कर्म्म० । भूमेरधरे

अधोमुख त्रि० अधो मुखं यस्य ब० । अवाङ्मुखे, ज्योतिषशास्त्रे प्रसिद्धेषु नक्षत्रभेदेषु च । यथा मूलाश्लेषा कृत्तिका च विशाखा भरणी तथा । मघा पूर्व्वात्रयं चैव अधोमुख गणः स्मृत इति । गोजिह्वाख्यतृणे स्त्री० टाप् ।

अधोलोक पु० अधोऽधरो लोकः कर्म्म० । भूमेरधस्थपाताले ।

अध्यक्ष त्रि० अधिगतोऽक्षं व्यवहारं गतिस० । नृपस्य छत्रधारणादिव्यवहारेऽधिकृते । अध्यक्ष्णोति व्याप्नोति अधि+अक्ष-अच् । व्यापके । अधिगतं मूलतया अक्षमिन्द्रियम् गतिस० । प्रत्यक्षज्ञाने । अर्श आदित्वात् अचि, तद्विषये त्रि० ।

अध्यग्नि अव्य० अग्नौ अग्निसमीपे वा विभक्त्यर्थे सामीप्येऽर्थे वा अव्ययी० । अग्नौ अग्निसमीपे वा । तत्र स्थाने विवाहादौ स्त्रीभ्यो दत्ते धनादौ न० । स्मृतिशास्त्रे चास्मिन्नर्थे पारिभाषास्य कृता यथा विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ । तदध्यग्नि कृतं सद्भिः स्त्रीधनं परिकीर्त्तितमिति ।

अध्यण्डा स्त्री० अधिकमण्डं वीजं यस्याः ब० त० । अधिक वीजवत्यां भुंइ आमला इति ख्यातायाम् भूम्यामलक्याम् ।

अध्यधीन त्रि० अधिकोऽधीनः प्रा० स० । अत्यधीने गर्भदासे च ।

अध्ययन न० अधि+इङ्-ल्युट् । पठने, गुरुमुखोच्चारणानुसारिणि उच्चारणे च । अध्ययनञ्चाक्षरमात्रपाठ इति वैदिकाः सार्थाक्षरग्रहणमिति मीमांसकाः ।

अध्यर्द्ध त्रि० अधिकमर्द्धं यस्य ब० । स्वार्द्धेन सहिते वस्तुमात्रे ।

अध्यवसाय पु० अधि+अव+सो-घञ् । इदमेवमेवेति विषयपरिच्छेदे निश्चये । स चात्मधर्म्म इति नैयायिकाः बुद्धिधर्म्म इति सांख्यादयः । उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः रजस्तमोऽभिभये सति यः सत्त्वसमुद्रेकः सोऽयमध्यवसाय इति वृत्तिरिति चाख्यायते इति सांख्यतत्त्वकौमुदीपरिभाषितलक्षणः, कर्त्तव्यमिति योऽयं निश्चयः चित्सान्निध्यात् प्राप्तचैतन्याया बुद्धेः परिणामः सोऽयमध्यवसाय इत्युक्तलक्षणो वा निश्चयः । उत्साहे च ।

अध्यात्म अव्य० आत्मनि देहे मनसि वा विभक्त्यर्थे अव्ययी० । आत्माधिकरणे देहाधिकरणे चित्ताधिकरणे च । तदधिकृत्य विद्याविषये आत्मतत्त्वे, स्वभावोऽध्यात्ममुच्यते इति गीतावचनात् स्वभावे, भावस्य स्वरूपं प्रत्यक्चैतन्यमिति तस्मिन्, परब्रह्मणि च । अतएव अध्यात्मविद्याशब्दादीनामेतद्विषयकविद्यार्थत्वं वेदान्तादौ प्रसिद्धम् ।

अध्यापक त्रि० अधि+इङ्-णिच्-ण्वुल् । प्रागुक्ताध्ययनकारयितरि, उपाध्याये च ।

अध्यापन न० अधि+इङ्-णिच्-भावे ल्युट् । पाठनायाम् । युचि तु स्त्रीत्वात् टापि, अध्यापना तस्मिन्नेवार्थे ।

अध्याय पु० अधि+इङ्-घञ् । अध्ययने, वेदादिशास्त्रस्य एकार्थकविषयसमाप्तिद्योतके विश्रामस्थाने अंशविशेषे, 'सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः । उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च । स्थानं प्रकरणञ्चैव पर्व्वोल्लासाह्निकानि च । पुराणादौ परिच्छेदा अनेके परिकीर्त्तिता इत्युक्तान्यतमप्रकारे च ।

अध्यारूढ़ त्रि० अधि+आ-रुह-कर्त्तरि क्त । आरोहणकर्त्तरि अधिके च ।

अध्यारोप पु० अधि+आ-रुह-णिच्-पुक् च घञ् । अतस्मिन् तद्बुद्धिरारोपोमिथ्याज्ञानम् किञ्चिदधिष्ठानमधिकृत्य तादृशारोपः अध्यापोपः यथा असर्पभूतां रज्जुमधिकृत्य सर्पारोपः तथैव अजगद्रूपे ब्रह्मणि जगद्रूपारोपः । तादृशे मिथ्याज्ञाने ।

अध्यावाहनिक न० अध्यावाहनं पितृगृहात् भर्त्तृगृहागमनकाले लब्धं अधि+आ+वह-ल्युट् ततः लब्धार्थे ठन् ठस्येक। यत् पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावाहनिकं नाम स्त्रीधनं परिकीर्त्तितमिति स्मृत्युक्तलक्षणे पितृकुलात् भर्तृकुलगमनकाले तेभ्यः प्राप्ते स्त्रीधने।

अध्याशन न० अधि+आ-अश-ल्युट्। भोजनोपरिभोजने।

अध्यास पु० अधि+अस-घञ्। अतस्मिन् तद्बुद्धौ अध्यारोपे। अधि-आस घञ्। आसने। [निवेशिते च।

अध्यासित त्रि० अधि+आस-क्त। अधिष्ठिते। स्थिते।

अध्याहार पु० अधि+आ+हृ-घञ्। आकाङ्क्षाविषयपदानुसन्धाने, ऊहे, तर्के, अपूर्व्वोत्प्रेक्षणे च।

अध्यूढ़ पु० अधि+वह-क्त। प्रभौ शङ्करे च। आरोहणकर्त्तरि त्रि०। ऋच्यध्यूढं साम गीयते इति श्रुतिः। अधि-उपरि ऊढ़ समुद्वाहो यस्याः ब०। कृतसपत्निकायां स्त्रियां कृतद्वितीयविवाहस्य प्रागूढ़योषिति स्त्री०।

अध्येषणा न० अधि-इष-प्रेरणे ल्युट्। सत्कारपूर्व्वकमाचार्य्यादेः प्रेरणे, प्रवर्त्तनमात्रे च। युचि टाप् तस्मिन्नेवार्थे स्त्री०। [अस्थिरे च।

अध्रुव त्रि० ध्रु-क न०त०। चले, विकारवति, अनित्ये,

अध्वग पु० अध्वन्+गम-ड। पथिके, सूर्य्ये, उष्ट्रे च। पथिगामुकमात्रे त्रि०। गङ्गायां स्त्री०।

अध्वगभोग्य पु० अध्वगेन अतिसौलभ्यात् अयत्नलभ्यफलत्वाच्च भोग्यं इत०। आमड़ा इति प्रसिद्धे आम्रातकवृक्षे।

अध्वजा स्त्री० अध्वनि जायते जन-ड ७त०। सोना इति ख्याते स्वर्णपुष्पीवृक्षे।

अध्वन् पु० अत्ति बलम् अद-क्वनिप् धादेशः। पथि, अधिकदुरारोहणे च। (सर्व्वभक्षकत्वात्) काले, हिंस्रे च। अद्यते खण्डशो भक्ष्यतेऽनेनेति करणे घञि। अवयवे।

अध्वनीन त्रि० अध्वानमलं गच्छति अध्वन्+ख। पथिके।

अध्वन्य त्रि० अध्वानमलं गच्छति अध्वन्+यत्। पथिके।

अध्वर पु० अध्वानं सत्पथं राति रा+क। यज्ञे। न ध्वरति कुटिला न भवति ध्वृ-अच् न०त०। सावधाने, अष्टवसुमध्ये द्वितीयवसौ च।

अध्वरथ पु० अध्वैव रथो यस्य ब०। पथिप्रवृत्ते दूते। अध्वने हितो पर्य्याप्तो रथो यस्य ब०। पथिगमनोपयुक्ते रथे।

अध्वर्य्यु पु० अध्वरमिच्छति अध्वर+क्यच्- युच् ततोऽन्त्याकारलोपः। यजुर्वेदज्ञे होमकारिणि ऋत्विजि।

अध्वशल्य पु० अध्वनि शल्यमिवाचरतीति क्विप्+अच्। पथिकानां पादक्षतादौ शल्यवद्वेधकारके आपाङ् इति ख्याते अपामार्गवृक्षे।

अन जीवने अदादि०पर० अक०सेट्। अनिति आनीत्।

अन जीवने दिवा० आत्म० अक० सेट्। अन्यते आनिष्ट।

अनक्ष त्रि० नास्ति अक्षं चक्रं नेत्रादिकमिन्द्रियं वा यस्य ब०। चक्रशून्ये चक्षुरादीन्द्रियशून्ये च।

अनक्षर न० अप्रशस्तान्यक्षराणि यत्र ब०। सद्गुणाक्षेपके दोषोद्घोषकवाक्ये, अवाच्ये निन्दावचने, गालि इति प्रसिद्धे दुष्टवचने च।

अनक्षि पु० अप्रशस्तं मन्दमक्षि न०त०। मन्दनेत्रे। ब०। तद्वति तत्र अनक्ष इत्येव टच् समासान्तः।

अनग्नि पु० नास्ति अग्निः श्रौतः स्मार्त्तो वाऽस्य। श्रौतेन स्मार्त्तेन वा विधिना अनाहिताग्नौ गृहस्थादौ, सर्व्वथा अग्निशून्ये प्रव्रजिते च।

अनघ त्रि० नास्ति अघं पापं दुःखं व्यसनं कालुष्यं वा यस्य। पापशून्ये, दुःखहीने, व्यसनशून्ये मलशून्ये स्वच्छे च।

अनङ्ग न० नास्ति अङ्गमाकारो यस्य। आकाशे चित्ते। कन्दर्पे पु०। अङ्गशून्यमात्रे त्रि०। [विशेषे।

अनङ्गशेखर पु० क्रमेण लघुगुरुनिवेशवति दण्डकभेदे छन्दो-

अनच्छ त्रि० न अच्छः निर्म्मलः न०त०। कलुषे, अप्रसन्ने च।

अनञ्जन न० न अज्यते लिप्यते अनृज-कर्म्मणि ल्युट् न०त०। निःसबन्धे आकाशे, परब्रह्मणि च। अञ्जनं दोषसङ्गस्तद्रहिते नारायणे पु०। तथाभूतवस्तुमात्रे त्रि०।

अनडुह् पु० अनः शकटं वहतीति नि०। एड़ा इति प्रसिद्धे गवि। स्त्रियां गवि ङीपि अनडुही अनड्वाहीति च।

अनध्याय पु० अध्यायोऽध्ययनमभावार्थे न०त०। अध्ययनाभावे। न अधीयतेऽस्मिन् काले इति अधिकरणे घञि, अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयायाम्। मन्वादिषु युगादिषु। अष्टकासु च संक्रान्तौ शयने बोधने हरेः। अनध्यायं प्रकुर्व्वीतेत्याद्युक्ते काले, निर्घाते भूमिचलने इत्याद्याकालिकानध्यायकाले च।

अनन्त पु० नास्ति अन्तः गुणानां यस्य ब०। गन्धर्व्वाप्सरसः सिद्धाः किन्नरोरगचारणाः। नान्तं गुणानां जानन्ति तेनानन्तोऽयमुच्यते इत्युक्तलक्षणे विष्णौ, मेघे च। बहुशीर्षकत्वादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च। अन्तः परिच्छेदः देशतः कालतः वस्तुतश्च यस्य नास्ति तस्मिन् परब्रह्मणि आकाशे च न०। बहुविस्तारवति सिन्दुवारवृक्षे पु०। अवधिशून्ये, इयत्ताशून्ये च वस्तुमात्रे त्रि०।

अनन्तव्रत न० अनन्तस्य व्रतमुपासनार्थत्वात् ६त० । भाद्रशुक्लचतुर्द्दश्यां कर्त्तव्ये स्वनाम्ना ख्याते व्रते ।

अनन्ता स्त्री० नास्ति अन्तोऽस्या ब० । विशल्यायामोषधौ अनन्तमूल इति ख्याते मूलभेदे, पार्व्वत्याम्, पृथिव्याम्, दुःस्पर्शायां दुरालभायां, दूर्व्वायां, हरितक्यां आमलक्याम्, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलता- याम्, पिप्पल्यां च ।

अनन्यज पु० नास्ति अन्यद्यस्मात् सर्व्ववस्तुभेदानां तदात्मकत्वात् स विष्णुः तस्मात् जायते जन-ड ५त० । कामदेवे ।

अनन्यवृत्ति त्रि० न अन्यस्मिन् ध्येयभिन्ने वृत्तिर्यस्य ब० । एकान्तचित्ते । [अर्थालङ्कारभेदे पु० ।

अनन्वय त्रि० नास्ति अन्वयो यत्र ब० । अन्वयशून्ये ।

अनय पु० अयः शुभावहो विधिस्तदन्यः न०त० । अशुभदैवे द्यूतकारिणामपसव्यगमने च । नयो नीतिः नी-अच् न०त० । नयाभावे अनीतौ । ब० । तच्छून्ये त्रि० ।

अनर्गल त्रि० अर्गलं द्वाररोधकस्तम्भः ब० । द्वाररोधकस्तम्भ- शून्ये, प्रतिबन्धकशून्ये च ।

अनर्घ त्रि० अर्घो मूल्यं न० ब० । अमूल्ये ।

अनर्थ पु० अर्थः प्रयोजनं विरोधे नञ् त० । अनिष्टे । ब० । अभीष्टरहिते विष्णौ पु० आप्तकामत्वात् । अर्थोऽभिधेयः प्रयोजनं वा नास्ति यस्य ब० । अर्थरहितमात्रे त्रि० ।

अनर्थक न० अर्थोऽभिधेयोऽप्राशस्त्ये नञा ब० । उरःप्रभृति० कप् समासान्तः । समुदायार्थशून्ये प्रलापे, असम्बद्धे वाक्ये च । व्यर्थे त्रि० ।

अनर्थान्तरम् न० अन्योऽर्थः अर्थान्तरं मयूर०त० ततः न० त० । अभेदे, एकार्थे ।

अनल पु० नास्ति अलः पर्य्याप्तिर्यस्य वस्तुदाह्यदहनेऽपि स्पृहा- रभावात् ब० । वह्नौ, अष्टवसुमध्ये पञ्चमे वसौ, अनल- दैवतत्वात् कृत्तिकानक्षत्रे च । चिता इति ख्याते चित्रके वृक्षे, पु० तस्य सर्व्वतः पर्य्याप्तत्वेऽपि पर्य्याप्तेः सीमाभावात्, भेला इति ख्याते भल्लातके वृक्षे पित्तनामके देहस्थे वायु- द्दीरके धातौ च । अव्ययी० । नलाभावे अव्य० । न०त० । नलभिन्ने । अन-कलच् । षष्टिवर्षमध्ये पञ्चाशत्संख्याते वर्षे ।

अनलप्रभा स्त्री० अनलस्य प्रभेव प्रभा यस्य ब० । ज्योतिष्मती- नामिकायां लतायाम् ।

अनलि पु० अनितीत्यन् अन-क्विप् अन् अलिर्यत्र ब० । वक वृक्षे तस्य मधुभिर्भ्रमराणां जीवनधारणात् ।

अनवधानता स्त्री० अवधीयते मनः संयुज्यते कर्त्तव्यकर्म्मणि यथास्थितं प्रवर्त्त्यतेऽनेन अव+धा-करणे ल्युट् अवधानं चित्तवृत्तिभेदः तन्नास्ति यस्य तस्य भावः । प्रमादे । कर्त्तव्येऽकर्त्तव्यताबोधेन ततोनिवृत्तिः, अकर्त्तव्ये च कर्त्त- व्यताबोधेन तत्र प्रवृत्तिः प्रमादः ।

अनवरत त्रि० अव+रम-भावे क्त अवरतम् तन्नास्ति यस्य ब० । निरन्तरे उत्कृष्टे च ।

अनवलोभन न० सीमन्तोन्नयनानन्तरं चतुर्थे मासि कर्त्तव्ये गर्भस्य संस्कारविशेषे स्वनाम्ना प्रसिद्धे ।

अनवसर त्रि० अवसरत्यत्र अव+सृ-अच् अवसरः उचितः कालः स नास्ति यस्य ब० । उचितकालविहीने । न०त० । अवसराभावे ।

अनवस्कर त्रि० अवस्क्रियते क्षोभ्यते अव-कृ-अच् सुडागमः अवस्करो मलः स नास्ति यस्य ब० । विमले ।

अनवस्था स्त्री० अव+स्था-अङ् अवस्थितिः न०त० । अवस्था- भावे, तर्कदोषविशेषे, उपपाद्यस्य समर्थनाय उपपाद- कस्यानुसरणं तर्कः यत्र तर्के उपपाद्योपपादकयोर्विश्रान्ति र्नास्ति तादृशतर्कस्यानवस्थादोषः तेन स तर्को न ग्राह्यः ।

अनवस्थान न० अव+स्था-ल्युट् न०त० । अवस्थानाभावे । ब० । वायौ पु० । चञ्चलमात्रे त्रि० ।

अनशन अश-ल्युट् न० त० । भक्षणाभावे, उपवासे च । ब० । भोजनशून्ये त्रि० ।

अनस् न० अनिति शब्दायते अन-असुन् । शकटे । करणे ल्युट् । ओदने । मातरि स्त्री० ।

अनसूया स्त्री० असू-कण्ड्वादित्वात् यक्-अङ् न०त० । असूया गुणेषु दोषारोपस्तदभावे, अत्रिमुनिपत्नीभार्य्ये ।

अनाकुल त्रि० न आकुलः न०त० । अव्यग्रे, एकाग्रे, स्थिरे, असङ्कीर्णवाक्ये च ।

अनाक्रान्ता स्त्री० आक्रमितुमयोग्या सर्व्वतः कण्टकावृतत्वात् आ+क्रम-क्त न०त० । कण्टकारिवृक्षे । आक्रान्तभिन्ने त्रि० ।

अनागत त्रि० आ+गम-क्त आगतः न०त० । भाविनि, अज्ञाते, अनुपस्थिते, आगमनकर्तृभिन्ने च ।

अनागतार्त्तवा स्त्री० ऋतोः स्त्रीपुष्पस्येदं विकारार्थम् आर्त्त- वम्+ऋतु+अण् न आगतमार्त्तवं यस्याः ब० । स्त्रीधर्म्म- शून्यायां बालिकायां कन्यायाम् ।

अनाचार पु० आ-चर-घञ् अप्राशस्त्येऽभावे वा नञा न०त० । कदाचारे, आचाराभावे च । ब० । आचारहीने त्रि० ।

अनातप पु० आ+तप-अच् न०त० । आतपस्य रौद्रस्याभावे छायायां च । ब० । आतपशून्ये त्रि० ।

अनात्मन् पु० अतति सातत्येन तिष्ठति अत-मनिन् अप्राशस्त्ये भेदार्थे च न०त० । आत्मभिन्ने, अपकृष्टात्मनि देहादौ "अप्राप्तः प्राप्यते योऽयमत्यन्तं त्यज्यतेऽथ वा । जानीयात्त मनात्मानं बुद्ध्यन्तं वपुरादिकम्" इति प्रतिपादिते च ।

अनादर पु० आ+दृ-अच् आदरः गौरवहेतुका सम्माननाविरोधे नञ् त० । परिभवे, तिरस्कारे च तस्य आदरविरोधित्वात् । ब० । आदरशून्ये त्रि० ।

[ब०।

अनादि पु० आदिः कारणम् पूर्व्वकालो वास नास्ति यस्य परमेश्वरे । नास्ति आदिः प्राथमिकोयस्मात् ५ब० । हिरण्यगर्भे पु० तस्य सृष्टेः प्रथमोत्पत्तेः । आदिशून्ये त्रि०

अनामन् न० अननमनः अन-अच् अनं जीवनम् अमयति रुजति अम-अनि । अर्शोरोगे । नामशून्ये मलमासे पु० तस्य वैदिककर्म्मानर्हतयाऽनामत्वात् । नामशून्ये त्रि० ।

अनामय पु० अम-घञ् आमं तापं यात्यनेन या-क आमयो रोगः न० त० । रोगाभावे आरोग्ये । न० ब० । रोगशून्ये त्रि० ।

अनामा स्त्री० ब्रह्मणःशिरश्छेदनसाधनतया ग्रहणायोग्यत्वात् नास्ति नाम ग्रहणयोग्यं यस्याः ब० मनन्तत्वात् डाप् । स्वनामप्रसिद्धायां मध्यमाकनिष्ठयोः मध्यगायामङ्गुल्याम् । स्वार्थे क अनामिकाप्यत्र । तथा हि शिवेन ब्रह्मशिरश्छिन्नमितिपुराणे प्रसिद्धम् अतएव तस्यां पवित्रीकरणार्थं पवित्रनामककुशधारणं क्रियते ।

अनायास पु० आ-यस घञ् अल्पार्थे न०त० । प्रयत्नाभावे, अल्पप्रयासे, अक्लेशे च । ब० । प्रयत्नशून्ये त्रि० ।

अनयासकृत न० अनायासेन अल्पप्रयत्नेन कृतं न०त० । अल्पायासेन साध्ये क्वाथादौ ।

अनारत न० आ-रम-क्त आरतं विरतिः अत्यन्ताभावे न०त० । सन्तते, अविरते अविच्छेदे च । ब० । तद्वति त्रि० ।

अनार्जव पु० ऋजोर्भाव आर्ज्जवं सरलता स्वाच्छन्द्यं नञा ७ब० । रोगे । अव्ययी० । ऋजुत्वाभावे अव्य० । ६ब० । कुटिले त्रि० ।

अनार्य्यक(ज) न० । अनार्य्यदेशे आर्य्यावर्त्तादिभिन्ने द्वीपान्तरादौ भव अनार्य्य+क । अगुरुकाष्ठे । जइति पक्षे तस्मिन् जायते जन-ड । अनार्य्यदेशजाते त्रि० ।

अनार्य्यतिक्त पु० अनार्य्यप्रियस्तिक्तः शाक० त० । चिराता इति ख्याते भूनिम्बे वृक्षे ।

अनावृत्ति स्त्री० आ+वृत-क्तिन् अभ्यासः आगतिश्च न० त० । अभ्यासाभावे, आगमनाभावे च । ब० । तद्वति त्रि० ।

अनावृष्टि स्त्री० आ-ईषत्-वृष क्तिन् न० त० । ईषद्वृष्टेरप्यभावे शस्योपघातकोपद्रवे ईतिभेदे ।

अनाशक पु० । आ सम्यक् यथेच्छम् आशः अशनम् आ+अश घञ् न०त० । यथेच्छभोगाभावे, तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन तपसाऽनाशकेनेति श्रुतिः ।

अनाशिन् पु० न नश्यति नश-णिनि न०त०, न अश्नाति कर्म्मफलं अश णिनि न०त० वा । नाशशून्ये, कर्म्मफलाभोक्तरि च परमेश्वरे ।

अनाश्वन् त्रि० न+अश-क्वसु नि० । अशनमकृतवति ।

अनास्था स्त्री० आ+स्था-अङ् आस्था आदरः न०त० । अनादरे । ब० । आदररहिते त्रि० ।

अनाहत न० आ-हन-भावे क्त आहतं छेदो भोगो वा न०ब० । छेदभोगादिरहिते नवीने वस्त्रे । तन्त्रशास्त्रे प्रसिद्धे हृदयस्थिते द्वादशदलपद्मे "शब्दो ब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते अनाहताख्यं तत् पद्मं मुनिभिः परिकीर्त्तितमित्युक्तलक्षणे च अस्मिन् पक्षे च आहतमाघातः कण्ठताल्वाद्यभिघातः तदस्ति यस्य तादृशः शब्दे अस्यास्ति अर्श आदित्वात् अच् । अनाहतशब्देन च परापश्यन्ती मध्यमावैखरीतिप्रसिद्धानां वाग्वृत्तीनां मध्ये मध्यमा वाक् कथ्यते तस्याः हृदयपद्मे उत्पन्नत्वात् । न० । आघातरहिते वस्तुमात्रे त्रि० ।

अनिकेत त्रि० नास्ति निकेतः नियमेन वासो यस्य ब० । नियतनिवासशून्ये परिव्राजके ।

अनिमि(मे)ष पु० नास्ति निमिषः चक्षुःस्पन्दनं यस्य मिषघञ् कुटादि० न गुणः मिष भ्वादि घञ्-वा ६ब० । चक्षुःस्पन्दनशून्ये देवे मत्स्ये च । निमेषो दृष्टिप्रतिबन्धकस्तच्छून्ये विष्णौ च । न निमिषति चलतीति नि+मिष-क न०त० । काले । क्रियाशून्ये वस्तुमात्रे त्रि० ।

अनियन्त्रित त्रि० नि+यन्त्र चु० क्त न०त० । अनियमिते, उच्छृङ्खले च ।

अनिरुद्ध पु० न केनापि युद्धेन निरुद्धः नि+रुध-क्त न०त० । कामदेवपुत्रे, उषापतौ, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूहस्य परमेश्वरस्य अनिरोध्यस्य अत्यन्तचलस्य चेतसोऽधिष्ठातरि अनिरुद्धाख्ये अंशे च अप्रतिरुद्धे त्रि० ।

अनिरुद्धपथ न० न निरुद्धः पन्था यत्र ब० । आकाशे तत्र कस्यापि गतिरोधनाभावात् । रुद्धवर्त्मभिन्ने त्रि० ।

अनिर्द्देश्य त्रि० निर्द्देश्यं जातिगुणक्रियासंज्ञाभिर्निर्द्देष्टुमशक्यम् निर्+दिश-शक्यार्थे ण्यत् न०त० । निर्विशेषे निर्धर्म्मके

10219731

परमात्मनि तस्य जातिगुणाद्यभावेन इदं तदिति निर्देशायोग्यत्वात् ।

अनिर्व्वचनीय पु० निर्वचनं निरुक्तिः लक्षणादिना ज्ञापनं तद्गोचरतया निर्वक्तुमशक्ये वियदादौ, परात्मनि च ।

अनिल पु० अनित्यनेन अन- इलच् । वायौ, तेनैव सर्व्वेषां प्राणधारणात् तद्देवताके स्वातिनक्षत्रे, “ वाताः पञ्चाशदूनका” इत्युक्तगणदेवताभेदे,अष्टवसुमध्ये पञ्चमे वसौ च ।

अनिलघ्नक पु० अनिलं वातरोगं हन्ति हन्-क ततः प्राशस्त्ये क । वयड़ा इति ख्याते वृक्षे तत्फलस्य वातनाशकत्वात् ।

अनिलसख पु० अनिलस्य वायोः सखा टच् । वह्नौ ।

अनिलान्तक पु० अनिलो वातरोगस्तस्यान्तकः अन्तं करोतीति अन्त+णिच् ण्वुल् । जीयापुति इति ख्याते वृक्षे ।

अनिलामय पु० अनिलकृत आमयः शाक० त० । वातरोगे ।

अनिवार त्रि० नास्ति निवारो निवारणं यस्य । अविच्छेदे, सतते, अनिवार्य्ये च ।

अनिश त्रि० निशा चेष्टाव्याघातः सा नास्ति यस्य ब० । अविरते, निरन्तरे, सदाभवे वस्तुनि, रात्रिवर्ज्जिते च ।

अनिष्ट त्रि० इष-क्त विरोधे नञा त० । इष्टस्य सुखादेर्विरोधिनि प्रतिकूलवेदनीये दुःखे, तत्साधने,पापे, विषादौ, अपकारे च । नागबलायां स्त्री० ।

अनीक न० अनित्यनेग अन-ईकन् । सैन्ये, तस्य हि जीवनरक्षकत्वात् । न नीयते अपसार्य्यतेऽस्मात् । नी-क्विप् ब० कप् ह्रस्वाभावः । युद्धे,ततो हि प्रायोमरणान्नापसारणम् ।

अनीकस्थ पु० अनीके युद्धे तिष्ठति स्था-क । युद्धगते सैन्ये ।

अनीकिनी स्त्री० अनीकं युद्धं प्रयोजनतया अस्त्यस्याः अनीक +इनि । सेनायाम्, हस्त्यादिसंख्याविशेषवत्यां सेनायाञ्च तत्संख्या च हस्तिनः २१८७ । रथाः २१८७ । अश्वाः ६५६१ । पदातयः १०९३५ समुदिताः २१८७० ।

अनीश पु० नास्ति ईशो नियन्ता यस्य ब० । सर्व्वनियन्तरि विष्णौ । न०त० । ईश्वरभिन्ने स्वामिभिन्ने च त्रि० ।

अनीह त्रि० ईह-अङ् न०ब० । स्पृहाशून्ये निश्चेष्टे च ।

अनु अव्य० अन-उ । सहार्थे, पश्चादर्थे, सादृश्ये, लक्षणे, हीने, व्याप्तौ, कस्मिंश्चित्प्रकारप्राप्तज्ञापने, भागे, अनुक्रमे, आयामे, समीपे च ।

अनुक त्रि० अनुकामयते अनु+कम-ड । कामनावति ।

अनुकम् अव्य० अनुकामयते अनु-कम् क्विप् । वितर्के ।

अनुकम्पा स्त्री० अनु+कम्प-अ । दयायाम्, किञ्चिच्चलने च ।

अनुकरण न० सादृश्ये-अनु+कृ-ल्युट् । अनुकरणे । तच्च देशभाषावयवादिभिः सदृशीकरणम् । अनुक्रियतेऽनेनेति करणे ल्युट् । सदृशीकरणसाधने । यथा पटत्प्रभृति शब्दाः अव्यक्तशब्दस्यानुकरणानि ।

अनुकर्ष(ण) पु० अनुकृष्यते स्वसंबद्धेन चक्रेण अनु+कृष घञ् । रथाधःस्थिते चक्रोपरिबद्धे काष्ठे, पूर्व्वसूत्रोपात्तपदादेरुत्तरत्रान्वयार्थमाकर्षणे च । कर्त्तरि ल्यौ नान्तोऽप्यत्रार्थे ।

अनुकल्प पु० कल्प्यते विधीयते इति कृप-णिच्-अच् कल्पो- विहितः अनु हीनः कल्पो मुख्यकल्पादधमः प्रा०स० । गौणकल्पे, प्रतिनिधौ च । यथा मध्वभावे गुडः ।

अनुकामीन त्रि० कामस्य अभिलाषस्य सदृशमनुकामं सादृश्येऽव्ययी० ततः गच्छतीर्थे ख । यथेष्टगमनशीले ।

अनुकार पु० अनु-कृ-घञ् । देशभाषादिभिः सदृशीकरणे ।

अनुकूल त्रि० कूलमावरणं स्नेहेनानुबन्धमिति यावत् अनुगतस्तं गतिस० । सहचरे, सहाये, स्वपक्षपातिनि, अलङ्कारशास्त्रप्रसिद्धे नायकभेदे च । सा० ३परि० ।

अनुक्रम पु० अनु+क्रम-घञ् न वृद्धिः । परिपाट्याम् । आनुपूर्व्ये अव्ययी० । यथाक्रमे अव्य० ।

अनुक्रमणिका स्त्री० अनुक्रम्यते यथोत्तरं परिपाट्या आरभ्यतेऽनया अनु+क्रम-करणे ल्युट् स्त्रीत्वात् ङीप् स्वार्थे के ह्रस्वः । अनुक्रमज्ञापके, ग्रन्थाद्यंशे वक्तव्यस्य, ग्रन्थशेषे च उक्तार्थस्य,अर्थसमुदायस्य संग्राहके पुराणादेरंशविशेषे । स्वार्थे काभावेऽनुक्रमणीत्यपि, तत्रैव ।

अनुक्रोश पु० अनुक्रोशत्यनेन क्रुश आह्वाने रोदने च घञ् । दयायाम् । अनुगतः क्रोशं गतिस० । प्राप्तक्रोशके त्रि० ।

अनुग त्रि० अनु+गम ड । पश्चाद्गामिनि, सहचरे, आनुलोम्यं गते च ।

अनुगत त्रि० अनु+गम-क्त । पश्चाद्गते, सहगते, आनुलोम्यं, गते, सामान्यधर्म्मग्रहणेन संगृहीतेऽखिले विशेषे च ।

अनुगम पु० अनु+गम घञ् वृद्ध्यभावः । पश्चाद्गमने,सहायीभवने, आनुलोम्यकरणे, सामान्यधर्म्मेण सर्व्वेषां विशेषरूपाणां संग्रहे च ।

अनुगुण त्रि० अनुकूलो गुणो यस्य । अनुकूले अनुगते च ।

अनुग्रह पु० अनु+ग्रह-अप् । अभीष्टसम्पादनेच्छारूपे प्रसादे, आनुकूल्ये, अनिष्टनिवारणपूर्व्वकेष्टसाधनेच्छारूपायामभ्युपत्तौ,“विरूपोन्मत्तनिःस्वानामकुत्सापूर्व्वकं हि यत् । पूरणं दानमानाभ्यामनुग्रह उदाहृत” इत्युक्त लक्षणे दरिद्रादिपोषणे च । ग्रहो ग्रहणं सूर्य्यादिग्रहो वा अनुगतस्तम् गति स० । ग्रहणानुगते सूर्य्यादिग्रहानुगते च त्रि० ।

अनुचर त्रि॰ अनु+चर-ट। सहचरे,पश्चाद्गामिनि, दासादौ, स्त्रियां ङीप्। अनुगतश्चरं दूतं गतिस॰। दूतानुगे त्रि॰।

अनुज त्रि॰ अनु पश्चात् जायते जन-ड। पश्चाज्जाते सहोदरे भ्रातरि। तादृश्यां भगिन्यां स्त्री॰।

अनुजीविन् अनुजीवितुमाश्रयितुं शीलमस्य अनु+जीव-णिनि। सेवके, आश्रिते च।

अनुज्ञा स्त्री॰ अनु+ज्ञा-अङ्। स्वयंप्रवृत्तस्यान्यस्य प्रवृत्ति-विघाताकरणेन प्रवर्त्तनारूपायामनुमतौ।

अनुतर्ष न॰ अनुतृष्यतेऽनेन करणे घञ्। सुरापानपात्रे, मद्ये,मद्यपाने च। भावे घञ्। अभिलाषे पानेच्छायाम्।

अनुताप पु॰ अनु+तप-घञ्। इदमनुचितं कृतमिति स्वकृतवस्तुनो दुःखजनकतया ज्ञानेन पश्चात्तापे।

अनुत्तर त्रि॰ उत्तरउत्तमः नञा ५ब॰। अत्यन्तश्रेष्ठे। ६ब॰। उत्तरवाक्यरहिते। न॰त॰। उत्तरदिग्भिन्ने स्त्री॰।

अनुदात्त पु॰ उच्चैरात्तः उच्चारित उदात्तः न॰त॰। वर्णोच्चारणस्थानेषु कण्ठादिषु नीचोच्चारणप्रयत्नविशेषे स्वरभेदे।

अनुदित पु॰ उत्+इण्+क्त ईषदर्थे न॰त॰। किरणमात्रेण ईषदुदितसूर्य्ये प्रविरलतारके काले। उदितेऽनुदिते चैवेति मनुः।

अनुद्रुत त्रि॰ अनु+द्रु-क्त। पश्चाद्गते, "अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धञ्चाप्यनुद्रुतमित्युक्तलक्षणे वादनविषये कालविशेषे च।

अनुधावन न॰ अनु+धाव-ल्युट्। पश्चाद्गमने, तत्त्वनिश्चयायानुसरणे, अनुसन्धाने च।

अनुध्या स्त्री॰ अनु+ध्यै-अङ्। अनुचिन्तने, अनुग्रहे, आसक्तौ च। [सान्त्वने च।

अनुनय पु॰ अनु+नी-अच्। विनये, प्रणिपाते, प्रार्थने,

अनुनासिक पु॰ अनुगता नासां गतिस॰ तत्रोच्चार्य्यमाणार्थे ठ। नासानुगतेन मुखेनोच्चार्य्यमाणेषु वर्ग्यान्त्येषु ङञादिषु।

अनुपद अव्य॰ पदस्य पश्चात् अव्ययी॰। पश्चाद्गमने, अव्यवधाने च। अनुगतं पदम् गतिस॰। पश्चाद्गामिनि त्रि॰।

अनुपदिन् त्रि॰ अनुपदम् अन्वेष्टा अनुपद+अन्वेष्टरीत्यर्थे इनि। अन्वेषणकर्त्तरि। गवामेवान्वेष्टरीत्यन्ये। स्त्रियां ङीप्।

अनुपदीना स्त्री॰ अनु पदस्य आयामतुल्यायामः आयामेऽव्ययी॰ अनुपदं बद्धेत्यर्थे ख। पादतुल्यायामवत्यां पादबद्धायां पादुकायाम् मोजा इत्यादि ख्यातायाम्।

अनुपपत्तिः स्त्री॰ उप+पद-क्तिन्। उपपत्तिर्युक्तिः न॰त॰। युक्त्यभावे, असङ्गतौ च।

अनुपम त्रि॰ उप+मा-अङ् न॰ब॰। उपमाशून्ये, सादृश्यरहिते उत्तमे च। कुमुदाख्यस्य दिग्गजस्य योषिति स्त्री॰।

अनुपरत त्रि॰ उप+रम-क्त न॰त॰। अविरते अनिवृत्तेच्छे च।

अनुपलब्धि स्त्री॰ उप+लभ-क्तिन् न॰त॰। लाभाभावे, प्रत्यक्षाभावे च। तत्र च कारणानि "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहारादिति सांख्यकारिकोक्तानि।

अनुपसंहारिन् पु॰ न्यायमते परिभाषिते दुष्टहेतुविशेषे। स च दृष्टान्तरहितोन्वयी व्यतिरेकी वा दुष्टहेतुः। यथा सर्व्वमनित्यं प्रमेयत्वादित्यनुमाने सर्व्वस्यापि पक्षत्वेन अन्वये दृष्टान्तो नास्ति नापि व्यतिरेके दृष्टान्तः सर्व्वस्यापि प्रमेयतया तदभावस्य कुत्राप्यसिद्धेः।

अनुपाकृत त्रि॰ उप-आ-कृ-क्त न॰त॰। मन्त्रैर्यज्ञे प्रोक्षणार्च्चनादिसंस्कार उपाकरणं तद्रहिते।

अनुपात पु॰ अनु+पत-करणे घञ्। अङ्कशास्त्रे प्रसिद्धे त्रैराशिके, पूर्व्वाङ्कपातानुसारेणापराङ्कपातने च। भावे घञि, पश्चात् पतने।

अनुपातक न॰ अनुपातयति स्वानुरूपं नरकं गमयति अनु+पत-णिच्-ण्वुल्। ब्रह्महत्यादिमहापातकसदृशे वेदनिन्दादिजन्ये पापविशेषे। तानि च पञ्चत्रिंशत्प्रकारहेतूद्भवत्वेन तावत्संख्यातानि प्राय॰ वि॰ अनुपा॰ प्र॰।

अनुपान न॰ अनु भेषजेन सह पश्चाद्वा पीयते कर्म्मणि ल्युट्। औषधाङ्गे तेन सह, तत्पश्चाद्वा पेये मधुगुड़ादौ। पानस्य जलस्य समीपे अव्ययी॰। जलसामीप्ये अव्य॰।

अनुपूर्व्व पु॰ अनुगतं पूर्व्वं परिपाटीं गतिस॰। यथाक्रमे।

अनुप्रासः पु॰ अनुगतः रसाद्यनुगुणं प्रकृष्ट मासं वर्णन्यासं समवर्णरचनां समवर्णोच्चारणं वा अनु-प्र-अस् घञ्। अलङ्कारे प्रसिद्धे स्वरवैषम्येऽपि समवर्णानां रचनायाम्।

अनुप्लव पु॰ अनु-प्लु-अच्। सहाये, अनुचरे, दासे च।

अनुबन्ध पु॰ अनु+बन्ध-यथायथं भावादौ घञ्। बन्धने, इच्छापर्व्वकदोपकरणे, वातपित्तादिदोषाणामप्राधान्ये, प्रकृतिप्रत्ययागमादेशानां गुणवृद्ध्यादिकार्य्यविशेषार्थमनुबध्यमाने परिनिष्पन्नपदकालेषु अश्रूयमाणतया नश्वरे इत्संज्ञया कृतलोपे वर्णादौ, मुख्यानुयायिनि अप्रधाने, प्रकृतस्यानुवर्त्तने,संबन्धे, पाश्चात्त्याव्यशुभपरिणामे, शास्त्रस्यादौ वक्तव्येषु अधिकारिविषयप्रयोजनसम्बन्धेषु,लेशे,फलसाधने च।

अनुबन्धिन् त्रि॰ अनुबध्नाति अनु+बन्ध-णिनि। सहचरे, अनुचरे, अनुरोधिनि, व्यापके च। स्त्रियां ङीप्।

अनुबन्धी स्त्री॰ अनुबध्यतेऽतिश्वासेन व्याप्रियतेऽनया अनु+

बन्ध-घञ् गौरा० ङीष् । हिक्कारोगे, तृष्णायाञ्च ।

अनुबन्ध्य त्रि० बधार्थं बध्योऽनुबध्यः ण्यत् । बधार्थं बद्धे गवादौ ।

अनुबोध पु० अनु-बुध णिच् घञ् । पूर्व्वलिप्तचन्दनादेर्गन्धोद्दीपनार्थं पुनर्मर्द्दनादौ पश्चाद्बोधे च ।

अनुभव पु० अनु+भू-अप् । स्मृतिभिन्ने ज्ञाने ।

अनुभाव पु० अनुभावयति उद्बोधयत्यनेन अनु+भू-णिच्-करणे-घञ् । कोषदण्डादिजाते राज्ञां तेजोविशेषे । सामर्थ्ये च । कर्त्तरि अचि । अलङ्कारशास्त्रप्रसिद्धे रसव्यञ्जके । "भावं मनोगतं साक्षात् स्वगतं व्यञ्जयन्ति ये । तेऽनुभावा इति ख्याताः, इत्युक्तलक्षणे भ्रुभङ्गादौ ।

अनुमत त्रि० अनु+मन-क्त । स्वयंप्रवृत्ते इदं क्रियतामिति प्रोत्साहनार्थमनुज्ञाते ।

अनुमति स्त्री० अनु+मन-क्तिन् । अनुमतौ अनुज्ञायाम् । अनुमन्यते कलाहीनत्वेऽपि पूर्णिमाविहितयागादिकरणायानुज्ञायतेऽस्याम् अधिकरणे क्तिन् । कलाहीनचन्द्रवत्यां शुक्लचतुर्द्दशीयुतपूर्णिमातिथौ ।

अनुमन्तृ त्रि० अनु+मन-तृच् । स्वयमुदासीने कार्य्यादौ प्रवृत्तस्यान्यस्योत्साहवर्द्धनार्थमनुज्ञाकर्त्तरि ।

अनुमरण न० अनु+मृङ-ल्युट् । भर्त्तरि मृते तद्देहाप्राप्तौ तत्पादुकादिग्रहणेन पृथक्चितारोहणेन स्त्रीणां देहत्यागे ।

अनुमान न० अनु-मि-मा-वा भावादौ ल्युट् । व्याप्तस्य दर्शनेन व्यापकस्य निश्चये, यथा वह्निर्धूमस्य व्यापक इति धूमस्तस्य व्याप्त इत्येवं तयोः भूयःसहचारं पाकस्थानादौ दृष्ट्वा पश्चात् पर्व्वतादौ उह्यमानशिखस्य धूमस्य दर्शने तत्र वह्निरस्तीति निश्चीयते । करणे ल्युटि । तद्धेतुभूते धूमादौ । श्रुतेरेव स्वतः प्रामाण्यं, यत्र श्रुतिः साक्षात् न श्रूयते तत्र स्मृतिवाक्यात् श्रुतिवाक्यमुन्नीयते इति श्रुत्यनुमापकं स्मृतिवाक्यमप्यनुमानपदेनाभिधीयते इति मीमांसकाः ।

अनुमिति स्त्री० अनु+मि-मा-वा क्तिन् । प्राग्दर्शिते भावसाधनानुमानशब्दस्यार्थे ।

अनुमोद पु० अनु+मुद-घञ् । प्रकृतकर्म्मणि प्रवृत्तिविघाताकरणेनान्यप्रोत्साहानुकूलव्यापारे, त्वया यत् कृतं तन्मेऽनुमतमित्याद्यभिलापसाधने ।

अनुयाज पु० अनु+यज-घञ् कुत्वाभावः । दर्शपौर्णमासाङ्गे प्रयाजादिषु पञ्चसु यागेषु ।

अनुयायिन् त्रि० अनु+या-णिनि । सदृशे, अनुचरे, दासादौ, पश्चाद्गामिनि च । स्त्रियां ङीप् ।

अनुयोग पु० अनुयुज्यते कथनाय नियुज्यते अनु+युज-घञ् । प्रश्ने । सति हि प्रश्ने, पृष्टः कथनाय प्रवर्त्तते ।

अनुराग पु० अनु+रन्ज+घञ् । अत्यन्तप्रीतौ, स्नेहे च । अनुगतो रागं गतिस० । अतिरागानुगे त्रि० ।

अनुराधा पु० अनुगता राधां विशाखां गतिस० । स्वनामप्रसिद्धे सप्तदशनक्षत्रे ।

अनुरूप अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी० । सादृश्ये, योग्यतायाञ्च । अर्शआद्यचि । सदृशे, योग्ये च त्रि० ।

अनुरोध पु० अनु+रुध-घञ् । अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च ।

अनुलाप पु० अनु वारंवारं लप्यते लप-घञ् । मुहुर्भाषणे ।

अनुलेप पु० अनु+लिप-भावे घञ् । चन्दनादिमर्द्दने । कर्म्मणि घञि । अनुलिप्यमाने चन्दनादौ ।

अनुलोम पु० अनु+लोमन्+यथाक्रमे अव्ययी० अच् । यथाक्रमे ।

अनुलोमज पु० अनुलोमेन यथाक्रमेण जातः जन-ड । परिणीतक्षत्रियादिस्त्रीषु विप्रादिभ्य उत्कृष्टेभ्यो वर्णेभ्यो जाते मूर्द्धाभिषिक्तादौ संकीर्णवर्णे ।

अनुवर्त्तन पु० अनुगतो वर्त्तनमाराध्यादेरिष्टसंपादनं गतिस० अनु+वृत-ल्युट् । अनुरोधे, आराध्यादेरिष्टसम्पादने च ।

अनुवाक पु० अनु+उच्यते-वच-घञ् कुत्वम् । गानशून्ये ऋग्विशेषे, ऋग्यजुःसमूहे, वेदांशे शास्त्रनाम्ना ख्याते च ।

अनुवाक्या स्त्री० अनु-वच-ण्यत् कुत्वम् । ऋग्विभेदः प्रशास्त्रा तत्पाठ्यायां देवताह्वानसाधने ऋचि ।

अनुवात पु० अनु-वा+क्त । शिष्यदेशाद् गुरुदेशगन्तरि वायौ ।

अनुवाद पु० अनु+वद-घञ् । ज्ञातार्थस्य प्रतिपादने, सिद्धस्योपन्यासे, प्रमाणान्तरावगतार्थस्य शब्देनोक्तौ, कथितस्य भाषान्तरेण कथने च ।

अनुवासन न० अनु+चु०-वस-ल्युट् । धूपादिना सौरभान्वितकरणे, स्नेहयुतकरणे च ।

अनुवृत्त त्रि० अनु+वृत-क्त । व्याप्ते, पालिते, अनुगते, प्रीतिविशिष्टे, अनुवृत्तिमति च ।

अनुवृत्ति स्त्री० अनु+वृत-क्तिन् । प्रवाहरूपेणानुगतौ, अनुरोधे, सेवायाम्, आनुकूल्ये, व्याकरणशास्त्रे प्रसिद्धे पूर्व्वसूत्रोपात्तपदादीनामुत्तरत्र सूत्रेष्वनुकर्षणरूपेऽध्याहारे च

अनुव्रज्या स्त्री० अनु+व्रज-क्यप् । अनुसरणादिरूपे सेवने ।

अनुशय पु० अनु+शीङ्-अच् । अत्यन्तद्वेषे, पश्चात्तापे, पूर्व्ववैरे च । अनुगतः शयं हस्तं गतिस० । हस्तानुगते त्रि० ।

अनुशयिन् पु० अनु+शीङ्-इनि । यावत्कर्म्मक्षयं चन्द्रलोके स्थित्वा सावशेषे एव कर्म्मणि पश्चात्तापान्विते भूमि-

लोके जन्मग्रहणायागन्तुं प्रवृत्ते जीवे। पश्चात्तापयुते त्रि० ।

अनुशासन न० अनु+शास-ल्युट् । शासने, आज्ञायाम्, उपदेशे, नियोगकरणे च । शिष्यते आख्यायते लक्षणादिनेति करणे ल्युटि। व्युत्पादने । व्युत्पादनञ्च अतथाभूतेभ्यो विशेष्य अनुशिष्याणां बोधनम् यथा व्याकरणे साधुशब्दानामसाधुभ्यो विविच्य प्रबोधनम् ।

अनुशीलन न० अनु चु० शील-ल्युट् । मुहुरालोचने, पुनः पुनरभ्यासे च ।

अनुशोचन न० अनु+शुच-ल्युट् । शोके । स्वार्थे णिचि युचि। अनुशोचना तत्रैवार्थे स्त्री० ।

अनुश्रव पु० अनुश्रूयते गुरुपरम्परयोच्चारणादनु अभ्यस्यते, श्रूयते एव नतु केनापि क्रियते वा अनु+श्रु+अप् । वेदे, तस्य श्रूयमाणतायाएव सर्व्वसम्मतत्वात् ।

अनुषङ्ग पु० अनु+सन्ज-घञ् कुत्वम् । दयायाम्, आसक्तौ, एकत्र श्रुतपदस्य अन्यत्रान्वयार्थमनुवृत्तौ, अन्योद्देशेन प्रवृत्तौ तत्क्रियानान्तरीयकतयान्यस्य सिद्धिरूपे स्मृतिशास्त्रप्रसिद्धे प्रसङ्गे च ।

अनुष्टुभ् स्त्री० अनु+स्तुन्भ+क्विप् षत्वम् । सरस्वत्याम्, अष्टाक्षरपादके छन्दोभेदे च । [करणे ।

अनुष्ठान न० अनु-स्था- भावे ल्युट् षत्वम् । विहितकर्म्मादि

अनुष्ण त्रि० उष्णः दक्षः न०त० । अलसे,उष्णभिन्ने शीते च। उत्पले न० । अलसोहि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्म्मणि जड़ इव भवति दक्षस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाय अजड इव सन् व्याप्रियते इति तयोरुष्णानुष्णता । अत्र कारिण्यर्थे कनि अनुष्णकोऽपि । [टापि अत इत्त्वम् । नीलदूर्व्वायाम् ।

अनुष्णवल्लिका स्त्री० अनुष्णा शीतला वल्लीव इवार्थे क ।

अनुसन्धान न० अनु+सम्+धाञ्-ल्युट् । अन्वेषणे,चिन्तने च।

अनुसरण न० अनु+सृ-ल्युट् । अनुगमने, सदृशीकरणे। भावे घञि अनुसारोऽप्यत्र ।

अनुस्यूत त्रि० अनु+षिव क्त ऊट् । ग्रथिते,सततसंबन्धे च ।

अनुस्वार पु० स्वृ-घञ् उदात्तादिस्वरवत्त्वात् स्वरवर्णाएव स्वाराः अनुगतः स्वारान् गतिस० । स्वराश्रयेण उच्चार्य्यमाणे बिन्दुरेखया व्यज्यमानेऽनुनासिके वर्णभेदे अनुस्वारो विसर्गश्चेत्युपक्रम्य आश्रयस्थानभागिनइत्युक्तेः तस्य तथात्वम् ।

अनुहरण पु० अनु+हृ ल्युट् । देशभाषाचेष्टादिना सदृशीकरणे, सादृश्यधर्म्माविष्करणे च । [शोके च न०।

अनूक पु० अनु+उच समवाये क कुत्वं नि०। गतजन्मनि । कुले

अनूचान पु० अनु+वच-कान नि० । शिक्षादिषडङ्गसहित वेदाध्ययनकारिणि, वेदार्थानुवचनसमर्थे च ।

अनून त्रि० ऊन-क न०त० । परिपूर्णे, समग्रे, अहीने च । नूनं निश्चितं न०त० । अनिश्चिते ।

अनूप त्रि० अनुगता आपोयत्र ७ब० अच् स० आत ऊत्त्वम् । जलप्राये देशे, तत्स्थले सर्व्वदावासिनि महिषे, "बहूम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः । देशोऽनूप इति ख्यात" इत्युक्ते देशविशेषे च पु० । अनूपसर इति प्रसिद्धे देशे वा ।

अनूपज न० अनूपे जलप्राये देशे जायते जन-ड ७त०। आदा इति ख्याते आर्द्रके, तस्य जलप्रायोद्भवत्वात् । तत्स्थानजातमात्रे त्रि० ।

अनूरु पु० न स्तः ऊरू यस्य ब० । सूर्य्यसारथौ अरुणे विनताज्येष्ठपुत्रे । तस्य अपूर्ण एव गर्भे मात्रा अण्डस्य स्फोटनादूरुप्रभृत्यङ्गविकलत्वं पुराणे प्रसिद्धम् ।

अनूरुसारथि पु० अनूरुः सारथिः रथनियन्ता यस्य । सूर्य्ये

अनृच पु० नास्ति अभ्यस्ततया ऋक् यस्य अच् समासान्तः । ऋक्शून्ये अनुपनीते बालके ।

अनृत न० ऋतं सत्यं न०त० । सत्यभिन्ने अयथार्थे । अनृतत्वव्यवहारस्तु प्रायेण कथने एव लोके दृश्यते क्वचित् वस्तुन्यपि यथा रङ्गे रजतादिकं,तत्र रजतमिदमिति ज्ञानस्य । तद्वति त्रि० । ७ब० । वाणिज्ये न० तत्रानृतबाहुल्यात् ।

अनेक त्रि० एक+न०त० । एकभिन्नेषु बहुषु । नञ्तत्पुरुषे उत्तरपदानुसारेणैव लिङ्गवचनतानियमेऽपि अत्र बहुवचनान्ततैव तेन पतन्त्यनेके जलधेरिवोर्म्मय इति माघः ।

अनेकप पु० अनेकाभ्यां मुखशुण्डाभ्यां द्वाभ्यां पिबति पा-क । द्विपे हस्तिनि । [रूपे ।

अनेकरूप त्रि० अनेकानि बहूनि रूपाण्यस्य ब० । चित्र-

अनेकान्त त्रि० न एकएवान्तः परिच्छेदो यस्य ब० । अनियतरूपे, अनतिशये च । [णिनि २त० । बौद्धभेदे ।

अनेकान्तवादिन् पु० अस्ति नास्ति वेत्येकान्तं न वदति वद-

अनेडमूक त्रि० एडो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् ५ब० । काला, बोवा इति ख्याते अवणवचनशक्तिरहिते, शठे च ।

अनेहस् पु० न हन्यते हन-असि प्रकृतेरेहादेशः । काले ।

अनैकान्तिक पु० एकान्तं नियतं व्याप्नोति एकान्त+ठक् न त० । व्यभिचारिणि दुष्टे हेतौ । यथा धूमसाधने वह्निर्हेतुः न एकान्तोनियमो व्याप्तिर्यत्र ७ब० । अनेकान्तोऽप्यत्रार्थे ।

अनोऽकह पु० अनसः शकटस्याकं गतिं हन्ति हन-ड । वृक्षे ।

अन्त न० अम-तन् । स्वरूपे, स्वभावे च । शेषे पु० न०। नाशे, प्रान्ते, सीमायां, निश्चये, अवयवे च पु०। निकटे, मनोहरे च त्रि० ।

अन्तःकरण न० कृ-करणे ल्युट् अन्तरभ्यन्तरं, तद्वृत्ति पदार्थानां ज्ञानादीनां वा करणं कर्म्म०, ६त० वा । ज्ञान-सुखादिसाधने आभ्यन्तरे इन्द्रिये मनोबुद्धिचित्तादिपदाभि लप्यमाने । अवान्तरभेदस्तु वृहदभिधाने ।

अन्तःकुटिल पु० अन्तर्मध्ये कुटिलः। वक्राकारमध्यावयववति शङ्खे । वक्रान्तःकरणे त्रि० ।

अन्तःपुर न० अन्तराभ्यन्तरं पुरं गृहं कर्म्म० । अन्दर इति प्रसिद्धे राज्ञां स्त्रीणां स्थानयोग्ये गृहे। तत्र स्थितत्वात् राजमहिलायामपि । पुर्शब्दसमासे अचि स्त्रीत्वात् ङीप् । अन्तःपुरीत्यपि ।

अन्तःसत्वा स्त्री० अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी यस्या ब० । गर्भिण्यां स्त्रियाम् ।

अन्तःस्वेद पु० अन्तःस्वेदो मदस्यन्दनं घर्म्मजलं यस्य ब० । मदस्राविणि हस्तिनि ।

अन्तक पु० अन्तं करोति अन्त+तत् करोतीत्यर्थे णि-ण्वुल् । यमे । नाशकारके त्रि० ।

अन्तकर त्रि०अन्तं नाशं करोति कृ-ट उप०स०। नाशकारके ।

अन्तग त्रि० अन्तमवसानं गच्छति गम-ड । पारगामिणि अवसानं गते च । क्त अन्तगत इत्यपि तत्रार्थे ।

अन्तर् अव्य० अन-अरन् तुडागमश्च । मध्ये, प्राप्ते, स्वीकारे चित्ते च ।

अन्तर न० अन्तं राति ददाति रा-क । अवकाशे, अवधौ, परिधानांशुके अन्तर्द्धाने, भेदे, परस्परवैलक्षण्ये विशेषे, तदर्थे, छिद्रे, आत्मीये, विनार्थे, वहिरर्थे, व्यवधाने, मध्ये, सदृशे च । उदाहरणानि तु वृहदभिधाने ।

अन्तरङ्ग त्रि० अन्तर्मध्येऽङ्गानि यस्य । आत्मीये, व्याकरण-शास्त्रे प्रसिद्धे प्रकृतिप्रत्ययकार्य्यमध्ये प्रकृत्याश्रिते कार्य्ये च ।

अन्तरा अव्य० अन्तरेति इण्-डा । निकटे, मध्ये, विनार्थे च ।

अन्तरात्मा पु० अन्तर्वर्त्ती आत्मा । अन्तःकरणे, सर्व्वान्तर्यामिणि परमेश्वरे, अन्तःकरणाभिमानिनि जीवे च ।

अन्तराय पु० अन्तरं व्यवधानमयते अय-अच् । विघ्ने । व्यवधानकारके त्रि० ।

अन्तराल न० अन्तरं मध्यसीमामाराति गृह्णाति आ-रा क रस्य लत्वम् । मध्ये अभ्यन्तरे च । स्वार्थे अणि आन्तरालञ्च ।

अन्तरिक्ष न० अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते ईक्ष-कर्म्मणि घञ्, अन्तः ऋक्षाणि यस्य वा पृषो० पक्षे ह्रस्वः ऋकारस्य रित्वं वा । पक्षिमेघसञ्चारयोग्ये भूलोकसूर्य्य-मध्यवर्त्तिनि आकाशप्रदेशे । अत्र अन्तरीक्षमपि ।

अन्तरित त्रि० अन्तर्+इण-कर्त्तरि क्त २त०। अन्तरं व्यवधानं करोतीति णिचि कर्म्मणि क्त वा । व्यवधानं गते, व्यवधापिते, तिरस्कृते च । [आतईत्त्वम् । द्वीपे ।

अन्तरीप पु० अन्तर्मध्ये गता आपोऽस्य ब० अच्स०

अन्तरीय न० अन्तरे भवं गहादित्वात् छ । परिधाने वस्त्रे "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तदच्छिन्नमुभयान्तयोरित्येवंलक्षणे ।

अन्तरे अव्य० अन्तरेति इण् विच् । मध्ये ।

अन्तरेण अव्य० अन्तरेति इण्-ण टवर्गादित्वेऽपि णस्य नेत्त्वम् । विनार्थे, मध्यार्थे च ।

अन्तर्गडु त्रि० अन्तर्मध्ये गडुरिव निरर्थकः। ग्रीवाप्रदेशे जातस्य गलमांसपिण्डस्य गडोर्यथा निरर्थकत्वम् तद्वन्निरर्थके । काव्यान्तर्गडुभूता या नालङ्कारः प्रहेलिकेति साहि०१०परि ।

अन्तर्गृह न० अन्तर्गृहस्य । गृहमध्ये, वाराणसीस्थे सप्तावरणवति स्थानविशेषे च ।

अन्तर्जठर न० अन्तर्जठरस्य । जठरमध्ये, कुक्षिमध्यस्थकोष्ठे च

अन्तर्जल न० अन्तर्जलस्य अव्ययी० । जलमध्ये, जलमध्ये-कर्त्तव्येऽघमर्षणमन्त्रजपे च। होममन्तर्जलादिनीति स्मृतिः ।

अन्तर्ज्योतिः न० अन्तः ज्योतिरिव प्रकाशकम् । अन्तरात्मनि ।

अन्तर्दधन न० अन्तर्दध्यते मादकता आधीयतेऽनेन । दध-करणे ल्युट् । किण्वप्रभृतौ मद्यवीजे ।

अन्तर्दाह पु० अन्तर्मध्ये दाहः दह-घञ् । देहाभ्यन्तरसन्तापे, कोष्ठसन्तापे च ।

अन्तर्द्वार पु० अन्तर्मध्ये द्वारम् । गृहमध्यस्थे गुप्तद्वारे ।

अन्तर्द्धान न० अन्तर्+धा-ल्युट् । तिरोधाने दृश्यपदार्थस्य दर्शनायोग्यस्थाने स्थितौ, मुन्यादीनां शरीरत्यागे च । अङि । अन्तर्द्धाप्यत्रैवार्थे स्त्री० ।

अन्तर्द्धि पु० अन्तर्+धा कि । आच्छादने, व्यवधाने, अन्तर्धाने च

अन्तर्भूत त्रि० अन्तर्मध्ये भूतः भू+क्त । मध्यस्थिते, अन्तर्गते च

अन्तर्मनस् त्रि० अन्तर्गतं वाह्यव्यापाराक्षमतया अन्तरेव स्थितं मनो यस्य । व्याकुलचित्ते, समाहितमनस्के च ।

अन्तर्यामिन् पु० अन्तर्मध्येऽनुप्रविश्य यमयति स्वस्वकर्म्मणि इन्द्रियादीनि जीवं वा व्यापारयति यम-णिच्+णिनि । वायौ, "अन्तराविश्य भूतानि यो बिभर्त्त्यात्मकेतुभिः । अन्तर्यामीश्वरः साक्षात् भवे"दित्युक्तेः आत्मकेतुभिः निज व्यापारैः प्राणादिवृत्तिभिरित्यर्थः । ईश्वरे, अन्तरेव

यमयतीत्यादिवृहदारण्यकान्तर्यामिब्राह्मणोक्तेः । अन्तर्गतवस्तुज्ञातरि त्रि० ।

अन्तर्वंशिक त्रि० अन्तर्वंशे राज्ञामाभ्यन्तरगृहे नियुक्तः नियुक्तार्थे ठ। अन्तःपुरे रक्षणार्थं नियुक्ते कुब्जवामनादौ ।

अन्तर्वत्नी स्त्री० अन्तरस्य अस्ति गर्भः । अन्तर्+मतुप् नि० । गर्भवत्यां स्त्रियाम् ।

अन्तर्वमि पु० अन्तःस्थित एव वामयति उद्गारशब्दं कारयति वम शब्दे इन् णस्य मत्वम् । (ढेकुर) इत्यादि ख्यातस्योद्गारशब्दस्य कारके अजीर्णनामके रोगभेदे ।

अन्तर्वाणि त्रि० अन्तर्गता अन्तःकरणे स्थिता शास्त्रवाक्यात्मिका वाणी यस्य ब० न कप् ह्रस्वश्च । बहुशास्त्रवाक्याभिज्ञे पण्डिते ।

अन्तर्वेदी स्त्री० पृथिव्यामध्यस्थितत्वादन्तर्वेदीव । हरिद्वारावधिप्रयागपर्य्यन्ते शशस्थलीति ब्रह्मावर्त्त इति च ख्याते देशे ।

अन्तर्हित त्रि० अन्तर्-धा-क्त । गुप्ते, तिरोभूते च ।

अन्त (न्ते) वासिन् पु० अन्ते समीपे वस्तुं शीलमस्य वस-णिनि सप्तम्या वा लुक् । शिष्ये । स्त्रियां ङीप् । समीपवर्त्तिनि त्रि०

अन्तशय्या स्त्री० शयनं शय्या शीङ्-क्यप् अन्तस्य नाशार्थं शय्या चतुर्थ्यर्थे ष्त० । मरणार्थं भूमिशय्यायाम्, तद्धेतुत्वात् श्मशाने च । अन्त एव शय्या निर्व्यापारार्थकत्वात् कर्म्म० । मरणे ।

अन्तःस्था त्रि० अन्तःस्पर्शोष्मणोर्मध्ये तिष्ठतीति स्था-क्विप् । यरलवाख्येषु वर्णेषु । वा विसर्गलोपतोऽन्तस्था अपि ।

अन्तावसायिन् पु० नखकेशानामन्तमवसातुं छेत्तुं शीलमस्य अव+सो-णिनि युक् च । नापिते । अन्ते वृद्धे वयसि अवस्यति निश्चिनोति तत्त्वम् । मुनिभेदे । अन्ताय स्वतोपक्तते जन्तुनाशाय अवस्यति । प्राणिहिंसके चाण्डालादौ ।

अन्ति (का) स्त्री० अन्त्यते संबध्यते अन्त-इ । नटाभिनयनकाले तदुक्तौ ज्येष्ठभगिन्याम् । स्वार्थे के टापि अन्तिकेत्यपि

अन्तिक त्रि० अन्त्यते संबध्यते सामीप्येन, अन्त-घञ् सोऽस्यास्तीति मत्वर्थीयः ठन् । सामीप्यवति । स्वार्थे ठनि सामीप्ये पु० । चूल्लाम् न० । ओषधिभेदे स्त्री० ।

अन्तिकाश्रय पु० अन्तिके समीपे आश्रीयते आ+श्री-अच् । निकटस्थे, अवलम्बनस्थाने च ।

अन्तिम त्रि० अन्ते भवः अन्त+डिमच् । अन्तभवे, चरमे च ।

अन्त्य पु० अन्ते पर्य्यन्ते वसतीति अन्त+यत् । चाण्डाले । मुस्तायाम् स्त्री० । अन्तिमे वस्तुनि त्रि० । यथा नक्षत्राणां मध्ये रेवती, राशीनां मध्ये मीनः वर्णानां मध्ये हकार इत्यादि । संख्याभेदे न० "जलधिश्चान्त्यं परार्द्धमिति दशगुणोत्तरा संख्ये"ति भास्कराचार्य्योक्तेः परार्द्धदशभागे ।

अन्त्यज पु० अन्त्योऽधमः जायते जन-ड । शूद्रे, स हि वर्णानां विप्रादीनां चतुर्णां मध्ये अधमो जातः । "रजकश्चर्म्मकारश्च नटो वरुड़ एव च । कैवर्त्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृता" इति स्मृत्युक्तेषु सप्तसु रजकादिषु च । अधमजातमात्रे त्रि० ।

अन्त्यजन्मन् पु० अन्त्यं जन्म यस्य । शूद्रे । स हि विप्रक्षत्रियवैश्यजन्मानन्तरं ब्रह्मणः पादात् शेषे जातः ।

अन्त्यावसायिन् पु० "निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम् । श्मशानगोचरं सूते, इति मनूक्तेः निषादस्त्रियां चण्डालजाते मुरदाफरास इति ख्याते सङ्कीर्णवर्णे । "चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा । मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः, इत्यङ्गिरसोक्तचाण्डालादिषु च ।

अन्त्येष्टि स्त्री० इष्टि यागः यज-क्तिन् अन्त्या इष्टिः । मृतस्य दाहादिरूपे चरमसंस्कारे "नान्त्येष्टिर्नास्थिसञ्चय" इतिस्मृतिः

अन्त्र न० अन्त्यते देहो बध्यतेऽनेन । अति बन्धने त्रल् । देहबन्धके "उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः अर्द्धव्यामेन हीनानि स्त्रीणामन्त्राणि निर्द्दिशेत् ।" इति वैद्यकोक्तपरिमाणवति नाड़ीभेदे ।

अन्दुक पु० अन्द्यते बध्यतेऽनेन अदि बन्धने कु स्वार्थे के ह्रस्वः अभिधानात् पुंस्त्वम् । हस्तिपादबन्धने निगड़े, पादकीले च ।

अन्दू स्त्री० अन्द्यते बध्यतेऽनेन अदि+कू । निगड़े स्त्रीपादभूषणे च । [न्दिधत् त ।

अन्ध दृष्टिनाशे अद० चु० उभ० अक० सेट् । अन्धयति ते आ-

अन्ध पु० न० अन्धयति चक्षुषा न पश्यति अच् । चक्षुर्हयहीने । अन्ध्यतेऽनेनेति करणे घञ् । अन्धकारे जले च न० ।

अन्धक पु० अन्धयति अन्ध-ण्वुल् । देशभेदे, मुनिभेदे, यदुवंश्य नृपभेदे, हिरण्याक्षसुते दैत्यभेदे च । तमसि न० ।

अन्धकरिपु पु० अन्धकासुरस्य रिपुः । शिवे, अन्धकस्य तमसो रिपौ सूर्य्ये, चन्द्रे, वह्नौ च ।

अन्धकार पु० न० अन्धं करोति कृ-अण् उप० स० । तेजोऽभावे तमसि ।

अन्धकूप पु० अन्धयतीत्यन्धः स चासौ कूपः । सान्धकारे कूपे । अन्धः कूपो यत्र ७ब० । नरकभेदे । अन्धस्य दृष्ट्यभावस्य कूपइव । मोहे । स हि सर्व्वदृष्ट्यभावस्याकरः ।

अन्धतमस न० अन्धयति अन्ध+अच् ताम्यति अनेनेति तम्-असि कर्म्म० अच् समासान्तः । निविड़ान्धकारे ।

अन्धतामिस्र न० तमिस्रा तमस्ततिः तमिस्रैव तामिस्रं अन्धयतीत्यन्धम् कर्म्म० । निविड़ान्धकारे । अन्धम् अन्धकारकं तामिस्रं यत्र ७ब० । नरकविशेषे । सांख्यशास्त्रे प्रसिद्धे भयविशेषविषयकेऽभिनिवेशे पु० ।

अन्धमूषिका स्त्री० अन्धं दृश्यभावं मुष्णाति मुष-ण्वुल् दीर्घः । देवताडद्वृक्षे तत्सेवने हि चक्षुष्मत्ता भवतीति वैद्यकप्रसिद्धम् ।

अन्धस् न० अद्यते अद-असुन् नुम् धश्च । ओदने ।

अन्धिका स्त्री० अन्धयति अन्ध-ण्वुल् । रात्रौ, द्यूतभेदे सर्षाम्, सिद्धाख्यौषधौ, आन्दुलीति ख्याते नेत्ररोगभेदे च ।

अन्धु पु० अन्ध-कु । कूपे ।

अन्धुल पु० अन्ध-उल । शिरीषवृक्षे ।

अन्ध्र पु० अन्ध-र । देशभेदे, तत्रस्थलोके, जातिभेदे च ।

अन्न न० अनित्यनेन अन-नन् अद्यते इति वा अद-क्त अन्नार्थतया न जग्धिः । ओदने, सिद्धान्ने, "शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते । आमं तु वितुषं ज्ञेयं स्विन्नमन्नमुदाहृतम्" इति स्मृतेः व्रीहियवादावामान्ने, पृथिव्याम्, अन्नहेतुत्वात् तस्या अन्नत्वम् अतएव वेदान्ते तेजोऽबन्नात्मिकां प्रकृतिरित्युक्तम् । उपचारात् उपकरणे च ।

अन्नकोष्ठक पु० अन्नस्य व्रीह्यादेः स्वल्पं कोष्ठमिव अल्पार्थे क । कुटी इति ख्याते धान्यादेः स्थापनस्थाने ।

अन्नगन्धि पु० अन्नस्य गन्धइव गन्धो यस्य ब० इत्समासान्तः । अतिसारे, उदरामये च रोगे । अन्नस्य गन्धो लेशो यत्र ब० इत्समसान्तः । अल्पान्ने भोजनादौ त्रि० ।

अन्नप्राशन न० प्रकृष्टं विधानेन प्रथममाशनं प्राशनं ६त० । षष्ठाष्टममासादौ बालकादेर्विधानेन प्रथममन्नभोजने ।

अन्नमय पु०अन्नस्य विकारः अन्न+विकारार्थे मयट् । स्थूलशरीरे । अन्नविकृतिमात्रे त्रि० । अन्नमयं हि सौम्य मन इति श्रुतिः ।

अन्नविकार पु० वि+कृ-घञ् ६त० । अन्नस्य विकारे शोणितमांसादिपरिणामजे चरमधातौ शुक्रे । वि+कृ-घञि । अन्नस्य विक्षेपे ।

अन्नाशन न० अन्नस्य विधानेन आशनम् । अन्नप्राशनार्थे ।

अन्य त्रि० अन-यत् । भिन्ने, सदृशे च । सर्व्वनामतास्य ।

अन्यतम त्रि० अव्यु० । बहूनां मध्ये निर्द्धारिते एकस्मिन् ।

अन्यतर त्रि० अव्यु० । द्वयोर्मध्ये निर्द्धारिते एकस्मिन् सर्व्व० ।

अन्यत्र अव्य० अन्य+त्रल् । व्यतिरेके, विनार्थे च "अन्यत्र धर्म्मादन्यत्राधर्म्मादिति" श्रुतौ प्रथमार्थे एव त्रल् ।

अन्यथा अव्य० अन्य-प्रकारार्थे थाल् । विनार्थे, इतरप्रकारार्थे, वितथे, दुष्टे च ।

अन्यथासिद्धि स्त्री० अन्यथा यस्य कारणतां विनापि सिद्धिः कार्य्यजन्म तस्य अन्यथासिद्धिरिति न्याये परिभाषितरूपे वस्तुनि यथा घटजन्मकाले तत्र गर्द्दभस्य स्थितावपि तस्य कारणतां विनापि घटादिसिद्धिरिति घटादौ गर्द्दभादेरन्यथासिद्धिः ।

अन्यदा अव्य० अन्यस्मिन् काले दाच् । अन्यस्मिन् काले ।

अन्यपूर्व्वा स्त्री० अन्यः पूर्व्वो यस्याः । पूर्व्वपतिमरणादौ पश्चात् कृततद्भिन्नपतिकायां पुनर्भुवि । अर्शआदित्वादचि अन्या पूर्व्वा यस्य वा । तत्परिणेतरि पुनर्भूपतौ पु० ।

अन्यभृत् पु० अन्येन भ्रियते भृ-कर्म्मणि क्विप् । कोकिले । कर्म्मणि क्ते अन्यभृतोऽप्यत्र । कर्त्तरि क्विपि परपोषके त्रि० ।

अन्यादृश् त्रि० अन्यस्येव दर्शनमस्य अन्य+दृश् क्विन् आत्वञ्च स्त्रौ । अन्यसदृशे, अन्यप्रकारे च । टकि अन्यादृशः, क्से अन्यादृक्षोऽप्यत्रैवार्थे ।

अन्याय पु० न्यायो विचारः, सङ्गति, औचित्यं, प्रतिज्ञादिपञ्चकप्रतिपादकवाक्यञ्च न०त० । विचाराभावे, सङ्गत्यभावे, अनौचित्ये, पञ्चाङ्गन्यायभिन्ने च न्यायशब्दार्थे त्वधिकं वक्ष्यते । ब० । विचारशून्ये, औचित्यशून्ये, असङ्गते, प्रतिज्ञादिपञ्चकवाक्यशून्ये च त्रि० ।

अन्योदर्य्य पु० अन्यस्मिन् स्वमातृभिन्ने उदरे गर्भे भवः उदर+यत् । एकपितृके भिन्नमातृके वैमात्रेये भ्रातरि । अन्योदर्य्यस्तु संहृष्टीति स्मृतिः । तथाभगिन्यां स्त्री० । अन्योदरजातमात्रे त्रि० अतएव दायभागे तद्वचनव्याख्याने भ्रातृपुत्रादीनामपि अन्योदर्य्यपदार्थतया ग्रहणमित्युक्तम् ।

अन्योन्य त्रि० अन्य+कर्म्मव्यतिहारे (एकजातीयक्रियाकरणे) द्वित्वम् पूर्व्वपदे सुश्च । परस्परार्थे । कृतद्वित्वस्यापि सर्व्वनामता तेनान्योऽन्यस्मै इत्यादि । अलङ्कारशास्त्रप्रसिद्धे अलङ्कारभेदे न० तच्च साहि १०परि०

अन्योऽन्याभाव पु० अन्योऽन्यस्मिन् अन्योऽन्यस्य अभावः । भेदे भेदो हि यथा घटे पटस्य तथा पटे घटस्य सदाऽस्ति संसर्गाभावस्तु नैवं यतो भूतलस्याभावेऽपि भूतले घटस्य कदाचित् सत्त्वसंभवेनाभावाभावात् ।

अन्योन्याश्रय: त्रि० अन्योन्यमाश्रयतीति आ+श्री-अच् । परस्परसापेक्षे । न्यायमते तर्कविशेषे पु० । स च एकस्य ज्ञानजननाय यथाऽन्यज्ञानापेक्षा तथा अन्यस्य ज्ञानजननायेतरस्य ज्ञानापेक्षेति स्वापेक्षापेक्षित्वनिमित्तकोऽनिष्टः प्रसङ्गः विस्तरस्तु बृहदभिधाने ।

अन्वक्ष त्रि० अनुगतमक्षमिन्द्रियं मतिस० । प्रत्यक्षे, अनुपदे,

अनुगे च। अक्ष्णः समीपेऽव्ययी०टचि। चक्षुर्निकटे अव्य०।

अन्वच् त्रि० अनु+अन्च–क्विन्। अनुगामिनि, अनुपदे च।

अन्वय पु० अनु+इण्-अच्। सन्ततौ, अनुगतौ, अनुवृत्तौ, आनुकूल्ये, कार्य्य-कारणस्यानुसरणे, कार्य्यसत्तापादकस्वसत्ता कस्य कारणस्य कार्य्योत्स्थितौ, स्वचत्तानियतसत्तावति, कार्य्ये संवन्धे च पदानां, पदोपस्थाप्यपदार्थानाञ्च परस्परेण संबन्धे च।

अन्वयबोध पु० अन्वयस्य पदोपस्थाप्यपदार्थानां संबन्धस्य बोधः ६त०। न्यायमते शब्दजन्ये शाब्द इति नामके प्रत्यक्षानुमानादिभिन्ने बोधे। वैशेषिकमते शब्दजन्ये अनुमित्यात्मके एव बोधे।

अन्वयव्यतिरेकिन् त्रि० अन्वयव्यतिरेकौ स्तोऽस्य। साध्यसाधके हेतुविशेषे, यथा वह्निसाधने धूमः। स हि वह्निमति महानसादौ वह्न्यभाववति जलादौ च भावाभावाभ्यां वह्नेरन्वयव्याप्तः व्यतिरेकव्याप्तश्चेति न्यायमते प्रसिद्धम्।

अन्वयव्याप्ति स्त्री० अन्वयेन व्याप्तिर्व्यापनं नियततया। स्थितिः ३त०। यत्र धूमस्तत्र वह्निरित्येवं रूपायां व्याप्तौ।

अन्ववसर्ग पु० अनु+अव+सृज-घञ्। यथेष्टं क्रियतामित्येवं रूपायामनुज्ञायाम्।

अन्ववाय पु० अन्ववायते उत्पत्त्यानुसंबध्यते अनु+अव+अय-घञ्, इण्-अच् वा। वंशे, सन्ताने च।

अन्वष्टका स्त्री० अनुगतामष्टकाम् गतिस०। अष्टकानन्तरतिथिषु गौणचान्द्रपौषमाघफाल्गुनमासानां कृष्णनवमीषु। तत्र साम्निकस्य मातृश्राद्धमष्टकाश्राद्धवत् कर्त्तव्यम्।

अन्वह अव्य० अह्नि अह्नि वीप्सार्थेऽव्ययी० अच्। प्रतिदिने

अन्वाचय पु० एकस्य प्राधान्यादन्य आचीयते बोध्यते यत्र अनु+आ+चि-अच्। उद्देश्यसिद्ध्यानुद्देश्यसिद्धौ। यथा भिक्षां गच्छ यदि गां पश्येस्ताञ्चानय, अत्र भिक्षायामेव उद्देशः न गमने, तत्सिद्ध्युत्तरं गवानयनमनुद्दिष्टमपि साध्यतया निर्द्दिष्टम्।

अन्वाजे अव्य० अनु आजयत्यनेन अनु+आ+जि-डे। दुर्बलस्य बलाधाने। सप्तम्यन्तप्रतिरूपकोऽयम्।

अन्वादेश पु० अनु+आ+दिश घञ्। पूर्व्वोपात्तस्य किञ्चित्कार्य्यान्तरं विधातुं पुनरुपदेशे। यथा अनेन व्याकरणमधीतं न्यायमेनं प्रपाठयेति न्यायपाठनार्थं पुनरुपदेशः। कथितकथने, अनुवादार्थे च।

अन्वाधेय न० अनु+आ+धाञ् यत्। "विवाहात् परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया। अन्वाधेयं तु तत्प्रोक्तं लब्धं बन्धुकुलात्तथे"त्युक्तलक्षणे स्त्रीधने। पश्चादाधेये वस्तुनि त्रि०

अन्वासन न० अनु+आस-ल्युट्। पश्चादुपवेशनरूपे सेवने, अनुशोचने च। आधारे ल्युटि सिलच्छड्डे।

अन्वाहार्य्य न० अनु व्याप्तौ, मासिमासि आह्रियते अनु+आ+हृ-ण्यत्। प्रतिमासकर्त्तव्येऽमावास्याविहिते श्राद्धे "पितॄणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधा" इति स्मृतिः, यागदक्षिणायाञ्च।

अन्वाहार्य्यपचन पु० अन्वाहार्य्यं श्राद्धान्नं पच्यतेऽनेन पच+ल्युट्। दक्षिणाग्नौ ऋग्वेदविधिना स्थापितेऽग्नौ।

अन्विच्छा स्त्री० अनु+इष-अ नि०। अन्वेषणे।

अन्विष्ट त्रि० अनु+इष्-क्त। अन्वेषिते।

अन्वीक्षा स्त्री० अनु श्रवणादनु ईक्षा श्रुतार्थस्य युक्तायुक्तत्वपर्य्यालोचना अनु+ईक्ष-अङ्। वेदवाक्यश्रवणानन्तरं तदर्थपर्य्यालोचनायाम्। अतएवैतदुपयोगिनी विद्या आन्वीक्षिकीत्युच्यते।

अन्वेषण न० अनु+इष-ल्युट्। अनुसन्धाने। व्यवधानादिना अदर्शनं गतस्य ज्ञानार्थं प्रयत्नोऽत्रानुसन्धानम्। वाञ्छायाञ्च। युचि। अन्वेषणा। तस्मिन्नेवार्थे स्त्री०।

अप् स्त्री० बहु० आप-क्विप् ह्रस्वः। जले।

अप अव्य० न पाति पा-ड। वियोगे, विकृतौ, विपरीते, निदर्शने, आनन्दे, वर्ज्जने, चौर्य्ये च।

अपकर्म्मन् न० अपकृष्टं कर्म्म प्रा०। दुष्टाचरणे। ब०। दुष्टाचरणवति त्रि०।

अपकर्ष पु० अप+कृष-घञ्। उचितधर्म्मापेक्षया हीनतायां, स्वकर्त्तव्यकालात् पूर्व्वकालकरणे च।

अपकार पु० अप+कृ-घञ्। अनिष्टोत्पादने, तद्धेतौ द्वेषे च।

अपकारगिर् स्त्री० अपकारेण द्वेषेण गीर्य्यते गॄ-क्विप्। भर्त्सनवाक्ये। [काले कृते च।

अपकृष्ट त्रि० अप+कृष-क्त। अधमे, हीने, स्वकालात् पूर्व्व

अपक्रम पु० अपसृत्य क्रमो गतिः क्रम घञ् अवृद्धिः। पलायने।

अपक्रिया स्त्री० अप+कृ-श। द्रोहे, अपकारे च।

अपक्रोश पु० अप+क्रुश-घञ्। निन्दने। उपक्रोशोऽप्यत्र।

अपक्षेपण न० अप-क्षिप-ल्युट्। अधःस्थानसंयोगहेतौ क्रियाविशेषे, अधःपातने च। अवक्षेपणमप्यत्रार्थे।

अपगत त्रि० अप+गम-क्त। मृते, पलायिते, गते, द्रवीभूते च

अपघन पु० अप+हन अप् घनादेशः। देहे, घनो निविडस्तद्वर्ज्जिते त्रि०। [च।

अपघात पु० अप+हन-घञ्। अपकृष्टहनने दुष्टहेतुकमरणे

अपचय पु० अप+चि अच्। हानौ, अपहरणे, व्ययने च।

अपचायित त्रि० अप+चाय-चि-स्वार्थे णिच्-वा क्त । पूजिते ।

अपचार पु० अप+चर-घञ् । अहिताचरणे । अपगतचारे, दूतहीने च त्रि० । [चि-क्त । हीने ।

अपचित त्रि० अप+चाय-क्त चायः चिभावः । पूजिते ।

अपचिति स्त्री० अप+चाय+क्तिन् प्रकृतेश्चिभावः । पूजायां चि+क्तिन् । हानौ व्ययायाञ्च ।

अपटान्तर त्रि० पटेन तिरस्करिण्या अन्तरमत्र । अव्यवहिते, आसक्ते, संसक्ते च । अपदान्तरमित्यप्यत्रैवार्थे ।

अपटी स्त्री० अल्पः पटः पटी न०त० । कानात् इति ख्याते वस्त्रप्रावरणे । [क्षमे च

अपटु त्रि० पटुर्दक्षः न०त० । रोगिणि, दक्षतारहिते कार्य्या-

अपतर्पण न० अप+तृप-ल्युट् । रोगादौ उपवासे, तृप्त्यभावे च

अपत्य न० न पतन्ति पितरोऽनेन पत-यत् न०त० । पुत्रदुहितृरूपे संताने । [ओषधिविशेषे गर्भदायिविद्यादौ च ।

अपत्यदा स्त्री० अपत्यं तद्धेतुं गर्भं ददाति । सेवनेन गर्भग्राहके

अपत्यशत्रु पु० अपत्यस्य शत्रुः ६त० । कर्कटे ।

अपत्र पु० न विद्यते पत्रमस्य । अङ्कुरे तस्य पत्राभावात् ।

अपत्रप त्रि० अपगता त्रपा लज्जा यस्मात् ५ब० । लज्जाहीने ।

अपत्रपा स्त्री० अप+त्रप-अङ् । अन्यहेतुकलज्जायाम् ।

अपत्रपिष्णु त्रि० अप+त्रप-इष्णुच् । स्वभावतो लज्जाशीले ।

अपथ न० न पन्थाः न०त० वा अच् । कुपथे, पथोऽभावे च । अत्र वा अचोऽभावे अपथिन् इत्यपि । ब० । पथिशून्ये त्रि० ।

अपथ्य त्रि० पथि (रोगिभोजने) हितं पथिन्+यत् न०त० । रोगिभोजनायोग्ये । [अवदानमप्यत्रार्थे ।

अपदान न० अप+दैप-ल्युट् । शोधने, (प्रशस्ते) कर्म्मणि

अपदिश न० दिशयोर्मध्ये अप+दिश्+अव्ययी० । दिशोर्मध्ये विदिक् इति कोण इति च ख्याते ।

अपदेश पु० अप+दिश-घञ् । लक्ष्ये, स्वरूपाच्छादनरूपे, छले, निमित्ते, स्थाने च ।

अपध्वंसज पु० अपध्वस्यतेऽनेन अपध्वंसः वर्णानां भिन्नरूपता संपादकः सङ्करस्तस्माज्जायते जन-ड ५त० । भिन्नवर्णसङ्गमजाते करणादौ सङ्कीर्णवर्णे । [चूर्णिते च ।

अपध्वस्त त्रि० अप+ध्वन्स-क्त । निन्दिते, परित्यक्ते, अव-

अपनयन न० अप+नी-ल्युट् । दूरीकरणे, खण्डने च ।

अपनोदन न० अप+नुद-ल्युट् । दूरीकरणे, खण्डने च ।

अपभ्रंश न० अप+भ्रन्श-पतने घञ् । पतने । अपभ्रश्यते अधर्म्महेतुतया पत्यतेऽनेन करणे घञ् । साधुशब्दभिन्ने अपशब्दे भाषाशब्दे यज्ञादौ तत्कथनस्य पापहेतुत्वात् ।

अपमान न० अप+मि-मा-वा ल्युट् । अवज्ञायाम् ।

अपमित्यक न० अपमितिरपमानं तेनाकं दुःखं यत्र । अपमानहेतुकदुःखदायके ऋणे, तद्ग्रहणे हि उत्तमर्णसमीपेऽनादरात् दुखं भवति ।

अपमृत्यु पु० अपकृष्टो मृत्युः प्रा०स० । मरणहेतुरोगादिकं विना शस्त्रादिना स्वयमन्यतो वा मरणे ।

अपयान न० अप+या-ल्युट् । अपसरणे, पलायने च ।

अपर न० न पूर्य्यते यतः पृ-अपादाने,अप् । गजस्य पश्चाद्भागे । न पृणाति सन्तोषयति पृ-अच् । शत्रौ । अर्वाचीने, भिन्ने च त्रि० । पश्चिमायां दिशि, ऋग्वेदादिविद्यायां च स्त्री० ।

अपरक्त त्रि० अप+रन्ज-कर्त्तरि क्त । विरक्ते, अननुकूले ।

अपरति स्त्री० अप+रम-क्तिन् । विरागे, निवृत्तौ च ।

अपरत्र अव्य० अपर+त्रल् । पश्चादर्थे, परकाले च ।

अपरत्व न० अपरस्य भावः त्व । अपर इति व्यवहारके न्यायमते गुणभेदे, तच्च द्विविधं कालिकं दैशिकञ्च तत्र माघादपरः पौष इति कालिकं, पाटलिपुत्रादपरा काशीति दैशिकम् ।

अपरपक्ष पु० अपरो निकृष्टः पक्षः कर्म्म० । कृष्णपक्षे ।

अपररात्र पु० अपरं रात्रेः एक० त० टच् । रात्रिशेषे ।

अपरस्पर न० अपरश्च परश्च द्व० पूर्व्वपदे सुट् च । क्रियासातत्ये सन्ततैकरूपक्रियाकरणे ।

अपराजित पु० परा+जि-क्त न०त० । शिवे, विष्णौ, ऋषिभेदे च । पराजितभिन्ने त्रि० । दूर्व्वायां, स्वनामख्यातायां लतायां, दुर्गायां, शेफालिकायां, जयन्तीवृक्षे, असनवृक्षे, शङ्खिनीवृक्षे च स्त्री० ।

अपराद्धपृषत्क पु० अपराद्धो लक्ष्यात् च्युतः पृषत्को वाणो यस्य अप+राध-क्त ब० । लक्ष्याप्राहिसायके धानुष्के ।

अपराध पु० अप+राध-घञ् । अकार्य्यादिकरणरूपे दोषे ।

अपरान्त पु० अपरस्या अन्तः । पाश्चात्त्यदेशभेदे । तद्देशवासिनि त्रि०

अपराह्ण पु० अपरमह्नः एक० त० टच् अह्नादेशो णत्वञ्च । त्रिधा विभक्तदिनस्य तृतीये भागे ।

अपरिग्रह पु० परि+ग्रह-अप् न०त० । असंग्रहे, स्वीकाराभावे च । नास्ति कन्थाकौपीनाद्यतिरिक्तः परिग्रहो यस्य ब० । परिव्राजके । परिग्रहमात्रशून्ये त्रि० ।

अपरिच्छिन्न त्रि० परि+छिद-क्त न०त० । इयत्तारहिते ।

अपरिहार्य्य त्रि० परि+हृ-ण्यत् न०त० । परिहर्त्तुमयोग्ये

अपरेद्युस् अव्य० अपरस्मिन्नहनि अपर+एद्युस् । अपरदिने

अपरोऽक्ष न० परोऽतीतः अक्ष्णामिन्द्रियाणां न भवति पर+अक्षि+असमर्थस० टच् नि० सुट् । विषयेन्द्रियसन्निकर्ष-

10219731

जन्ये प्रत्यक्षरूपे ज्ञाने । अर्श आद्यचि तद्विषये त्रि० ।

अपर्णा स्त्री० न पर्णान्यपि भोजनं यस्याः । हिमाद्रिजायाम् तपसि स्थितया तया पर्णस्याप्यभोजनात् । पर्णशून्ये त्रि० ।

अपर्य्याप्त त्रि० परि+आप्-क्त न०त० । असमर्थे, असम्पूर्णे च ।

अपलाप पु० अप+लप-घञ् । सतोऽप्यसत्त्वेन कथनरूपे अपह्नवे, प्रेम्णि च ।

अपवरक न० अप+चु०-वर-इच्छायां कर्म्मणि ण्वुल् । वासगृहे ।

अपवर्ग पु० अप+वृज-घञ् । दाने, निर्वाणमोक्षे, फलसाधने, समाप्तौ च ।

अपवर्ज्जन न० अप+वृज-ल्युट् । दानादावपवर्गार्थे ।

अपवर्त्तन न० अप+वृत-णिच्-ल्युट् । परिवर्त्तने, वक्रीभावे, अङ्कशास्त्रे प्रसिद्धे भाज्यभाजकयोरुभयोरपि तुल्यरूपेण केनचिदङ्केन विभाजने च ।

अपवाद पु० अप+वद-घञ् । निन्दायाम्, आज्ञायाम्, प्रणये, विश्वासे, विशेषविधिरूपे बाधके, वेदान्तप्रसिद्धे रज्जौ प्रतिभातस्य रजतस्य रज्जुमात्ररूपतालाभे च ।

अपवारण न० अप+चु० । वृ-ल्युट् । अन्तर्द्धाने ।

अपविद्ध त्रि० अप+व्यध-क्त । त्यक्ते, प्रत्याख्याते प्रतिक्षिप्ते, "मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा । यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते इत्युक्तरूपे पुत्रभेदे च ।

अपविषा स्त्री० अपगतं विषं यस्याः ५त० । विषहारिण्याम् ।

अपवृत्त त्रि० अप+वृत-क्त । पराङ्मुखीभूते ।

अपशब्द पु० अपकृष्टः शब्दः प्रा०स० । संस्कृतभिन्ने शब्दे "तएव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता इतिहर्य्युक्तदिशा संस्कृतशब्दएव अन्यथोच्चारणादसाधुत्वं गते भाषाशब्दे ।

अपशोक पु० अपगतः शोको यस्मात् ब० । अशोकवृक्षे । शोकरहिते त्रि० ।

अपष्ठु अव्य० अप+स्था-कु षत्वम् । निर्द्दोषे, शोभने, विपरीते, च । प्रतिकूले, विरुद्धार्थे च त्रि० । काले पु० ।

अपष्ठुल त्रि० अप+स्था-उलच् षत्वम् । निमित्ते, विपरीते च

अपसद त्रि० अपकृष्टइव सीदति सद-अच् । अधमे, नीचे च ।

अपसर्ज्जन न० अप+सृज-ल्युट् । दाने, परिवर्ज्जने ।

अपसर्प पु० अप+सृप-अच् । गुप्तचरे । घञि अपसरणे ।

अपसव्य पु० अपगतं सव्यं यत्र । दक्षिणभागे । पितृतीर्थे न० ।

अपस्कर पु० अपकीर्य्यते स्वस्वस्थाने क्षिप्यते अप+कृ-अप् सुडागमः । चक्रभिन्ने रथाङ्गे रथारम्भके काष्ठे ।

अपस्नात त्रि० अपकृष्टं स्नातः । मृतसुहृदि स्नाते ।

अपस्मार पु० अपगतः स्मारः स्मरणं यस्मात् ५ब० । मिरगीइति ख्याते रोगभेदे । तस्मिन् सति तद्रोगिणस्तदानीं सर्व्वविषयस्मृतिर्नश्यति ।

[अपसारिते ।

अपहस्त त्रि० अपसारणार्थो हस्तो यस्मिन् । गलहस्तादिना

अपहार पु० अप+हृ-घञ् । अपसारणे, अपचये, चौर्य्ये, सङ्गोपने, धनस्वाम्यनुपयोगिव्यये च ।

अपह्नव पु० अप+ह्नु-अप् । सतोऽपि वस्तुनोऽसत्त्वेन कथनरूपेऽपलापे, प्रेम्णि च ।

अपह्नुति स्त्री० अप+ह्नु-क्तिन् । अपलापे, अलङ्कारशास्त्रे प्रसिद्धे अर्थालङ्कारभेदे च सा०१०परि० ।

अपांनाथ पु० ६त० । अलुक् स० । समुद्रे ।

अपांनिधि पु० नि+धा-कि ६त० अलुक् स० । समुद्रे ।

अपांपति पु० पा+डति ६त० अलुक् स० । समुद्रे, वरुणे च ।

अपांपित्त न० ६त०अलुक् स०वा । अग्नौ, तस्य जलहेतुत्वात् तत्पित्तत्वम् "आकाशाद्वायुर्वायोरग्निरग्नेराप" इति श्रुतिः अत्र वा लुकि अप्पित्तमित्यपि ।

अपाक पु० पच-घञ् न०त० । पाकाभावे, भुक्तान्नादेरग्निमान्द्यादिना पाकाभावे च । ७ब० । तत्साधने अजीर्णतारोगे । ६ब० । पाकरहिते आमे त्रि० ।

अपाकरण न० अप+कृ-ल्युट् । निराकरणे ।

अपाकशाक पु० न पच्यते शाको यस्य । आर्द्रके तस्य मूलस्यैव भोजनार्थं पच्यते न शाकः ।

अपाङ्क्तेय त्रि० सद्भिः सह भोजने पङ्क्तिमर्हति अर्हार्थे ढ न०त० । सद्भिः सह एकपङ्क्तौ भोजनानर्हे स्तेन पतितादौ । अत्र ष्यञि अपाङ्क्त्य इत्यपि ।

अपाङ्ग पु० अपाङ्गति तिर्य्यक् चलति नेत्रं यत्र अप+अङ्ग घञ् । नेत्रप्रान्ते, तिलके च । अपगतोऽङ्गात् गत्यादि० स० । अङ्गहीने त्रि० ।

अपाङ्गक पु० अपकृष्टमङ्गं यस्य ब० कप् । आपाङ् इति ख्याते अपामार्गे । नेत्रान्ते पु० । अपगताङ्गे त्रि० ।

अपाङ्गदर्शन न० अपाङ्गेन नेत्रान्ताभ्यां दर्शनं ३त० । कटाक्षे ।

अपाटव न० नास्ति पाटवं पटुता यत्र पटु+भावेऽण् । ७ब० । रोगे । न०त० । पटुताभिन्ने । ६ब० । पटुताशून्ये त्रि० ।

अपात्र न० पात्रं श्राद्धभोजनदानादियोग्यं न०त० । विद्यादिहीनेऽनाचारे, दानादियोग्यताहीने कुपात्रे, नटादौ च ।

अपात्रीकरण न०अपात्रं श्राद्धभोजनाद्ययोग्यं क्रियतेऽनेन । निन्दितप्रतिग्रहादिजनिते पापभेदे । "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च

भाषण”मिति मनूक्तेः तद्धेतुभूते निन्दितधनादानादौ च ।

अपादान न० व्याकरणप्रसिद्धे वियोगक्रियावधिभूते विभागजनकतत्क्रियानाधारे तत्क्रियाजन्यविभागाश्रये ।

अपान पु० अपसरणेनानित्यनेन अप+अन-घञ् । सततमधोगमनशीले, गुह्यदेशस्थे, “अधोनयत्यपानस्तु आहारञ्च क्रमशां पुन”रित्युक्तलक्षणे “मूत्रशुक्रवहोवायुरपान इति कीर्त्यते” इत्युक्तलक्षणे च वायौ । गुह्ये न० ।

अपामार्ग पु० अपमृज्यते व्याधिरनेन मृज्-करणे घञ् कुत्वदीर्घौ । आपाङ् इति ख्याते वृक्षे ।

अपाय पु० अप+इण्-अच् । वियोगे, नाशे, अपसरणे च ।

अपार त्रि० उत्तरोऽवधिः पारः न०ब० । उत्तरावधिशून्ये। नद्यादेरर्व्वाचीने अवारे तीरे न० ।

अपार्थ त्रि० अपगतोऽर्थोऽभिधेयः प्रयोजनं वा यस्मात् ५ब० । अर्थशून्ये, प्रयोजनशून्ये च । ब०कपि । अपार्थकमप्यत्रार्थे, निष्प्रयोजने, असंवद्धार्थके वाक्ये च ।

अपावृत त्रि० अप+आ-वृ-क्त । अनाच्छादिते, अप्रतिबद्धे स्वतन्त्रे, उद्घाटिते च ।

अपावृत्त त्रि० अप+आ+वृत-क्त । लुण्ठिते, परावृत्ते च ।

अपाश्रय पु० अप+आ+श्री-अच् । आश्रयशून्ये। अपाश्रयतीति कर्त्तरि अचि । अधीने । करणेऽचि। चन्द्रातपे ।

अपासन न० अप+अस-णिच्-ल्युट् । मारणे ।

अपास्त त्रि० अप+अस-क्षेपे क्त । निरस्ते-अवधीरिते च ।

अपि अव्य० न पियति गच्छति पि-गतौ क्विप् न तुक् । अशक्यकरणायोद्यमरूपायां, शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिरूपायां, वा सम्भावनायां, सन्देहे, निन्दायां, प्रश्ने, समुच्चये, अल्पपदार्थे, कामचारानुज्ञायाम्, अवधारणे, पुनरर्थे च ।

अपिगीर्ण त्रि० अपि+गॄ-क्त । स्तुते,वर्णिते,उद्वान्ते च ।

अपितु अव्य० अपि+तन्-डु । किन्त्वर्थे, यद्यर्थे, यद्यपीत्यर्थे च ।

अपिधान न० अपि+धाञ् ल्युट् । आच्छादने, अत्र अपेरल्लोपे । पिधानमपि । [पिनद्धमप्यत्र ।

अपिनद्ध त्रि० अपि+नह-क्त । परिहिते वसनादौ । अपेरल्लोपे

अपीच्य त्रि० अपि+न-च्यवते सौन्दर्य्याद्धीयते च्यु-ड । उपसर्गदीर्घः । अतिसुन्दरे । [वृक्षे । पुच्छहीने त्रि० ।

अपुच्छा स्त्री० नास्ति पुच्छमग्रं यस्याः । शिखरहीने शिंशपा-

अपुनरावृत्ति स्त्री०न पुनरावृत्तिरागमनं यत्र ७ब०। निर्व्वाणमुक्तौ । ६ब० । पुनर्गमनशून्ये त्रि० । न०त० । पुनरागत्यभावे स्त्री० । [६ब० । अत्यन्तमुक्ते । न०त० । पुनर्जन्माभावे ।

अपुनर्भव पु० न पुनर्भवो जन्म यत्र ७ब० । निर्व्वाण मोक्षे ।

अपुष्पफलद पु० पुष्पं विनापि फलं ददाति दा-क उप०स० । पुष्पशून्ये फल वति पनसोडुम्बरादिवृक्षे ।

अपूप पु० न पूयते विशीर्य्यति पू-प । गोधूमादिचूर्णपिष्टके ।

अपूरणी स्त्री० न पूर्य्यते सर्व्वतः कण्टकावृततया दुरारोहत्वात् । शाल्मलिवृक्षे । संख्यापूरणसाधनभिन्ने च ।

अपूर्व्व त्रि० न पूर्व्वं दृष्टम् । अविदिते आश्चर्य्ये । ६ब० । कारणशून्ये परमात्मनि पु० । वैधनिषेधक्रियाजन्ये कालान्तरभाविनोः सुखदुःखयोर्हेतुभूतयोः पुण्यपापयोः न० । पूर्व्वकालादिभिन्ने त्रि० ।

अपूर्व्वविधि पु० अपूर्व्वे प्रमाणान्तरेणाप्राप्ते विधिर्विधानम् वि+धा-कि । अप्राप्तप्रापके लिङादिपदवेदनीये शब्दविशेषे । यथा स्वर्गकामो यजेतेति लिङ्युक्तं वाक्यं प्रमाणान्तरेणाप्राप्तस्य स्वर्गसाधनत्वस्य यागे बोधयत् अपूर्व्वविधिः ।

अपेक्षा स्त्री० अप+ईक्ष-अङ् । आकाङ्क्षायां, कार्य्यकारणयोरवश्यसम्बन्धे च । अपेक्षते प्रत्ययमुत्तमं त्वामिति कुमारः

अपेक्षाबुद्धि स्त्री० अयमेकः अयमेकइत्याकारिकायां अनेकत्वादिविषयिण्यां बुद्धौ ।

अपेक्षाबुद्धिज त्रि० न्यायमते प्रसिद्धे द्वित्वाद्यारभ्य परार्द्धसंख्याभेदे, द्वित्वादिकं हि प्रागुक्तापेक्षाबुद्धितोजायते ।

अपोगण्ड त्रि० पुनाति पवते वा पू-विच् न पोर्गण्ड एकदेशोऽस्य । शिशौ, वलिभे,विकलाङ्गे, अतिभीरौ च ।

अपोढ त्रि० अप-उह-क्त । निरस्ते, बाधिते च ।

अपोदका स्त्री० अपगतमुदकं यस्याः ५ब० । पूतिका इति ख्याते शाके ।

अपोह पु० अपगत-ऊहो वादिसमुद्भावितस्तर्को यस्मात् ५ब० । वादिसमुद्भाविततर्कनिरासार्थके प्रतिवादिसमुद्भाविततद्विरुद्धे तर्कभेदे । अप+उह-क्त घञि गुणे पररूपम् । त्यागे, अतद्व्यावृत्तौ च ।

अप्पति पु० अपां पति ६त० । वरुणे समुद्रे च । [कादौ ।

अप्रकाण्ड पु० न प्रकाण्डः स्कन्धो यस्य । स्कन्दशून्ये झिण्टि-

अप्रकाश त्रि० प्र+काश-घञ् न०त० । नाट्ये रङ्गभूमिस्थसामाजिकसन्निधाने एव प्रकाश्ये जनान्तिकपदबोधनीये रङ्गस्थपात्रादिबोधायोग्ये । परब्रह्मणि न० । न०त० । प्रकाशाभावे, गोपने च पु० ।

अप्रकृष्टगुण त्रि० न प्रकृष्टः गुणो यस्य न०ब० । व्याकुले ।

अप्रतिकर त्रि० न प्रतिक्रियते गोपनार्थं न व्याप्रियते यस्मिन् क-आधारे अप् । विश्वासपात्रे ।

अप्रतिरथ न० न प्रतिकूलो रथोयत्र । युद्धार्थयाने, युद्ध-

समये यात्राकृतमङ्गले, सामावयवभेदे च। न प्रतिपक्षो रथो रथान्तरमस्य ६ब०। अतुल्ये योधे, विष्णौ च पु०।

अप्रतिरूपकथा स्त्री० नास्ति प्रतिरूपा प्रत्युत्तरी भूता कथा यस्याः। उत्तरवाक्यरहितायां वाचि।

अप्रत्यक्ष त्रि० ज्ञानभेदः प्रत्यक्षं न०७ब०। प्रत्यक्षागोचरे अतीन्द्रिये।न०त०। प्रत्यक्षाभावे। न०६ब०। प्रत्यक्षज्ञानशून्ये त्रि०।

अप्रधान न०। न०त०। प्रधानभिन्ने गौणे।

अप्रस्तुतप्रशंसा अप्रस्तुतस्याप्राकरणिकार्थस्याक्षेपादिना प्रशंसा स्तुतिः। अलङ्कारप्रसिद्धे अर्थालङ्कारविशेषे। सा०१०परि०।

अप्रहत त्रि० न प्रहन्यते स्म प्र+हन-क्त न०त०। अनाहते अकृष्टभूम्यादौ खिल इति ख्याते।

अप्राग्र्य त्रि० प्राग्र्यं प्रधानं न०त०। अप्रधाने।

अप्सरस् स्त्री० बहु०। अद्भ्यः सरन्ति सृ-असि। समुद्रादुत्पन्नत्वात् उर्वश्यादिस्वर्गवेश्यायाम्। पचाद्यचि। अप्सरा।

अफल पु० नास्ति फलं यस्य। फलशून्ये रांडा इति ख्याते वृक्षे। निष्फले वृक्षमात्रे, निष्प्रयोजने वस्तुमात्रे च त्रि०। फलशून्यायां घृतकुमार्य्यां, भूम्यामलक्याञ्च स्त्री०।

अफेन न० नास्ति फेनं यस्य। वृक्षविशेषनिर्य्यासे आफिङ् इति ख्याते अहिफेने।

अब शब्दे इदित् भ्वादि० आत्म० सक० सेट्। अम्बते आम्बिष्ट

अबद्ध न० न संबध्यते स्म बन्ध-क्त। समुदायार्थशून्ये निरर्थके वाक्ये। स्वार्थे के। अबद्धकमप्यत्र। संबन्धहीने त्रि०।

अबद्धमुख त्रि० न बद्धं नियन्त्रितं मुखमस्य। दुष्टवाक्यवादिनि दुर्मुखे। [वाक्ये न०।

अबध्य त्रि० बध+अर्हार्थे यत् न०त०। बधानर्हे। अनर्थक-

अबन्ध्य त्रि० बन्धे फलप्रतिबन्धे साधु बन्ध-यत् न०त०। सफले।

अबल पु० नास्ति बलं यस्मात् ५ब०। वरुणवृक्षे तत्सेवने हि बलक्षयः। ६ब०। बलरहिते दुर्बले च त्रि०। योषिति स्त्री०

अबाध त्रि० नास्ति बाधा यस्य। अप्रतिबद्धे, पीडाशून्ये च।

अबिन्धन पु० आपइन्धनं दाह्या अस्य। वाड़वाग्नौ वज्राग्नौ च

अब्ज न० अद्भ्यो जायते जन-ड ५त०। पद्मे, "अर्बुदमब्जं खर्व्वनिखर्व्व"त्यादिभास्कराचार्य्योक्तेः शतकोटिसंख्यायाञ्च। शङ्खे पु०न०। चन्द्रे धन्वन्तरौ च पु०।

अब्जज पु० अब्जात् विष्णुनाभिपद्मात् जायते जन-ड। वेधसि। "स्वराशौ, स्वांशगे, सौम्ये लग्नस्थे वा भृगोः सुते। जीवे वाब्जजयोगोऽयं यातुः शत्रुविनाशकृदि"त्युक्तलक्षणे ज्योतिषप्रसिद्धे यात्रिकयोगभेदे च।

अब्जभोग पु० अब्जस्य शङ्खस्य भोग आकार इवाकारो यस्य। वराटके। अब्जस्य पद्मस्य भोगः देहाकारः। पद्मकन्दे।

अब्जयोनि पु० अब्जं योनिरुत्पत्तिस्थानं यस्य। विधातरि।

अब्जवाहन पु० अब्जमिव शुभ्रत्वात् वृषभो वाहनमस्य। वृषवाहने शिवे।

अब्जहस्त पु० अब्जश्चन्द्रो हस्तात् किरणात् यस्य। सूर्य्ये, सूर्य्यकिरणसंपर्कादेव चन्द्रपादवृद्धिरिति ज्योतिषसिद्धान्तः।

अब्जिनी स्त्री० अब्जानि सन्त्यस्मिन् देशे, अब्जानां समूह इति वा इनि स्त्रीत्वम्। पद्मयुक्तलतायां पद्मसमूहे च।

अब्जिनीपति पु० अब्जिन्याः पद्मसमूहस्य पतिः प्रकाशकतयाऽनुकूलः। सूर्य्ये।

अब्द पु० अपोददाति दा-क। मेघे, जलदे, वत्सरे, मुथा इति ख्याते मुस्तके, शैलभेदे च।

अब्दसार पु० अब्दस्य मुस्तस्य सारो रसपरिपाकः। कर्पूरभेदे

अब्धि पु० आपो धीयन्तेऽत्र धा-आधारे कि। जलधौ।

अब्धिकफ पु० अब्धेः समुद्रस्य कफ इव। समुद्रफेने।

अब्धिद्वीपा स्त्री० अब्धिसंख्याता लवणादिसप्तसंख्याता द्वीपा अस्याः। जम्बुप्रभृतिसप्तद्वीपवत्याम् पृथिव्याम्। [चन्द्रे।

अब्धिनवनीतक पु० अब्धेः समुद्रस्य नवनीतमिव स्वार्थे क।

अब्धिमण्डूका स्त्री० अब्धिं मण्डयति मण्ड-ऊक गौरा० ङीष्। मुक्तासाधने शुक्तौ। [शेते।

अब्धिशयन पु० अब्धौ शयनमस्य। विष्णौ, सहि प्रलये अब्धौ

अब्भक्ष पु० अपोभक्षयति। सर्पभेदे। नित्यं जलपायिनि त्रि०

अभ्र न० अपो बिभर्त्ति भृ-क। मेघे,। न बिभर्त्ति किञ्चित्। बकारहीन एवायं गगने।

अभ्रंलिह पु० अभ्रं मेघं लेढि अत्युच्चतया स्पृशति। लिहखश् मुम् च। वायौ। मेघस्पर्शिनि उच्चतमे त्रि०। [भेदे।

अभ्रक न० अभ्रमिव कायति राजते कै-क। [आव्] धातु-

अभ्रङ्कष न० अभ्रं कषति स्पर्शादिना पीड़यति। कष-खच् मुम् च। वायौ। अत्युच्चे त्रि०।

अभ्रपुष्प न० अभ्रस्य पुष्पमिव शुभ्रत्वात् कार्य्यत्वाच्च। जले। अभ्रमिव पुष्पमस्य ब०। वेतसवृक्षे पु०।

अभ्रमातङ्ग पु० अभ्रात्मको मातङ्गः शा०त०। ऐरावते गजे।

अभ्रमु स्त्री० अभ्रे अभ्रात्मके ऐरावते माति मा-डु। ऐरावतस्य योषिति।

अभ्रमुवल्लभ पु० अभ्रमो वल्लभः ६त०। ऐरावते गजे।

अभ्ररोहस् पु० अभ्रात् तच्छब्दात् रोहति रुह-असि। वैदूर्य्यमणौ तस्य हि मेघशब्दादुद्भेदः इति प्रसिद्धम्।

अभ्रोत्थ न० अभ्रात् तन्निघर्षणादुत्तिष्ठति स्था-क। वज्रे।

अब्र(ब्र)ह्मण्य न० ब्र (ब्र) ह्मणि वेदे साधु ब्रह्मन्+यत्। न०ब०। हिंसाया वेदनिन्दितत्वात्। नाट्योक्तौ अयं न वध्य इत्याकारके वाक्ये ब्रह्मण्याभावे च। ब०। ब्रह्मण्यशून्ये त्रि०।

ब्रा(ब्रा)ह्मण पु० अप्राशस्त्ये नञा त०। अपकृष्टविप्रे।

भ ध्वनौ भ्वा०आत्म० इदित् अक० सेट्। अम्भते आम्भिष्ट।

अभय न० भी-अच् न०त०। भयाभावे। ६ब०। भयशून्ये त्रि० न भयमस्मात् ५ब०। परमात्मनि, तज्ज्ञाने च। अभयं वै जनक! प्राप्तोऽसीति श्रुतिः। हरितक्यां स्त्री०।

अभयडिण्डिम पु० अभयार्थं डिण्डिमः। जयढक्कायाम्।

अभाव पु० भू-घञ् न०त०। मरणे अविद्यमानतायाम्। न्यायमते द्रव्यादिषट्कं भावः पदार्थस्तद्भिन्ने।

अभाषण न० भाष-ल्युट् न०त०। मौने,कथनाभावे च।

अभि अव्य०न भाति भा-कि। कश्चित् प्रकारं प्राप्तस्य द्योतने, आभिमुख्ये, अभिलाषे, वीप्सायां, लक्षणे, समन्तादर्थे च।

अभिक त्रि० अभिकामयते अभि+कम-नि०। कामुके।

अभिक्रम पु० अभि+क्रम भावे घञ् अवृद्धिः। आरम्भे,आरोहणे, युद्धे,शत्रुसंमुखयाने। कर्मणि वञि। आरब्धे। [च।

अभिख्या स्त्री० अभि+ख्या-अङ्। अभिधाने,शोभायां, कीर्त्तौ

अभिग्रस्त त्रि० अभि+ग्रस-क्त। शत्रुभिराक्रान्ते।

अभिग्रह पु० अभि+ग्रह-अच्। लुट इतिख्याते, प्रकाशहरणे, अभियोगे, आभिमुख्येनोद्यमे, गौरवे च। ल्युटि अभिग्रहणमप्यत्र न०।

अभिघात पु० अभि+हन-घञ्। प्रहारे, क्रियाभेदेन द्रव्यस्य द्रव्यान्तरेण संयोगविशेषे, यथा वर्णोच्चारणकाले कण्ठतालुप्रभृतिषु स्थानेषु वायोः संयोगः। संबन्धमात्रे च।

अभिघातिन् पु० अभि+हन-णिनि। शत्रौ। प्रागुक्ताभिघातवति त्रि०।

अभिघार पु० अभि+घृ-भावे-घञ्। होमे आभिमुख्येन घृतादेः सेचने। कर्मणि घञ्। सिच्यमाने घृते।

अभिचार पु० अभि+चर-घञ्। हिंसाफलकेषु मारणोच्चाटनस्तम्भनप्रभृतिषु अथर्ववेदतन्त्रादिप्रसिद्धेषु कर्मसु।

अभिजन पु० अभिजन्यतेऽस्मिन् जन-घञ् अवृद्धिः। कुले, ख्यातौ, जन्मभूमौ, कुलश्रेष्ठे च।

अभिजात त्रि० अभि प्रशस्तं जातं जन्म यस्य। कुलीने, पण्डिते, श्रेष्ठे च। अभिजन्माप्यत्र।

अभिजित् न० ज्योतिषपरिभाषिते उत्तराषाढ़ानक्षत्रस्य शेषचतुर्थांशसहितश्रवणानक्षत्राद्यकलाचतुष्करूपे राशिचक्रस्योनविंशात्मककलांशे। अभिमुखीभूय जयति शत्रूननेन अभि+जि-करणे क्विप्। शत्रुजयिनि, यात्रानुकूललग्नभेदे, पञ्चदशधाविभक्तदिनस्याष्टमे भागे स्मृतिप्रसिद्धे कुतपकाले च

अभिज्ञ त्रि० अभिजानाति अभि+ज्ञा-क०। निपुणे, पण्डिते च

अभिज्ञा स्त्री० अभि+ज्ञा-अङ्। प्रथमसमुत्पन्ने ज्ञाने।

अभिज्ञान न० अभिज्ञायतेऽनेन। अभि+ज्ञा-करणे ल्युट्। सोऽयमिति ज्ञानसाधने चिह्ने।

अभितस् अव्य० अभि+तसिल्। सामीप्ये, आभिमुख्ये उभयतोऽर्थे, शीघ्रतायाञ्च।

अभिद्रवण न० अभि+द्रु-ल्युट्। वेगेन गमने।

अभिद्रोह पु० अभि+द्रुह-घञ्। आक्रोशे, अनिष्टचिन्तने, अपकारे च।

अभिधा स्त्री० अभि+धाञ्-भावे अङ्। अभिधाने, शब्दनिष्ठे अर्थबोधजनकताशक्तिभेदे च। अभिधीयतेऽनेनेति करणे अङि। वाचकशब्दे। भट्टमते अर्थफलजनकव्यापाररूपायां शब्दार्थनिष्ठायां भावनायाञ्च।

अभिधान स्त्री० अभि+धा-भावे ल्युट्। कथने। करणे ल्युट्। संज्ञायां,शब्दार्थप्रतिपादके निघण्टुकोषादिनामके ग्रन्थे च।

अभिधेय त्रि० अभि+धा-कर्मणि यत्। वाक्यार्थे, संज्ञिनि च।

अभिध्या स्त्री०अभि+ध्यै-अङ्। परधनस्याजिहीर्षायां,जिघृक्षायां,चिन्तने, विषयप्रार्थनायां च।

अभिनन्द पु० अभि+नन्द-घञ्। सन्तोषे,प्रतिपाद्यगुणकथनादिप्रवर्त्तके ज्ञाने,प्रशंसायाञ्च। ल्युटि। अभिनन्दनमप्यत्र न०।

अभिनय पु० अभि+नी-करणे अच्। हृद्गतभावव्यञ्जके शरीरचेष्टादौ। भावे अचि। अभिनेयपदार्थस्य शरीरचेष्टाभाषणादिभिरनुकरणे। अभिनयति बोधयत्यर्थमत्र आधारे अच्। शरीरचेष्टादिभिर्दृश्यपदार्थज्ञापके रूपकादौ दृश्यकाव्ये।

अभिनव पु० अभि-नु-अप्। स्तवने। नूतने त्रि०।

अभिनवोद्भिद् (द) पु० अभिनवमुद्भिद्य जायते उद्+भिद्-क्विप् क वा। अङ्कुरे। [च।

अभिनहन न० अभि+नह+ल्युट्। अभितोबन्धने, दृढबन्धने

अभिनिर्मुक्त पु० अभि सर्वतः सायन्तनकर्म्मणा निर्मुक्तः। सूर्यास्तकाले निद्रावशात् त्यक्ततत्कालकर्त्तव्यकर्म्मणि।

अभिनिर्याण न० अभि-निर्+या+ल्युट्। जिगीषया गमने।

अभिनिवेश पु० अभितोनिवेशः घञ्। अवश्यमिदं कर्त्तव्यमित्याग्रहसमन्विते मनःसंयोगभेदे,योगशास्त्रप्रसिद्धे मरणभीतिजनके अज्ञानविशेषे, अनित्यैरपि देहादिभिर्वियोगो मा भूदिति मरणनिवारणार्थमाग्रहे च।

अभिनीत त्रि॰ अभि नी-क्त । युक्ते, विनीते, अक्रोधने, क्षमावति, भूषिते च । [आभिमुख्येन गते च ।

अभिपन्न त्रि॰ अभि+पद-क्त । अपराधवति, आपद्गते, स्वीकृते,

अभिप्राय पु॰ अभि+प्र+इण-अच् । आशये, सम्मतौ च ।

अभिभव पु॰ अभि+भू-अप् । पराजये, तिरस्कारे, अनादरे, च

अभिभूत त्रि॰ अभि+भू-क्त । किं कर्त्तव्यमिति ज्ञानशून्ये, पराभूते, व्याकुले च ।

अभिमत त्रि॰ अभि+मन-क्त । सम्मते, आदृते, अभीष्टे च ।

अभिमन्त्रण न॰ अभि+मन्त्र-ल्युट् । मन्त्रपाठेन संस्कारकरणे, निमन्त्रणे, आह्वाने च । [चक्षूरोगभेदे ।

अभिमन्थ (न्य) पु॰ अभि+मन्थ-अच् मन्थ इति पक्षे मन-श ।

अभिमर पु॰ अभिम्रियतेऽत्र मृ-अप् । युद्धे, मरणनिरपेक्षतया कृते युद्धोत्साहे च ।

अभिमर्द्द पु॰ अभि-मृद-घञ् । युद्धे, मद्ये, पीड़ने च ।

अभिमान पु॰ अभि+मन-घञ् । आत्मन्युत्कर्षारोपे, मिथ्यागर्व्वे, अर्थादिदर्पे, ज्ञाने, प्रणये, हिंसायाञ्च ।

अभिमुख त्रि॰अभिगतो मुखं गतिस॰ । सम्मुखे । स्त्रियां ङीप् ।

अभिमृष्ट त्रि॰ अभि+मृष-क्त । संमृष्टे, मिलिते, संबद्धे च ।

अभियुक्त त्रि॰ अभि+युज-क्त । परैः रुद्धे, आसक्ते, व्यवहारविषये, प्रतिवादिनि च ।

अभियोक्तृ त्रि॰ अभि+युज-तृच् । व्यवहारे अपराधयोजनकर्त्तरि वादिनि, अभियोगकर्त्तरि च ।

अभियोग पु॰ अभि+युज-घञ् । अन्यकृतस्य निजधर्षणस्य न्यपाय विज्ञापने, युद्धार्थमाह्वाने, अपचिकीर्षयाक्रमणे, आग्रहे, शपथे, उद्योगे च । [प्रिये, मनोहरे च ।

अभिराम त्रि॰ अभिरम्यतेऽस्मिन् रम-आधारे घञ् । सुन्दरे,

अभिरूप पु॰ अभिरूपयति सर्व्वं स्वात्मकं करोति चु॰रूप-अच् । शिवे, विष्णौ च । अभिरूपयति निरूपयति । पण्डिते । उत्कृष्टं रूपं यस्य । कन्दर्पे, चन्द्रे च । मनोहरे त्रि॰ ।

अभिलाप पु॰ अभिलप्यते संकल्प्यतेऽनेन करणे लप-घञ् । देशकालादिकीर्त्तनपूर्व्वकं विहितकर्म्मैतदहं करिष्ये इत्येवं रूपे वाक्ये । कर्म्मणि घञ् । शब्दे ।

अभिलाव पु॰अभि+लू-घञ् । छेदने ।

अभिलाष (श) पु॰ अभि+लष(श)-घञ् । इच्छायां, लोभे च । आभिलाषोऽप्यत्रार्थे । [वद-घञ् । प्रणामे ।

अभिवाद पु॰ अभि+वद-घञ् । अप्रियवाक्ये । अभि+चु॰

अभिवादन न॰ अभि+चु॰वद॰ ल्युट् ॥ अभिमुखीकरणार्थं वाचिके प्रणामे । आभिमुख्याय आनुकूल्याय वाद्यते आशीः कार्य्यतेऽनेन वद-णिच्-ल्युट् । स्वनामोच्चारणपूर्व्वकं नमने । तत्प्रकारस्तु ब्रहद्भिधाने ।

अभिविधिः पु॰ अभि+वि+धाञ्-कि । व्याप्तौ, सहार्थे च ।

अभिव्यक्त पु॰ अभि+वि+अनृज-क्त । उत्पत्त्यादिना प्रत्यक्षयोग्यतामापन्ने ।

अभिव्यक्ति स्त्री॰अभि+वि+अनृज-क्तिन् । प्रत्यक्षयोग्यतायां

अभिव्याप्ति स्त्री॰ अभितो-व्याप्तिः वि+आप-क्तिन् । साकल्येन योगे, सर्व्वावयवसम्बन्धे, सर्व्वतोवृत्तौ च ।

अभिशप्त त्रि॰ अभि+शप-क्त । इदं तेऽनिष्टं भूयादित्येवं रूपस्य गुरुविप्राद्यभिशापस्य उद्देश्ये ।

अभिशस्त त्रि॰ अभि+शनृस-क्त । अयं परस्त्रियं गच्छतीत्यादिना मिथ्यावाक्येन मैथुनविषयको दोषारोपो यस्मिन् जने क्रियते तस्मिन् । [कृतमिति मिथ्यापवादे ।

अभिशस्ति स्त्री॰ अभि+शनृस-क्तिन् । स्वर्णस्तेयादिकमनेन

अभिशाप पु॰ अभि+शप-घञ् । स्वर्णमनेन हृतमित्यादि मिथ्यादूषकवाक्यकथने । द्विजगुरुप्रभृतिकर्त्तृके अनिष्टं ते भूयादित्येवमनिष्टस्याशंसने च ।

अभिषङ्ग पु॰ अभि+सनृज-घञ् । पराभवे, आक्रोशे, शपथे, व्यसने च "अभिषङ्गजडं विजज्ञिवानि" ति रघुः ।

अभिषव पु॰ अभि+सु-अप् । यज्ञान्तस्नाने, यज्ञे, स्नाने, पीड़ने, सुरोत्पादनादिव्यापारे, सोमलतापाने, तत्कण्डने च ।

अभिषवण न॰ अभि+सु-ल्युट् । स्नाने, यज्ञान्ते स्नाने, सोमादिकण्डने च ।

अभिषेक पु॰ अभि+सिच्-घञ् । विधिना शान्त्यर्थं सेचने, अधिकारप्राप्त्यर्थं स्नाने, यथा राज्याधिकारार्थं राज्येऽभिषेकः वाममार्गे शक्ति दीक्षायामधिकारार्थं शाक्ताभिषेकश्च मन्त्रादिना शिरसि जलप्रक्षेपमात्रेण मार्ज्जने च ।

अभिषेणन न॰ सेनया शत्रोरभिमुखं यानम् अभि+सेना+णिल्युट् षत्वणत्वे । सेनया शत्रुं योधयितुं तदभिमुखगमने ।

अभिष्टुत त्रि॰ अभि+स्तु-क्त । वर्णिते, स्तुते च ।

अभिष्यन्दः पु॰ अभि+स्यन्द-भावे घञ् । अतिवृद्धौ स्रवणे, जलादिक्षरणे च । कर्म्मणि घञि । अधिके । स्वर्गाभिष्यन्दवमनमिति कुमारः । करणे घञि । नेत्ररोगे ।

अभिष्यन्दनगरं पु॰ अभिष्यन्देन प्रधाननगरातिवृद्ध्या तदतिवाहेन कृतं नगरम् । शाखानगरे ।

अभिसन्ताप पु॰ अभि+सम्+तप-आधारे घञ् । युद्धे । भावे घञि । अभिशापे, सन्तापे च ।

अभिसन्धान न॰ अभि+सम्+धा-ल्युट् । वञ्चने, प्रतारणे च ।

अभिसन्धि पु० अभि+सम्-धा-कि । अभिसन्धाने, उद्देशे च ।

अभिसम्पात पु० अभि+सम्-पत-आधारे घञ् । युद्धे । भावे घञि । पतने । [स्त्रियां ङीप् ।

अभिसर त्रि० अभितः सरति सृ+ट । सहाये, अनुचरे

अभिसर्ज्जन न० अभि+सृज-भावे ल्युट् । दाने, बधे च ।

अभिसार पु० अभि+सृ-घञ् । बले, युद्धे, साहाय्ये, साधने, स्त्रियाः पुंसो वा संभोगार्थं निर्ज्जनसङ्केतस्थानगमने च ।

अभिसारिका स्त्री० अभि+सृ-सारेर्वा ण्वुल् । कान्तप्रार्थनया स्वयं संकेतस्थानगामिन्यां, स्वस्थाने वा कान्तानयनकारिण्यां स्त्रियाम् ।

अभिसारिणी स्त्री० अभि+सृ-णिनि । अभिसारिकायाम् ।

अभिसृष्ट पु० अभि+सृज-क्त । दत्ते,उत्सृष्टे, त्यक्ते च ।

अभिहार पु० अभि+हृ-घञ् । अपचिकीर्षया अभिगम्याक्रमणे,साक्षाच्चौर्य्ये, अभियोगे, कवचादिधारणे च ।

अभीक त्रि० अभिकामयते अभि+काम-नि० । कामुके, स्वामिनि, क्रूरे, निर्भये च । कवौ पु० ।

अभीक्ष्णम् अव्य०अभिक्ष्णौति क्ष्णु-अमु दीर्घः । नित्ये,शश्वदर्थे, भृशे च । तद्वति द्रव्ये प्रकृष्टे भृशे सतते च त्रि० ।

अभीरु स्त्री० भी-रुक् न०त० । शतमूल्याम् असङ्कुचितपत्त्रत्वादभीरुत्वमस्याः । भयशून्ये त्रि० । [शतमूल्याम् ।

अभीरुपत्री स्त्री० न भीरूणि असंकुचितत्वात् पत्राण्यस्याः ।

अभीषङ्ग पु०अभि+सनृज-घञ् दीर्घः । आक्रोशे, शापे च ।

अभीषु पु०अभि+इष-कु । किरणे,लागाम इति ख्याते प्रग्रहे, कामे, अनुरागे च ।

अभीष्ट त्रि० अभि+इष-क्त । वाञ्छिते, दयिते, हृद्ये च ।

अभेद पु० भिद+घञ् न०त० । भेदाभावे, तादात्म्ये, अविशेषे च । ब० । विशेषशून्ये, भेदशून्ये च त्रि० ।

अभेद्य न० कर्म्मणि भिद-ण्यत् न०त० । हीरके । भेदनानर्हे त्रि०

अभ्यग्र त्रि० अभिमुखमग्रं यस्य । निकटे, आसन्ने च ।

अभ्यङ्ग पु० अभि+अनृज-घञ् कुत्वम् । तैलादिमर्द्दने ।

अभ्यञ्जन न० अभ्यज्यतेऽनेन करणे अनृज-ल्युट् । तैलादौ । भावे ल्युटि अभ्यङ्गे ।

अभ्यधिक त्रि० अभितोऽधिकः । सर्वथोत्तमे ।

अभ्यन्तर न० अभिगतमन्तरम् । अन्तराले, मध्यस्थाने ।

अभ्यमित त्रि० अभि+अम-रोगे क्त । रोगयुक्ते ।

अभ्यमित्रीण त्रि० अभि+अमित्रमलं गामी ख । शत्रुमभि, सामर्थ्येन गन्तरि । [सामर्थ्येन गामिनि ।

अभ्यमित्रीय त्रि० अभि+अमित्रमलं गामी छ । शत्रुमभि,

अभ्यमित्र्य त्रि०अभि+अमित्रमलं गामी यत् । शत्रुमभि,सामर्थ्येन गन्तरि । [दस्य नत्वम् । समीपे ।

अभ्यर्ण त्रि० अभि+अर्द्द-कर्म्मणि क्त अविदूर्य्ये इड़भावः

अभ्यर्हित त्रि० अभि+अर्ह-क्त । उचिते,श्रेष्ठे, पूजिते च ।

अभ्यवकर्षण न० अभि+अव+कृष-ल्युट् । शल्यादेरुद्धारणे ।

अभ्यवस्कन्द पु०अभि+अवस्कन्द-घञ् । शत्रोराक्रमे,शत्रुभिः क्रियमाणे प्रहारे, आसादने, प्रपाते च । ल्युटि । अभ्यवस्कन्दनमप्यत्रार्थे न० ।

अभ्यवहार पु० अभि+अव+हृ-घञ् । भोजने । [करणे ।

अभ्यसन पु० अभि+अस-ल्युट् । अभ्यासे पौनःपुन्येनैकक्रिया-

अभ्यसूया स्त्री० अभि+असू-उपतापे कण्ड्वादि० यक् प्रत्ययान्तत्वात् अ, स्त्रीत्वात् टाप् । गुणेषु दोषारोपणे ।

अभ्याकाङ्क्षित न० अभि+आ+काङ्क्ष-क्त । मिथ्याभियोगे ।

अभ्याख्यान न० अभि+आ+ख्या-ल्युट् । मिथ्याभियोगे, मिथ्योद्भावने च । [णौ । सम्मुखागतमात्रे त्रि० ।

अभ्यागत पु०अभि+आ+गम-क्त । अदृष्टपूर्व्वे स्वगृहं गतेऽतिथि-

अभ्यागम पु० अभि+आ+गम-घञ् अवृद्धिः । विरोधे,समरे, अन्तिके अभिगमने, भोगे, स्वीकारे, फलसंबन्धे च ।

अभ्यागारिक त्रि० अभि+अगारे तद्गते व्यापृतः ठक् । स्वगृहवृत्तिपुत्रादिपोषणे व्याकुले । [आरम्भे च ।

अभ्यादान न० अभि+आ+दा-ल्युट् । आभिमुख्येनादाने,

अभ्यान्त त्रि० अभि+अम-क्त नि० । रोगयुक्ते ।

अभ्यामर्द्द पु० अभि+आ+मृद-आधारे घञ् । रणे । [च ।

अभ्याश पु०अभि+अशू-व्याप्तौ घञ् । अवश्यमेवेत्यर्थे अन्तिके

अभ्यास पु० अभि+अस-घञ् । आवृत्तौ । गुरोराकर्णनं, तदर्थे युक्तायुक्तत्वविचारः, पौनःपुन्येन तदावृत्तिः, शिष्येभ्योदानमित्येवंरूपविद्याभ्यासे, पौनःपुन्येन कीर्त्तने, अन्तिके, विजातीयज्ञानानन्तरिते सजातीयैकरूपज्ञानप्रवाहरूपे ध्यानादेरभ्यासे च ।

अभ्यासादन न० अभि+आ+सद-णिच्-ल्युट् । शस्त्राद्यैः शत्रोर्निर्वीर्य्यताकरणे,शत्रोः सम्मुखगमने च ।

अभ्याहार पु० अभि+आ+हृ-घञ् । अभिहारार्थे ।

अभ्युत्थान न० अभि+उत्-स्था-ल्युट् । आदरेणासनादित उत्थाने गौरवेणोत्थानादिना प्रत्युद्गमने, उत्थितिमात्रे, उद्यमे, उद्भवे च ।

अभ्युदय पु० अभि+उत्-इण्-अच् । अभीष्टकार्य्याणां प्रादुर्भावे, वृद्धौ, आग्राशमानचूडादिसंस्कारे च । अतएव तदर्थकश्राद्धम् आभ्युदयिकमित्युच्यते ।

अभ्युदित पु॰ अभितः सर्व्वतः उदतिशयेन इतं गतं प्रातर्विहितं कर्म्म यस्मात् । सूर्य्योदयकाले निद्रयाटस्ततत्कालकर्त्तव्ये ब्रह्मचारिणि । उदिते, प्रकाशिते च त्रि॰ ।

अभ्युद्यत त्रि॰ अभि+उत्-यम-क्त । अयाचितोपस्थितेऽन्नादौ

अभ्युपगम पु॰ अभि+उप+गम-घञ् अवृद्धिः । स्वीकारे समीपगतौ च ।

अभ्युपपत्ति स्त्री॰ अभि+उप+पद-क्तिन् । अनिष्टनिवारण पूर्व्वकाभीष्टसम्पादनरूपे अनुग्रहे, सान्त्वने च ।

अभ्युपाय पु॰ अभि+उप+इण्-अच् । स्वीकारे अधिकोपाये

अभ्र गतौ भ्वादि॰पर॰सक॰सेट् । अभ्रति । आभ्रीत् ।

अभ्रि स्त्री॰ अभ्र-गतौ-इन् । नौकामलापकर्षार्थं काष्ठरचिते कुद्दाले । स्त्रियां ङीपि अभ्रीत्यपि ।

अभ्रेष पु॰ भ्रेष-चलने घञ् न॰त॰ । न्याय्ये, उचिते च ।

अम रोगे चुरा॰ उभय॰अक॰सेट् । आमयति ते आमिमत् त ।

अम गतौ, भोजने, शब्दे च भ्वादि॰ अक॰ सेट् । अमति आमीत्

अम पु॰ अम-घञ् अवृद्धिः । रोगे । अपक्वफलादौ त्रि॰ ।

अमङ्गल पु॰नास्ति मङ्गलं यत्र । एरण्डवृक्षे । ६ब॰। कुशलशून्ये त्रि॰ । न॰त॰ । मङ्गलाभावे । [पात्रे ।

अमत्र न॰ अमत्यन्नमत्र अम-भोजने आधारे त्रल् । भोजन-

अमर पु॰ मृ-पचाद्यच् न॰त॰ । देवे, अष्टशाब्दिकमध्ये अमरसिंहनामके शाब्दिके, स्नुहीवृक्षे, स हि छिन्नोऽपि पुनःपुनः प्ररोहति, सहसा न म्रियते । पारदे, तस्यापि वज्रादौ बहुतापनेऽपि ध्वंसः । अस्थिसंहारवृक्षे च स हि बहुकालं भूमौ स्थितोऽपि न जीर्य्यति । ६ब॰ मरणशून्ये त्रि॰ ।

अमरद्विज पु॰ अमरपूजकः द्विजः शाक॰ त॰ । देवले पूजारीति ख्याते विप्रे । [इन्द्रुगन्धायां स्त्री॰ ।

अमरपुष्पक पु॰ अमरमविशीर्णं पुष्पं यस्य । कल्पवृक्षे,

अमरा स्त्री॰ मृ-पचाद्यच् न॰त॰। दूर्व्वायां, गुडूच्यां, स्थूणायां, जरायौ, वटवृक्षे, घृतकुमार्य्यां च । अर्श आदित्वादचि । देवनगर्य्याममरावत्याम् ।

अमराद्रि पु॰ अमराणामद्रिः ६त॰ । सुमेरुपर्व्वते ।

अमरालय पु॰ अमराणामालयः । स्वर्गे । [इन्द्रनगर्य्याम् ।

अमरावती स्त्री॰ अमराविद्यन्तेऽस्यां मतुप् वत्वं दीर्घः ।

अमर्त्य पु॰ मृतिमर्हति यत् मर्त्यः न॰त॰। मरणशून्ये देवे ।

अमर्त्त्यभवन न॰ अमर्त्यानां देवानां भुवनम् । स्वर्गे ।

अमर्ष पु॰ मृष-क्षान्तौ घञ् विरोधे न॰त॰। क्षमाविरुद्धे कोपे ।

अमर्षण त्रि॰ मृष-ल्यु न॰त॰। क्रोधने, असहने च ।

अमल न॰अम+कलच् । अभ्रके । निर्मले, दोषरहिते च त्रि॰ लक्ष्म्यां, भूम्यामलक्यां, नाभिनालायां च स्त्री॰ ।

अमा अव्य॰ न माति क्विप् । सहार्थे, निकटे च । अमावास्यायां तिथौ चन्द्रस्य सर्व्वकलाव्यापकतया स्थितायां सूर्य्यकिरणासंपर्काददीप्तायां कलायाञ्च स्त्री॰ ।

अमांस त्रि॰नास्ति मांसं यस्य । दुर्बले । मांसहीनो हि दुर्बलः ।

अमात्य पु॰ अमा सह वसति त्यक् । मन्त्रिणि । तस्य सहचरत्वात् । [मनःकष्टदायके दुःखे ।

अमानस्य न॰ मानसे साधु न भवति मानस+यत् न॰त॰ ।

अमाव(वा)स्या स्त्री॰ अमा सह वसतश्चन्द्रार्कौ यत्र वस-यत् यद्वा कृष्णपक्षशेषतिथौ तद्दिने चन्द्रार्कावेकराशिस्थौ ।

अमित्र पु॰ अम-रोगे इत्र । रिपौ । [त्रि॰ ।

अमुक्त न॰मुच-क्त न॰त॰। सदा धार्य्ये छुरिकाभेदे । मुक्तभिन्ने

अमुत्र अव्य॰ अदस्+त्रल् । परलोके, जन्मान्तरे च ।

अमूर्त्त त्रि॰ मूर्त्ति+अर्श आदित्वादच् न॰त॰ । मूर्त्तिशून्ये वाय्वादौ । [शून्ये त्रि॰ ।

अमूला स्त्री॰ नास्ति मूलं यस्याः । अग्निशिखावृक्षे । मूल-

अमृत न॰मृ-क्त न॰त॰। मोक्षे, होमावशिष्टद्रव्ये, सुधायां, जले, घृते, अमृतं स्यादयाचितमितिमनूक्ते अयाचितलब्धे च । परब्रह्मणि न॰ । मरणशून्ये त्रि॰ । विभीतके स्त्री॰ ।

अमृतजटा पु॰ अमृता जटा यस्याः । जटामांसीवृक्षे ।

अमृतदीधिति पु॰ अमृतमिवाप्यायनकरी दीधितिः किरणो यस्य । चन्द्रे । [पटोले पु॰ ।

अमृतफला स्त्री॰ अमृतमिव स्वादु फलं यस्याः । द्राक्षायाम्

अमृतयोग पु॰ ज्योतिषप्रसिद्धायां नक्षत्रविशेषयुक्तायां वारविशेष युक्तायाञ्च तिथौ ।

अमृतवल्ली स्त्री॰ अमृताय जीवनसाधनाय वल्ली । गुडूच्याम्

अमृतसू पु॰ अमृतं दीधितिरूपमाप्यायनं सूते सू-क्विप् । चन्द्रे । अमृतान् देवान् सूते । देवमातरि स्त्री॰ ।

अमृतसोदर पु॰ अमृतं सोदर एकस्थानजं यस्य । उच्चैःश्रवसि । उच्चैःश्रवसो हि समुद्रादुत्पत्तिः । तज्जातीयत्वात् घोटकमात्रे । [लतायाम् ।

अमृतस्रव स्त्री॰ अमृतमिव स्रवति स्रु-पचाद्यच् । रुदन्ती-

अमृतान्धस् पु॰ अमृतमन्धो भक्ष्यं यस्य । देवमात्रे ।

अमृताशन पु॰ अमृतमश्नाति अश-ल्यु । देवमात्रे ।

अमृताहरण पु॰ अमृतमाहरति मातृदास्यनिवारणार्थं स्वर्गात् भूलोकं नयति आ+हृ ल्यु । गरुड़े तस्यामृतहरणवृत्तान्तो महाभारते आदिप॰ २२अ॰ ।

अमेधस् त्रि॰ नास्ति मेधा यस्य ब॰असिच् । मूर्खे, अल्पबुद्धौ च

अमेध्य न० मेध्यं पवित्रं न०त०। पुरीषे । पवित्रभिन्ने त्रि० ।

अमोघ त्रि० मोघो निष्फलः न०त०। सफले,अव्यर्थे च। नद-भेदे पु० । पटोललतायां, हरितक्यां विड़ङ्गे च स्त्री० ।

अम्ब गतौ भ्वादि० पर०सक०सेट् । अम्बति आम्बीत् ।

अम्बक न०अम्बति शीघ्रं नक्षत्रस्थानपर्य्यन्तं गच्छति अम्ब-ण्वुल्। नेत्रे । अम्ब्यते स्नेहेनोपगम्यते घञ् स्वार्थे क । पितरि ।

अम्बर न० अबि शब्दे घञ् अम्बः शब्दस्तं राति धत्ते अम्ब+रा-क । शब्दाश्रये आकाशे, मर्म्मरशब्दयुक्ते वस्त्रे, स्वनाम ख्याते गन्धद्रव्ये, अभ्रकधातौ च ।

अम्बरि(री)ष न० अम्ब्यते पच्यतेऽत्र अम्ब-अरिष नि० वा दीर्घः । भाजनाखोला इति ख्याते भर्ज्जनपात्रे । अम्ब रीषमपि । दीर्घयुक्तस्तु विष्णौ,शिवे,भास्करे,बालके,आम्रा तकवृक्षे, नरकभेदे, अनुतापे, सूर्य्यवंश्यनृपभेदे च पु० ।

अम्बष्ठ पु० अम्बाय चिकित्सकशब्दाय तत्प्रख्यापनार्थं तिष्ठते-ऽभिप्रैति स्था क षत्वम् । चिकित्सके,विप्रात् वैश्यकन्यायां जाते सङ्कीर्णवर्णे, देशभेदे,हस्तिपके च । यूथिकायां स्त्री० स्वार्थे के ह्रस्वे अतइत्त्वे अम्बष्ठिकाप्यत्रैव वामनहाटीति प्रसिद्धायां ब्राह्मीलतायाञ्च ।

अम्बष्ठकी स्त्री०अम्बष्ठं कायति आदानार्थमाह्वयति कै-क गौरा० ङीष् । (पलाण्डु) इति ख्यातायां लतायां पाठायाञ्च ।

अम्बा स्त्री० अम्ब्यते स्नेहेनोपगम्यते अम्ब-कर्म्मणि घञ् । मातरि, नाट्योक्तावपि तत्रैव, अम्बष्ठालतायां, काशीराज-कन्यायाञ्च ।

अम्बाला स्त्री० अम्बेति शब्दं लाति धत्ते ला-क । मातरि ।

अम्बालिका स्त्री० अम्बालैव स्वार्थे के ह्रस्वे अत इत्त्वम् । मातरि, पाण्डुराजमातरि च।

अम्बिका स्त्री० अम्बैव स्वार्थे के ह्रस्वे अत इत्त्वम् । मातरि, धृतराष्ट्रराजमातरि, जगदुत्पादकत्वात् दुर्गायाम्, अम्बष्ठा लतायाम् कट्कीति ख्यातायां लतायाञ्च । [स्त्री०।

अम्बु न०अबि शब्दे-उ । जले। राम्ना इति ख्यातायां लतायां

अम्बुकण्ठक पु० अम्बुनः कण्ठकमिव । कुम्भीरे,शृङ्गाटके च ।

अम्बुकिरात पु० अम्बुनि किरात इव हिंस्रः । कुम्भीरे ।

अम्बुकीश पु०अम्बुनि कीशः वानर इव । शुशक इति ख्याते शिशुमारे जलजन्तुभेदे ।

अम्बुचामर न० अम्बुनि चामरमिव । शैवले ।

अम्बुज न० अम्बुनि जायते । पद्मे। चन्द्रे हिजल् इति ख्याते वृक्षे च पु० । शङ्खे पु०न० ।

अम्बुद पु० अम्बु ददाति दा-क । मेघे, मुस्तके च ।

अम्बुधि पु० अम्बूनि धीयन्तेऽत्र धा-आधारे कि । समुद्रे ।

अम्बुवाची स्त्री० "यस्मिन् वारे सहस्रांशुर्यत्कालं मिथुनं व्रजेत् । अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोरिति" ज्योतिषोक्तेः "रजोयुक् च्माम्बुवाची स्यादि"ति स्मृतेश्च सूर्य्याक्रान्तार्द्रानक्षत्रप्रथमचरणे जातरजस्कायां भूमौ ।

अम्बुधिस्रवा स्त्री० अम्बुधरिव स्रवति स्रु-अच् । पत्रान्त-र्बहुरसकायां घृतकुमार्य्याम् ।

अम्बुपत्रा स्त्री० अम्बूनि पत्रे यस्याः । उच्चटावृक्षे ।

अम्बुप्रसाद पु० अम्बूनि प्रसीदन्त्यनेन प्र+सद-घञ् । निर्मा-लीति प्रसिद्धे कतकवृक्षे । [च ।

अम्बुभृत् पु० अम्बूनि बिभर्त्ति भृञ्-क्विप्। मेघे समुद्रे मुस्तके

अम्बुमात्रज पु० अम्बुमात्रे जलमात्रे जायते जन-ड । शामुक इति ख्याते शम्बूके । [झिन्यां स्त्री०।

अम्बुरुह न०अम्बुनि रोहति जायते रुह-क। पद्मे। स्थलप-

अम्बुवासिनी स्त्री० अम्बुनि जलप्रधाने वसति वस-णिनि। पाटलावृक्षे । [मुस्तके च ।

अम्बुवाह पु० अम्बूनि वहति वह-अण् । मेघे, तन्नामनामके

अम्बुवाहिनी स्त्री० अम्बूनि वाहयति नौकातः वहिरपसा-रयति वह+णिच्-णिनि । काष्ठादिरचिते नौकाजल-सेचनीपात्रे ।

अम्बुवेतस पु० अम्बुजातोवेतसः शाक०त० । जलवेतसे ।

अम्बुशिरीषिका स्त्री०अल्पः शिरीषः अल्पार्थे के स्त्रीत्वम्। जलशिरीषे । [इति ख्यातायां जलौकायाम् ।

अम्बुसर्पिणी स्त्री०अम्बुनि सर्पति सृप-णिनि ७त०। (जोंक)

अम्बूकृत त्रि०अनम्बु अम्बु कृतं अम्बु श्लेष्मात्मकाम्बु उप-चारात्तद्युक्तं ततः च्वि-कृ-क्त। निष्ठीवनयुक्ते वचसि ।

अम्भस् न० अभि-शब्देऽसुन् । जले, बालानामौषधौ च ।

अम्भःसार न० अम्भसः सारः वा शरीति वा विसर्गः । मुक्ता-याम् । सत्वे अम्भस्सारमपि ।

अम्भोज न०अम्भसि जायते जन-ड ७त० । पद्मे। चन्द्रे पु० । शङ्खे पु०न० । जलजातमात्रे त्रि० । [पद्मसमूहे ।

अम्भोजख(ष)ण्ड न० अम्भोजानां समूहः अम्भोज+ख(ष)ण्ड

अम्भोजयोनि पु० अम्भोजः हरिनाभिपद्मं योनिः उत्पत्ति-स्थानं यस्य । विधातरि ।

अम्भोजिनी स्त्री० अम्भोज+समूहार्थे, तद्वति देशे वा इनि । पद्मसमूहे, पद्मयुक्तदेशे लतारूपे च ।

अम्भोद पु० अम्भो ददाति दा-क । मेघे, मुस्तके च । जल-दानकर्त्तरि त्रि० ।

अम्भोधर पु० अम्भोधरति धृञ-धारणे अच् । मेघे । समुद्रे, मुस्तके च ।

अम्भोधि पु० अम्भांसि धीयन्ते यत्र धा-आधारे कि । समुद्रे ।

अम्भोनिधि: पु० अम्भांसि निधीयन्तेऽत्र नि+धा-कि । समुद्रे

अम्भोराशि पु० अम्भसां राशिरिव एकत्रोपचितत्वात् । समुद्रे

अम्भोरुह न० अम्भसि रोहति रुह-क । पद्मे ।

अम्मय त्रि० अपां विकारः अप्+मयट् । जलविकारे फेनादौ ।

अम्र पु० अमति सौरभेण दूरं गच्छति अम-रन् । आम्रवृक्षे । फलपत्रादौ न० । एवं प्रायः सर्व्वत्र वृक्षवाचके ।

अम्रात पु० अम्रं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अत-अण् रस्य वा लत्वम् । (कामड़ा) अम्रातकवृक्षे स्वार्थे के अम्रातकोऽपि । वा रत्वाभावे अम्रातः । के। अम्रातकश्च।

अम्ल न० अम-क्त । (घोल) तक्रे । (टक)रसे पु०। तद्वति त्रि०।

अम्लक पु० अल्पोऽम्रः अल्पार्थे क । (मान्दार) नकुचवृक्षे ।

अम्लकेशर पु० अम्रः केशरोऽस्य । वीजपूरे ।

अम्लचूड़ पु० अम्ला चूड़ा शिखाऽस्य । अम्रशाके ।

अम्लजम्बीर पु० अम्रो जम्बीरः । (गोंड़ानेबु) जम्बीरवृक्षे ।

अम्लनायक पु० अम्लं रसं नयति नी-ण्वुल् । अम्लवेतसे ।

अम्लनिशा स्त्री० अम्लरसे निःशेषेण शेते शीङ्-ड । शठीवृक्षे

अम्लपत्र पु० अम्लं पत्रं यस्य । अश्मन्तकवृक्षे ।

अम्लपत्री स्त्री० अम्लं पत्रं यस्याः । पलाशीलतायाम् ।

अम्लपनस पु० अम्ल पनसः कर्म्म० । (मान्दार) नकुचवृक्षे ।

अम्लफल पु० अम्लं फलं यस्य । तेतुल इतिख्याते वृक्षाम्ले ।

अम्लभेदन पु० अम्लार्थं भिद्यतेऽसौ कर्म्मणि ल्युट् । अम्लवेतसे

अम्लरुहा स्त्री० अम्लाय रोहति रुह-क । मालवजनागवल्ल्याम्

अम्ललोनि(णि)का स्त्री० अम्लं रसं लाति ग्लाति अम्लल: तमनयति अल्पप्राणत्वात् हीनयति जन-ण्वुल् वा णत्वम् । आमरुल इति ख्याते लताभेदे ।

अम्लवती स्त्री० अम्लो रसो विद्यतेऽस्याः अम्ल+मतुप् वत्वम् अटरालु इति ख्याते लताभेदे ।

अम्लवन्ध्या स्त्री० वन्ध-कर्म्मणि ण्यत् । अम्लसंबद्धे, कन्दभेदे ।

अम्लवाटिका स्त्री० अम्लस्य रसस्य वाटिका स्थानमिव । नागवल्लीभेदे । [पालङ्क इति ख्याते चुक्रे ।

अम्लवास्तूक पु० अम्लरसान्वितोवास्तूकः शाकभेदः । चुक-

अम्लवीज न० अम्लस्य वीजं कारणम् । (तेंतुल) वृक्षाम्ले ।

अम्लवृक्ष न० अम्लस्य रसस्य वृक्षइवाधारः । (तेंतुल) वृक्षाम्ले।

अम्लवेतस पु० अम्लोवेतसइव नम्रश्च । चुका इति ख्याते चुक्रे।

अम्लशाक पु० अम्लः शाको यस्य । चुका इतिख्याते चुक्रे ।

अम्लसार पु० अम्लो रसएव सारः प्रधानं यस्य । चुक्रे निम्बुके, हिन्ताले च । काञ्जिके न० । [इति ख्याते वृक्षे ।

अम्लहरिद्रा स्त्री० अम्लरसान्विता हरिद्रा । आमहरिद्रा

अम्ला स्त्री० अम्लो विद्यतेऽस्या अर्शआद्यच् । तिन्तिड्याम् ।

अम्लाङ्कुश पु० अम्लम् अङ्कुशाकारमग्रं यस्य । चुक्रे ।

अम्लादन पु० अद्यते अद-कर्म्मणि ल्युट् कर्म्म० । कुरण्टक वृक्षे । [वृक्षे । म्लानभिन्ने त्रि० ।

अम्लान पु० म्लै-क्त न०त० । आमला इति ख्याते महासहा

अम्लिका स्त्री० अम्लैव स्वार्थे क । तिन्तिड्याम् । अत्राम्लीकेत्यपि

अय गतौ भ्वा० आत्म० सक० सेट् । अयते आयिष्ट ।

अय पु० एति सुखमनेन इण्-करणे अच् । प्राक्तने शुभकर्म्मणि, शुभदायके-दैवे विधाने च । [नरकभेदे । अयस्पानमप्यत्र ।

अय:पान न० अयः,द्रवीभूतं तप्तलौहं पीयतेऽत्र ल्युट् ।

अय:शूल न० अय इव शूलम् उपतापकम् । तीव्रे उपतापे, लौहकृतास्त्रभेदे च, अयश्शूलमप्यत्र । [माघे पु० ।

अयज्ञिय त्रि० यज्ञाय साधुर्न भवति यज्ञ+यत् । यज्ञानर्हे ।

अयन न० अय-भावे ल्युट् । गतौ, दक्षिणत उत्तरस्याम्, उत्तरतश्च दक्षिणस्यां सूर्य्यस्य गतौ, तथाहि द्वादशराश्यात्मकस्य राशिचक्रस्यार्द्धं मकरावधि मिथुनपर्य्यन्तं राशिषट्कं क्रमेण उत्तरायनतं तत्र स्थितोऽर्कः स्वगत्या प्राचीं गच्छन्नपि किञ्चित् किञ्चित्तिर्य्यग्गत्या उत्तरामभिक्रामति ततः कर्कटावधि धनुःपर्य्यन्तं राशिषट्कं क्रमेण दक्षिणावनतं तत्र स्थितोऽर्कः प्राग्वत् दक्षिणामेवाभिक्रामति सेयं गतिरयनशब्देन ज्योतिषे व्यवह्रियते एवञ्च सौरैः षड्भिर्मासैरेकमयनमित्यपि तत्र प्रसिद्धम् । "अयनविष्णुपदी षड़शीतय" इतित्युक्तेरयनाख्यसंक्रान्तौ, सा हि पारिभाषिकायनशब्दवाच्या । नभोमण्डले प्रवहानिलेन पश्चाद्गत्या बंभ्रम्यमाणस्य राशिचक्रस्य निराधारतया दोलायमानत्वेन सप्तविंशांशपर्य्यन्तं प्राक्, पश्चाच्च, या गतिर्भवति तत्रापि, तद्धि अष्टमासाधिक ६६।८ षट्षष्टिवर्षैरेकैकमंशमतीत्य प्राक् पश्चाद्वा चलतीति १८०० अष्टादशशतवर्षैः सप्तविंशांशपर्य्यन्तं प्राक्गत्वा पुनः पश्चात्,पश्चाद्गत्वा च प्रागवलम्बते । यदा चैवं राशिचक्रं प्राक् गच्छति तदा राशिचक्रनिर्द्दिष्टमेषादिस्थानात् उक्तकालभेदेनैकैकांशातिक्रमेण क्रमशः प्राचि, प्राक्तरे,प्राक्तमे,वा स्थाने रव्यादिग्रहाणां प्रभापुञ्जसञ्चारः, यदा तु पश्चादवलम्बते तदा निर्दिष्टमेषादिस्थानात् तथैव परे, परतरे, परतमे, च स्थाने ग्रहाणां प्रभासञ्चार इति भेदः । इदानीञ्च पश्चिमगयनं ततः पश्चादेव ग्रहप्रभा-

ञ्चारः। तथाच ज्योतिषोक्तगणितरीत्या मेषादितः पश्चादेकविंशांशे मीनादौनवमांशे एवेदानीं विषुवादिसंक्रान्तिर्भवति एवं विष्णुपद्यादीनामपि तत्तदंश एव ग्रहप्रभासञ्चारः। अयनांशानुसारेण ग्रहप्रभासञ्चारस्वीकारः दिनमानविशेषस्य, लग्नपरिमाणस्य, छायापदविशेषस्य, च बोधार्थमिति सिद्धान्ते प्रसिद्धम्। करणे ल्युट्। उक्तायनज्ञानसाधने शास्त्रे, "ज्योतिषामयनञ्चैवेति" सैन्यनिवेशविशेषरूपव्यूहप्रवेशमार्गे च "अयनेषु च सर्व्वेषु यथाभागमवस्थिताः" इति गीता। आधारे ल्युट्। पथि, गृहे, आश्रये, स्थाने, "ता यदस्यायनं पूर्व्वमिति" मनुः। प्रागुक्तराशिचक्रस्य अंशरूपे गतिस्थानविशेषे च "तत्काले सायनार्कस्येति" नीलकण्ठः।

अयनसंक्रान्ति स्त्री॰ अयनेन राशिचक्रस्य पश्चात्, प्राग्वागत्या कृता संक्रान्तिर्ग्रहाणां प्रभापुञ्जस्य सञ्चारः सम्+क्रम-क्तिन्। चलसंक्रान्तौ, मेषादिभिर्द्वादशसु स्थानेषु विभक्तस्य राशिचक्रस्य प्राक् पश्चाद्वा दोलायमानतया निर्द्दिष्टमेषादिस्थानात् पश्चात् पूर्व्वं वा ग्रहप्रभापुञ्जसंचारः आक्रान्तराशिं विहाय राश्यन्तरे गमनं चलसंक्रान्तिः अनियतस्थानतया चलत्वात्। निर्द्दिष्टराशिस्थानेषु ग्रहाणां मण्डलसञ्चारः अचलसंक्रान्तिः राशिसंक्रान्तिरिति चोच्यते नियतमेकस्थाने एव जायमानत्वादचलत्वम्। अनयैव संक्रान्त्या यथा मासादिव्यवहारे न दोषः चलसंक्रान्त्या तु बहवो दोषास्तथा वृहदभिधाने वक्ष्यते।

अयस् न॰ इण-असुन्। लौहे, तद्धि स्थावरमप्ययस्कान्तसान्निध्यात् चलति।

अयस्कान्तः पु॰ अयसां मध्ये कान्तः रमणीयः कस्कादित्वात् सत्वम्। कान्तिलौह इति ख्याते लौहभेदे। ६त॰। सन्निधिमात्रेण लौहाकर्षके चुम्बक इति ख्याते प्रस्तरभेदे च।

अयस्कार पु॰ अयस्-कृ-अण् उप॰स॰। लौहकारे।

अयाचित न॰ याच-क्त न॰त॰। अमृताख्यवृत्तौ "अमृतं स्यादयाचित"मिति मनुः। अप्रार्थिते त्रि॰।

अयि अव्य॰ इण-इन्। प्रश्ने, अनुनये, संबोधने, अनुरागे च

अयुक्छद पु॰ अयुजः सप्तसप्त छदा अस्य। वृत्तौ संख्याया वीप्सार्थत्वम् (छातिम) इतिख्याते सप्तपर्णवृक्षे।

अयुक्त त्रि॰ न+युज-क्त। विषयासक्ततया कर्त्तव्येष्वनवहिते, अनुचिते, आपद्गते च।

अयुग्म न॰ न युग्मात्मकम्। विजोड़ इति ख्याते विषमे।

अयुग्मच्छद पु॰ अयुग्मानि सप्त सप्त छदा अस्य। सप्तपर्णवृक्षे तस्य हि प्रत्येकपल्लवे सप्त सप्त पर्णानि विद्यन्ते।

अयुत त्रि॰ यु-क्त न॰त॰। असंयुक्ते। दशसहस्रसंख्यायां न॰।

अये अव्य॰ इण-एच्। कोपे, विषादे, संभ्रमे, स्मृतौ, संबुद्धौ च

अयोग पु॰ युज-घञ् न॰त॰। योगाभावे, कुयोगे, वियोगे च। न॰ब॰। विधुरे, कूटे, कठिनोद्यमे च।

अयोगवः पु॰ अय इव कठिना गौर्वाणी यस्य नि॰ अच्। शूद्रात् वैश्यायां जाते प्रतिलोमजे सङ्कीर्णवर्णे।

अयोगवाह पु॰ अक्षरसमाम्नायसूत्रेषु अइउण् इत्यादिषु चतुर्दशसु नास्ति योगः पाठादिरूपः संबन्धो येषां ते तथापि वाहयन्ति षत्वणत्वादिकार्य्यादिकं निष्पादयन्ति वाहेः अच् कर्म्म॰। अनुस्वारविसर्गादिषु, "अनुस्वारो विसर्गश्च+क प्रपौ चैव पराश्रितौ। अयोगवाहाविज्ञेया इति शिक्षाकृदुपदिष्टेषु।

अयोगुल पु॰ गुलः गोलाकारः अयसा निर्म्मितोगुलः। गोलीति ख्याते लौहगुटिकायाम्। [हत्वात्।

अयोऽग्र न॰ अयोऽग्रे मुखे यस्य। मुषले तस्य मुखे लौहव-

अयोघन पु॰ अयांसि हन्यन्तेऽनेन हन-अप् घनादेशश्च नि॰। हातुड़ीति ख्याते लौहमुद्गरे।

अयोध्या स्त्री॰ युध-ण्यत् न॰त॰। सरयूतीरे स्वनामख्यातायां नगर्य्याम्। योधनानर्हे त्रि॰।

अयोनिज पु॰ योनौ उपचारात् मातरि न जायते। परमेश्वरे। सीतायां स्त्री॰। [मले।

अयोमल न॰ अयसो मलइव। लौहगूथ इति ख्याते लौह-

अर न॰ ऋ-अच्। चक्रस्य नाभिनेम्योर्मध्यस्थे काष्ठे, शीघ्रे च शीघ्रतादिगुणवति त्रि॰। स्वार्थे के। शैवाले। पर्पटे प्रापडीति ख्याते पु॰।

अरघट्ट(क) पु॰ अरं शीघ्रं घट्टते चाल्यतेऽसौ। महाकूपे, तदुपरिनिबद्धजलोत्तोलनकाष्ठे च। स्वार्थे क। तत्रैव

अरजस् त्रि॰ रन्ज असुन् नलोपः न॰त॰। रजोगुणकार्य्यकामक्रोधादिशून्ये। अनार्त्तवायां नग्निकायां स्त्री॰।

अरणि पु॰ऋ-अनि। सूर्य्ये, गणियारीति ख्याते वृक्षे। ऋच्छति प्रापयत्यग्निम्। अग्निमन्थनकाष्ठे द्वि॰। स्त्रियां ङीप्।

अरणिक पु॰ अरणये अग्निमन्थनकाष्ठाय साधु क। अग्निमन्थनकाष्ठसाधने अग्निमन्थवृक्षे। [वृक्षे पु॰।

अरण्य पु॰ अर्य्यते शेषे वयस्यत्र ऋ-अन्य। वने, कट्फल-

अरण्यकदली स्त्री॰ अरण्यस्येव कदली। गिरिकदल्यां तस्याः ग्रामादावनुत्पत्तेः। [ख्यातायां वनकार्पास्याम्।

अरण्यकार्पासी स्त्री॰ अरण्यस्यैव कार्पासी। वनकापास इति

अरण्यकुलत्थिका स्त्री॰ अरण्यस्य कुलथिका स्वल्पकुलत्था। वनकुल्थीति ख्यातायां कुलत्थिकायाम् ।

अरण्यकुसुम्भ पु॰ ६त॰ वनकुसुम्भे ।

अरण्यचटक पु॰ ६त॰ वनचटके ।

अरण्यजार्द्रक न॰ अरण्ये जायते जन+ड कर्म्म॰ । वन आदा इति ख्याते वनार्द्रके ।

अरण्यजीर पु॰ ६त॰ वनजीरके ।

अरण्यधान्य न॰ ६त॰ नीवारादौ वनधान्ये ।

अरण्यमक्षिका स्त्री॰ ६त॰ । डाश इदि ख्याते दंशे ।

अरण्यमुद्ग पु॰ ६त॰ । वनमुद्गे ।

अरण्यवायस पु॰ ६त॰ । दांड़काक इति ख्याते द्रोणकाके ।

अरण्यवास्तूक पु॰ ६त॰ । वनवेतो इतिख्याते बनवास्तूकशाके ।

अरण्यसूरण पु॰ शा॰त॰। वनभवे ओल इति ख्याते वनसूरणे

अरण्यश्वा पु॰ अरण्ये श्वेव हिंस्रः । वृके ।

अरण्यषष्ठी पु॰ अरण्याय गन्तुं षष्ठी । ज्यैष्ठशुक्लषष्ठ्याम् । "ज्यैष्ठे मासि सिते पक्षे षष्ठी यारण्यसंज्ञिता। व्यजनैक-करास्तस्यामटन्ति विपिने स्त्रियः" इति स्मृतिः ।

अरण्यानी स्त्री॰ महदरण्यं नि॰ङीष् आनुक् च। महारण्ये ।

अरति पु॰ ऋ-अति । क्रोधे । रम-क्तिन् न॰त॰ । अनवस्थित-चित्ततायाम्, रागाभावे, रतिविरहे, उद्वेगे, "स्वाभीष्टवस्त्व-लाभेन चेतसो यानवस्थितिः अरतिःसे'त्येवं रूपे इष्टवि-योगान्मनसोव्याकुलीभावे च स्त्री॰। न॰ब॰। रागहीने त्रि॰

अरत्नि पु॰ ऋ-कत्नि रत्निः बद्धमुष्टिकरः स नास्ति यत्र । विस्तृतकनिष्ठे बद्धमुष्टिहस्ते, तत्परिमाणे, कफोणौ च ।

अरम् अव्य॰ अल-अम् वा लस्य रत्वम् । वक्ष्यमाणेऽल-मर्थे शीघ्रतायाञ्च ।

अरर त्रि॰ ऋ-अरच् । कवाटे, अपिधाने च ।

अररे अव्य॰ अरं शीघ्रं राति रा-डे । शीघ्रं प्रत्युत्तर लाभेच्छया कृते अतिव्यग्रतया संबोधने ।

अरलु(लु) पु॰ ऋ-अलु वा णत्वम् । (शोना) श्योनाकवृक्षे ।

अरविन्द न॰अराणि चक्राङ्गाणीव दलानि विन्दते विन्द+श।पद्मे

अराति पु॰ न राति ददाति सुखं न+रा-तिच् । शत्रौ ।

अराल पु॰ ऋ-विच् अर् अरमालाति आ+ला-क। सर्ज्जरसे मत्तहस्तिनि । कुटिले त्रि॰ । वेश्यायां स्त्री॰ ।

अरि पु॰ ऋ-इ। शत्रौ रथाङ्गे, चक्रे, विट्खदिरे, कामक्रो-धादिषु षट्सु, तत्संख्यासाम्यात् षट्संख्यायां, ज्योति षप्रसिद्धे लग्नावधिके षष्ठस्थाने च । [नकाष्ठे ।

अरित्र न॰ऋच्छत्यनेन ऋ-इत्र। हालि इति ख्याते नौकाचाल

अरिमर्द्द पु॰अरिं रोगरूपं शत्रुं मृद्नाति मृद-अच्। कासमर्द्दवृक्षे

अरिमेद पु॰ अरेर्विट्खदिरस्येव मेदः सारः स्यन्दोऽस्य । (गुइयाबाबला) वृक्षभेदे । अरिरिव मेद्यति कृत्वात् अत्यं स्निह्यति मिद-अच् । विट्खदिरे ।

अरिषड़ष्टक न॰षट् च अष्टौ च द्व॰ ततः परिमाणार्थे क षडष्ट कम् अरिस्वामिकं षडष्टकं शाक त॰ । विवाहे वर्ज्जनीये योगविशेषे, तथाहि दम्पत्योः परस्परराश्यपेक्षया परस्परस्य राशेः षष्ठत्वे अष्टमत्वे वा अशुभं, तयोः राश्योर्मित्र-स्वामिकत्वे पुनर्न दोषः शत्रुस्वामिकत्वेऽतीव दोषः

अरिषड्वर्ग पु॰ षसां वर्गः समुदायः षड्वर्गः अरीणां कामक्रोधलोभमोहमदमात्सर्य्यरूपाणामन्तःशत्रूणां षड्वर्गः देवीभागवतवत् विष्णुभागवतवच्च गमकतया समासः । कामादिषु षट्स्वान्तरेषु शत्रुषु ।

अरिष्ट पु॰ रिष-क्त । न॰ ब॰ । निपुणे, निम्बे, वृषभासुरे, अचलभेदे, काके, कङ्कपक्षिणि, रीठा इति ख्याते फेनिल वृक्षे च । अशुभे, मरणचिह्ने तक्रे, चक्षुर्जले, सूतिकागारे, मद्ये च न॰ । ५ब॰ । शुभे । स्वार्थे के । निम्बे, फेनिले वृक्षे च पु॰ ।

अरिष्टताति पु॰अरिष्ट+तातिल्। शुभाशंसने। शुभङ्करे त्रि॰

अरिष्टसूदन पु॰ अरिष्टमसुरं सूदयति सूद+ल्यु । विष्णौ । अशुभनाशके त्रि॰ । [सम्पादके रोगभेदे ।

अरुचि पु॰ न रुचिर्यत्र । सत्यप्यभिलाषे भोजनायोग्यता

अरुज पु॰ न रुजति रुज-क । सोंदाल इति ख्याते वृक्षे ।

अरुण पु॰ ऋ-उनन् । सूर्य्ये, सूर्य्यसारथौ, गुड़े, सन्ध्यारागे, निःशब्दे, दानवभेदे कुष्ठभेदे, पुन्नागवृक्षे च अव्यक्तरागे च । कृष्णमिश्रितरक्ते वर्णे पु॰ तद्वति त्रि॰ । कुङ्कुमे, सिन्दूरे च न॰ । मञ्जिष्ठायां श्यामाकायाम्, अतिविषायां नदीभेदे कदम्बपुष्पायाञ्च स्त्री॰ ।

अरुणलोचन पु॰ अरुणे रक्ते लोचने यस्य । पारावतपक्षिणि

अरुणसारथि पु॰ अरुणः सारथिर्यस्य । सूर्य्ये, ।

अरुणानुज पु॰ ६त॰ । गरुड़े । अरुणावरजत्वात्तैव ।

अरुणोदक न॰ अरुणमुदकं यस्य । सरोवरभेदे ।

अरुणोदय पु॰अरुणस्यार्कस्य तत्किरणस्योदयो यत्र। "चतस्रो घटिकाः प्रातररुणोदय उच्यते" इत्युक्ते सूर्य्योदयात् प्राचि काले

अरुणोदा स्त्री॰ अरुणमुदकं यस्या उदकस्योदः । मन्दराद्रि शिखरात् भूमौ पतन्त्यां नद्याम् ।

अरुणोपल पु॰ अरुण उपलः । चुनीति ख्याते पद्मरागे ।

अरुन्तुद त्रि॰ अरुंषि मर्म्माणि तुदति तुद-खश् मुम् च ।

मर्म्मपीडके, हृदयग्रन्थिरूपमर्म्मस्थानस्पर्शकारके च ।

अरुन्धती स्त्री० अव्युत्पन्नः । वशिष्ठपत्न्याम् ।

अरुष्क पु० अरुर्म्मर्म्मस्थानं कायति पीडयति कै-क । स्पर्शमात्रेण व्रणकारके भल्लातकवृक्षे ।

अरुष्कर पु० अरुर्व्रणं करोति अरुस्+कृ+अच् । भल्लातकवृक्षे । व्रणकारिणि त्रि० ।

अरुस् पु० ऋ-उसि । अर्के, रक्तखदिरे च । मर्म्मणि न० । व्रणे, क्षते च पु० न० ।

अरुहा स्त्री० न किञ्चिन्मूलमाश्रित्य रोहति आकाश एव रोहति । रुह+क । भूम्यामलक्याम् ।

अरे अव्य० ऋ-ए । रोषाह्वाने, नीचसंबोधने, अपकृतौ, असूयायाञ्च

अरेऽरे अव्य० अरे+वीप्सायां द्विरुक्तिः । नीचसंबोधनादौ ।

अरोक त्रि रुच-दीप्तौ घञ् रोकश्छिद्रं दीप्तिश्च । न०ब० । छिद्रशून्ये, दीप्तिशून्ये च । [कत त ।

अर्क तापे, स्तुतौ च चुरा०उभ०सक०सेट् । अर्कयति ते आर्चि-

अर्क पु० अर्च्च-कर्म्मणि घञ् कुत्वम् । सूर्य्ये, इन्द्रे, ताम्रे, स्फटिके, विष्णौ, पण्डिते, आकन्द इति ख्याते वृक्षे, आरक इति ख्याते क्वाथविशेषे च ।

अर्ककान्ता पु० अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः कर्म- क । हुड्हुडिया इति ख्याते वृक्षे । द्व०। सूर्य्यप्रियायाम्

अर्कचन्दन पु० अर्कस्य प्रियश्चन्दनः शाक०त० । रक्तचन्दने ।

अर्कतनय पु० ६त० । सुग्रीवे, कर्णे, यमे, शनौ, वैवस्वतमनौ च । यमुनायां स्त्री० । द्विवचनान्तः । अश्विनीकुमारयोः पु० ।

अर्कपत्र पु० अर्कः सूर्य्य इव तीक्ष्णं पत्रं यस्य । अर्कवृक्षे । अर्कपर्णोऽप्यत्र । ६त० । अर्कवृक्षस्य पत्रे न० ।

अर्कपादप पु० अर्कः अर्कवृक्ष इव तीक्ष्णः पादपः । निम्बे ।

अर्कपुष्पी स्त्री० अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः । कुटुम्बिनीवृक्षे । [सूर्य्यप्रियायां, छायायाञ्च ।

अर्कप्रिया स्त्री० अर्कं प्रीणाति प्री-क० । जवायाम् । ६त० ।

अर्कबन्धु पु० अर्कस्य बन्धुरिव । गौतमे सूर्य्यवंश्ये बौद्धे ।

अर्कभक्ता स्त्री० अर्कस्य भक्ता तत्किरणसंपर्के एव तस्याः सौन्दर्य्यम् हुड़हुड़िया इति ख्यातायां लतायाम् ।

अर्कमूला पु० अर्क इव सर्पाणां दुष्प्रसहं मूलं यस्याः । ईशरमूल इति ख्यातायां लतायाम् ।

अर्कवल्लभ पु० अर्कस्य वल्लभः समानवर्णपुष्पत्वात् । रक्तपुष्पत्वेन अर्कप्रियपुष्पे बन्धूकवृक्षे ।

अर्कव्रत पु० अर्कस्याराधनार्थं व्रतम् । माघशुक्लसप्तम्यादौ कर्त्तव्ये अर्काराधनार्थे व्रते । अर्कस्येव व्रतं नियमः "सहस्रगुणमुत्स्रष्टुमादत्ते हि रसान् रवि"रित्युक्ते र्यथा रविणा लोकवृद्ध्यर्थं रसस्य ग्रहणमेवं प्रजापालनार्थमेव राज्ञा प्रजाभ्यो यत् करस्य ग्रहणं तादृशे "अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः । तथा हरेत् करं राष्ट्रान्नित्यमर्कव्रतं हि तदिति" मनूक्ते व्रते च ।

अर्काश्मन् पु० अर्कस्य अनुगतः, अश्मा । सूर्य्यकान्तमणौ, स हि सूर्य्यरश्मिसंपर्कादुज्ज्वलति ततस्तस्यार्कसम्बन्धित्वम् ।

अर्कोपल पु० अर्कस्यानुगत उपलः । सूर्य्यकान्तमणौ ।

अर्गल स्त्री० न० अर्ज्ज-कलट् कुत्वम् । कपाटमध्यस्थे रोधके काष्ठादिदण्डे, सप्तशतीस्तोत्रस्यादौ पाठ्ये स्तोत्रविशेषे च "अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् । जपेत् सप्तशतीं पश्चादित्युक्तेः । कल्लोले, कपाटे च न० । क्षुद्रार्गले स्त्री० गौरा० ङीष् अर्गली, स्वार्थे के, अर्गलिकाप्यत्रार्थे ।

अर्घ मूल्ये भ्वादि० पर० सक० सेट् । अर्घति आर्घीत् ।

अर्घ पु० अर्घ-घञ् । क्रेयवस्तुनो ग्रहणार्थं तुल्यरूपे देये रजतादिद्रव्यरूपे मूल्ये । सामगैरयं सयकारः क्लीवलिङ्गश्च प्रयोक्तव्यः । अर्ह-करणे घञ् न्यङ्क्वादित्वात् कुत्वम् । पूजोपचारे दूर्व्वाक्षतादौ ।

अर्घ्य अर्घ+देयार्थे यत् । अर्घार्थं दीयमाने जलादौ । अर्घदानयोग्ये पूज्ये त्रि० । [आर्च्चिष्ट ।

अर्च पूजायाम् उभ० भ्वादि० सक० सेट् । अर्चति ते आर्चीत्

अर्च पूजायां चुरा० उभ० सक० सेट् । अर्चयति ते आर्चिचत् त

अर्च्चा स्त्री० अर्च्च-आधारे अङ् । प्रतिमायाम् । भावेऽटङि, पूजायाम्

अर्च्चि स्त्री० अर्च्च-इन् । वह्न्यादिशिखायाम् । [त्रि० ।

अर्च्चिष्मत् पु० अर्च्चिर्विद्यतेऽस्य मतुप् । सूर्य्ये, वह्नौ च । दीप्ति

अर्च्चिस् न० पु० अर्च्च-इसि । वह्न्यादेः शिखायां, मयूखे च ।

अर्ज अर्ज्जने भ्वादि० पर० सक० सेट् । अर्ज्जति, आर्जीत् ।

अर्ज्ज संस्कारे चुरा० उभ० सक० सेट् । अर्ज्जयति ते आर्जिजत् त ।

अर्ज्जक पु० अर्ज्जयति रज्जुम् अर्ज्ज-ण्वुल् । वावुइ इति ख्याते वृक्षे, तत्त्वक्तन्तुना हि रज्जुर्निर्म्मीयते । अर्ज्जनकर्त्तरि त्रि०

अर्ज्जन न० अर्ज्ज-ल्युट् । स्वामित्वसम्पादके व्यापारभेदे सम्पादने च ।

अर्ज्जुन पु० अर्ज्ज-उनन् । स्वनामख्याते वृक्षे, मध्यमपाण्डवे, हैहयाधिपे कार्त्तवीर्य्ये, करवीरे, मयूरे, धवले च । शुभ्रतागुणवति त्रि० । आर्जनि इति ख्याते नेत्ररोगे न० ।

अर्ज्जुनी स्त्री० गौरा० ङीष् । उषायां, बाहुदायां नद्यां, स्त्रियां गवि, कुट्टन्याञ्च ।

अर्ज्जुनोपम पु० अर्ज्जुनः स्वनामख्यातः वृक्ष उपमा यस्य ।

सेगुन इति ख्याते शाकद्रुमे, महापत्राख्यवृक्षे च ।

अर्ण पु० ऋ-न । अकारादौ वर्णे ।

अर्णव पु० अर्णांसि सन्त्यस्मिन् अर्णस्+व सलोपः । समुद्रे ।

अर्णवोद्भव पु० उद्भवत्यस्मात् उद्+भू-अपादाने अप् ६ब० । अग्निजारवृक्षे । चन्द्रे च । अमृते न० । श्रियां स्त्री० ।

अर्णस् न० ऋच्छति ऋ-असुन् उदके नुट् चेति, नुट् । जले ।

अ(आ)र्त्तगल पु० आर्त्तइव गलति गल-अच् पृषो० वा ह्रस्वः । नीलझिण्टिकायाम् । ह्रस्वाभावे आर्त्तगलश्च ।

अर्त्तन न० ऋत-ल्युट् पक्षे इयङभावः । निन्दायाम् ।

अर्त्ति स्त्री० अर्द्द-क्तिन् । पीडायाम् । करणे क्तिन् । धनुष्कोट्याम्

अर्थ याचने अद० चु० आत्म० द्विक० सेट् । अर्थयते आर्त्तिथत मतान्तरे अर्थापयते आर्त्तथापत ।

अर्थ पु० अर्थ-भावादौ घञ् । विषये, अभिधेये, धने, वस्तुनि, प्रयोजने, निवृत्तौ, हेतौ, प्रकारे, अभिलाषे, उद्देश्ये च ।

अर्थदूषण न० अर्थस्य अपहरणादिना दूषणम् ६त० । धनापहरणे, व्यसनस्थाने क्रीड़ादौ धनव्यये च ।

अर्थना स्त्री० अर्थ-युच् । भिक्षायाम् ।

अर्थपति पु० अर्थानां पतिः ६त० । नृपे, कुवेरे च ।

अर्थप्रयोग पु० अर्थानां प्रयोगः ६त० । वृद्ध्याद्यर्थमधमर्णायार्थदानादौ, वृद्धिलाभार्थं धनप्रयोगे च ।

अर्थवत् त्रि० अर्थः सन्निहितोऽस्य मतुप् वत्वम् । सन्निहितधने धनिनि । असन्निहितधने तु न मतुप् किन्तु इनिस्तेन तत्र अर्थीत्येव । प्रयोजनवति, अभिधेयवति च ।

अर्थवाद पु० अर्थस्य लक्षणाया स्तुत्यर्थस्य, निन्दार्थस्य वा वादः वद-करणे घञ् । प्रशंसनीयगुणवाचके, निन्दनीयदोषवाचके च शब्दविशेषे । भावे घञि । तत्कथने ।

अर्थव्ययज्ञ त्रि० अर्थस्य धनस्य व्ययं तत्प्रकारं जानाति ज्ञाक । किं धनं, कथं, कुत्र, कियत्, कस्मै, वा व्ययितव्यमिति विशेषाभिज्ञे ।

अर्थशास्त्र न० अर्थस्य भूमिधनादेः प्रापकं शास्त्रं शाक०त० । नीतिशास्त्रे, अभिचारादिकर्म्मप्रतिपादके शास्त्रे च ।

अर्थागम पु० अर्थस्य आगमः आ+गम-घञ् अवृद्धिः । आये ।

अर्थान्तर न० अन्योऽर्थः अर्थान्तरं मयूर० त० । अन्यार्थे, न्यायमते उद्देश्यसिद्ध्यर्थं प्रयुक्ते शब्दसामर्थ्यादनुद्दिश्यसिद्ध्यनुकूले वाक्ये । तस्य प्रतिवादिनोद्भावने वादिनिग्रहः ।

अर्थान्तरन्यास पु० प्रकृतार्थसिद्धये अन्यार्थस्य न्यासः । अलङ्कारप्रसिद्धे अर्थालङ्कारभेदे सा०१०प० ।

अर्थापत्ति स्त्री० अर्थेन अनुपपद्यमानेनापादकेनापाद्यस्यापत्तिः कल्पनम् आ+पद-क्तिन् । जीवतश्चैत्रस्य गृहासत्त्वज्ञानेन वहिःसत्त्वकल्पनादौ, मीमांसकादिमते अनुमानातिरिक्तायां आपादकस्यानुपपत्तिज्ञानेनापाद्यस्य कल्पनायाम्, न्यायमते व्यतिरेकव्याप्तिज्ञानजन्यायामनुमितौ, अर्थालङ्कारभेदे च सा०१०प० ।

अर्थिक पु० अर्थयते इत्यर्थी याचकः कुत्सितार्थे के । निद्रागतनृपादेर्जागरणार्थं नियुक्ते स्तुतिपाठकादौ ।

अर्थिन् त्रि० अर्थ+इनि । याचके, सेवके, व्यवहारे-वादिनि, असन्निहितधने धनस्वामिनि च ।

अर्थ्य त्रि० अर्थे साधु यत् । न्याय्ये । अर्थ-कर्म्मणि यत् । प्रार्थनीये । शिलाजतुनि न० ।

अर्द्द वधे भ्वादि०उभ०सक० सेट् । अर्द्दति ते आर्द्दीत् आर्द्दिष्ट ।

अर्द्द याचने, गतौ, पीड़ायां च, भ्वादि०पर०सक० सेट् । अर्द्दति आर्द्दीत् । याचने शरद्घनं नार्द्दति चातकोऽपीति रघुः ।

अर्द्द वधे चुरा० उभय० सक० सेट् । अर्द्दयति ते आर्द्दिदत् त ।

अर्द्दना स्त्री० अर्द्द-भावे युच् । भिक्षायां गतौ पीड़ायाञ्च ।

अर्द्दित त्रि० अर्द्द-क्त । पीडिते, गते, याचिते च । वातरोगे न० ।

अर्द्ध पु० ऋध-घञ् । खण्डे । तुल्यांशे न० । खण्डिते त्रि० ।

अर्द्धगङ्गा स्त्री० अर्द्धं गङ्गायाः एकदे० त० । स्नानादौ गङ्गास्नानादेरर्द्धफलदायिन्यां कावेरीनद्याम् ।

अर्द्धचन्द्र पु० अर्द्धं चन्द्रस्य एक०त० । चन्द्रस्यार्द्धे, तदाकारे- नखक्षते, गलहस्ते, बाणभेदे, स्त्रीणां तिलकभेदे च । तेओड़ीति ख्यातायां त्रिवृति स्त्री० । स्वार्थे के ह्रस्वे अतइत्त्वे । अर्द्धचन्द्रिका कर्णस्फोटलतायां चित्रपर्ण्याञ्च ।

अर्द्धचोलक न० अर्द्धं चोलस्य न०त० संज्ञायां कन् । काञ्चुलीति ख्याते कुर्पासकवस्त्रे ।

अर्द्धतिक्त पु० अर्द्धं तिक्तं यस्य । नेपालनिम्बे ।

अर्द्धनारीश्वर पु० अर्द्धाङ्गे या नारी तस्या ईश्वरः । हरगौरीरूपे शिवे ।

अर्द्धपारावत पु० अर्द्धेन अङ्गेन पारावतइव । चित्रकण्ठ कपोते तित्तिरीति ख्याते पक्षिणि ।

अर्द्धपुलायित न० "शताद्धार्द्धक्रमादूनै र्मण्डलायितवल्गितैः । उन्मुखस्याश्व मुख्यस्य गतिरर्द्धपुलायितमिति" परिभाषिते अश्वगतिभेदे ।

अर्द्धभ्रमक पु० अर्द्धे श्लोकार्द्धे गतागताभ्यामेकरूपतया भ्रमो [यत्र । काव्यबन्धभेदे शब्दालङ्कारे

अर्द्धमात्रा स्त्री० अर्द्धं मात्रायाः विन्द्वर्द्धचन्द्राकारव्यञ्ज्यायां ब्रह्मरूपायाम् वाचि । अर्द्धा मात्रा उच्चारणकालो येषाम् । हल्वर्णेषु व्यञ्जनं चार्द्धमात्रकमित्युक्तेः ।

अर्द्धयाम पु॰ अर्द्धं यामस्य । अष्टधा विभक्तस्य दिनस्य रात्रेर्वा
अष्टमे भागे यत्र वारवेलाकालवेलाव्यवहारः ।

अर्द्धरथ पु॰ अर्द्धं रथस्य रथनामकयोधविशेषस्य । निकृष्टयोधे

अर्द्धरात्र पु॰ अर्द्धं रात्रेः । द्वितीयप्रहरशेषक्षणे निशीथे ।

अर्द्धवीक्षण न॰ अर्द्धमसंपूर्णं वीक्षणम् वि+ईक्ष-ल्युट् ।
कटाक्षदर्शने । [इति ख्याते मत्स्यभेदे ।

अर्द्धशफर पु॰ अर्द्धः प्रकृतशफराद्धीनः शफरः । दाड़का

अर्द्धासन न॰ अर्द्धमासनं यत्र । स्नेहव्यञ्जके सम्मानभेदे ।
अर्द्धमसनं क्षेपो यत्र । निन्दायाम् ।

अर्द्धोदय पु॰ माघमासीयामातिथिनक्षत्रवारविशेषयुक्ते "माघे
मासि सिते पक्षे अमा स्यादर्कसंयुता । नक्षत्रे श्रवणे देवि !
व्यतीपातो यदा भवेत् । अर्द्धोदयः स विज्ञेय" इत्युक्ते योगे ।

अर्द्धोरुक न॰ अर्द्धमूरोः अर्द्धोरु तत्र कायते काश-ड ।
ऊर्ध्वोरधरपर्य्यन्ताङ्गाच्छादने वस्त्रे, उत्तमस्त्रीणामर्द्धोरु-
पर्य्यन्ते चोलकाकारे परिधेयवस्त्रे च ।

अर्पण न॰ ऋ-णिच-पुक् ल्युट् । निक्षेपे, स्वत्वत्यागे च । करणे
ल्युटि । मन्त्रादौ । जुहुप्रभृतौ स्त्री॰ । संप्रदाने ल्युटि ।
देवादिषु । अधिकरणे ल्युटि । त्यागाधिकरणे वह्न्यादौ ।
कर्म्मणि ल्युटि । हविरादौ त्याज्यद्रव्ये ।

अर्पिस पु॰ ऋ-णिच् पुक् च इसन् । हृदये, अग्रमांसे च ।

अर्व्व (र्व) हिंसने, भ्वादि॰ पर॰सक॰ सेट् । अर्वति आर्वीत् ।

अर्व्वुद (र्बुद) न॰ अर्व्व (र्व) विच् तस्मै उदेति अर्ब् (र्व्)+उद्+
इण-ड । आव् इति ख्याते मांसपिण्डाकारे रोगभेदे,
दशकोटिसंख्यायां तत्संख्यातेषु च । पर्व्वतभेदे पु॰ ।

अर्भ पु॰ ऋ-भ । बालके । [च ।

अर्भक पु॰ अर्भ एव स्वार्थे क । बालके, मूर्खे, कृशे, अल्पे, सदृशे

अर्य्य त्रि॰ ऋ-यत् । स्वामिनि । वैश्ये पु॰ । स्त्रियां टाप् ।
अर्य्या वैश्यजातिस्त्रियां स्वामिन्याञ्च । वैश्यपत्न्यान्तु ङीष् ।
अर्य्यी । वैश्यजातीयायां स्त्रियाम् आनुक् ङीप् च ।
अर्य्याणीत्यपि ।

अर्य्यमन् पु॰ अर्य्यं श्रेष्ठं मिमीते मा-कनिन् । सूर्य्ये, तद्देवताके
उत्तरफल्गुनीनक्षत्रे, अर्कद्रुमे, पितॄणां राजनि च ।

अर्व्वन् पु॰ ऋ-वनिप् । घोटके, इन्द्रे, गोकर्णपरिमाणे च ।
स्त्रियामर्व्वती वडवायां कुट्टिन्यामपि ।

अर्व्वाच् अव्य॰ अवरे काले देशे वा अञ्चति अनुच-क्विन् ।
पृषो॰ अर्व्वादेशः । पश्चात्काले मध्यगते । विपर्य्यस्ते च
अर्व्वाच्+असि तस्य लुक् । अवरकालादौ मध्ये च अव्य॰
तद्भवे अर्व्वाक्तन इत्यादि ।

अर्व्वाचीन त्रि॰ अर्व्वाक्काले पश्चात्काले भवः ख । पश्चाद्भवे

अर्शस् न॰ ऋ-असुन् शुक् च । वलिकाकारे गुह्यस्थरोगभेदे
वा पृषो॰ सलोपे । अर्शमप्यत्र ।

अर्शस त्रि॰ अर्शस्+अस्त्यर्थेऽच् । वलिकाकारकगुह्यव्याधियुक्ते

अर्शोघ्न पु॰ अर्शो हन्ति हन-ट । (ओल) सूरणे, भल्लातके च ।

अर्शोघ्नी स्त्री॰ अर्शस् हन-ठ टित्त्वात् ङीप् उप॰स॰ । ताल-
मूल्याम् भल्लातक्याञ्च । [भल्लातके ।

अर्शोऽहित पु॰ अर्शसोऽहितः सेवनेन तन्नाशकत्वात् । ६त॰ ।

अर्ह पूजने, योग्यत्वे च भ्वादि॰ पर॰सक॰ सेट् । अर्हति,
आर्हीत् आनर्ह । [शक्ते च । योग्ये त्रि॰ ।

अर्ह पु॰ अर्ह-कर्म्मणि घञ् । पूजाप्रशंसादिभिराराध्ये ईश्वरे,

अर्हण पु॰ अर्ह-ल्यु । बुद्धभेदे । भावे ल्युट् । पूजने न॰ । करणे
ल्युटि । पूजोपकरणे पुष्पादौ, उपायने च न॰ ।

अर्हणा स्त्री॰ अर्ह-युच् । पूजायां, योग्यतायाञ्च ।

अर्हत् पु॰ अर्ह-कर्म्मणि शतृ । बुद्धभेदे । पूज्ये त्रि॰ ।

अर्हन्त पु॰ अर्ह-झच् । बुद्धभेदे ।

अर्हा स्त्री॰ अर्ह-अङ् । पूजायाम् ।

अल भूषणे, वारणे, पर्य्याप्तौ च भ्वा॰ उभ॰सक॰ पर्य्याप्तौ
अक॰ सेट् । अलति ते आलीत् आलिष्ट ।

अलक पु॰ अलति भूषयति मुखम् अल-वुन् । ललाटस्थे
छिन्नाग्रे कुटिलकेशे, अङ्कलिप्तकुङ्कुमे च । क्षिपकादित्वात्
कापि नेत्त्वम् । कुबेरपुर्य्याम् अष्टमेवर्षावधिदशमेवर्षपर्य्य-
न्तवयस्कायां कन्यायाञ्च स्त्री॰ ।

अलकनन्दा स्त्री॰ अलति पर्य्याप्नोति वुन् अलका नन्दयतीति
अच् नन्दा कर्म्म॰ । गङ्गायाम् । अलकैर्नन्दति अच् । कन्या-
याम् । सा हि अलकैस्तुष्यति [(पियासाल) पीतसालवृक्षे ।

अलकप्रिय पु॰ अलकान् प्रीणाति चिक्कणीकरोति प्री-क ।

अलकाधिप पु॰ अलकाया अधिपः ६त॰ । कुबेरे ।

अलक्त पु॰ न रक्तोऽस्मात् ५ब॰ रस्य लत्वम् । लाक्षारसे,
स्वार्थे के । अलक्तकोऽप्यत्र तद्वेतौ लाक्षायाञ्च ।

अलक्षण त्रि॰ नास्ति लक्षणमनुमापकं सुचिह्नं वा यस्य । अन-
नुमेये, सुचिह्नशून्ये च । न॰त॰ । दुर्लक्षणे न॰ब॰ । तद्वति त्रि॰

अलक्षित त्रि॰ लक्ष-क्त न॰त॰ । अज्ञाते, लक्षणेनाननुमिते च ।

अलक्ष्मी स्त्री॰ विरोधार्थे नञ् त॰ । लक्ष्मीविरुद्धायां निरृतौ
आलक्ष्मीति ख्यातायाम् ।

अलगर्द्द पु॰ लगति स्पृशति क्विप् लग् अर्द्दयति अर्द्द-अच्
अल् स्पृशन् सन् अर्दः न भवति । विषशून्ये जलव्याले
पृषो॰ धत्वम् ऋध्नोति वा ऋध-अच् वा । अलगर्द्धोऽप्यत्र ।

अलङ्करण न० अलम्-कृ-भावे ल्युट् । भूषायाम् । करणे ल्युटि । वलयादौ भूषणे ।

अलङ्करिष्णु त्रि०अलम् कृ-इष्णुच् । भूषके मण्डनकरणशीले

अलङ्कर्म्मीण त्रि० अलं समर्थः कर्म्मणे ख । कर्म्मक्षमे ।

अलङ्कार पु० अलम्+कृ-घञ् । भूषायाम् । करणे घञि हारादौ भूषणे, साहित्यविषयदोषगुणप्रतिपादके ग्रन्थे, शब्दभूषणे–अनुप्रासादौ, शब्दार्थभूषणे–उपमादौ च ।

अलङ्क्रिया स्त्री० अलम्+कृ-श । भूषायाम् ।

अलम् अव्य० अल+अमु । भूषणे, पर्य्याप्तौ, निवारणे, निषेधे निरर्थे,शक्तौ,अत्यर्थे, अवधारणे च । [योधनसमर्थे ।

अलम्पुरुषीण त्रि० अलं समर्थः प्रतिपुरुषाय । प्रतिमल्लादि-

अलम्बुष पु० अलं पुष्णाति पुष-क पृषो० षस्य बत्वम् । प्रहस्ते, दमने,राक्षसभेदे च । लज्जालुवृक्षे स्वर्गवेश्यायाञ्च स्त्री० ।

अलवाल न०लवमालाति ला-क न०त० । वृक्षसेकार्थं वृक्षमूले मृदादिकृते जलाधारे वेष्टने स्वार्थेऽणि । आलवालमपि ।

अलस त्रि० न लसति व्याप्रियते लस-अच् । अवश्यकर्त्तव्येषु शरीरापाटवमभिनीय कृताप्रवासे, क्रियामन्दे च । पाद-रोगभेदे, वृक्षभेदे च पु० । हंसपदीलतायां स्त्री० ।

अलसक पु० अलसं करोति कृ-ड । उदरामयरोगभेदे ।

अलात पु० न० । ला-क्त न०त० । कोयाला इति ख्याते आङ्गार इति ख्याते च अर्द्धदग्धकाष्ठे ।

अलाबु स्त्री० न लम्बते न+लबि-उ णित् नलोपश्च वृद्धिः । (लाउ), तुम्ब्याम् । वा ऊङ् । अलाबूरप्यत्र ।

अलि पु० अलति दंशे, कूजिते, शब्दिते, वा समर्थो भवति अल-इन् । भ्रमरे,वृश्चिके, काके, कोकिले, सुरायाञ्च ।

अलिक न० अल्यते भूष्यते अल-कर्म्मणि इकन् । ललाटे ।

अलिङ्ग त्रि० नास्ति लिङ्गमनुमापकचिह्नादि यस्य । कार्य्यादि रूपलिङ्गरहिते अननुमेये ।

अलिञ्जर पु० अलनमलिः अल-इन् तं जरयति जॄ-अच् पृषो० मुम् । (जाला) इति ख्याते मृण्मये जलाधारे पात्रभेदे मणिके । [वृश्चिके, भ्रमरे च ।

अलिन् पु०अलः पर्य्याप्तः सर्व्वत्र गतिर्विद्यतेऽस्य अल+इनि ।

अलिन्द पु० अल्यते भूष्यते अल-कर्म्मणि किन्दच् । द्वारप्रकोष्ठाद्वहिर्द्वारवर्त्तिचतुष्के, द्वारवहिर्भागे च ।

अलिपत्रिका स्त्री०अलिर्वृश्चिक इव पत्रमस्याः ब० कपि अत इत्वम् । वृश्चिकपत्राख्यलतायाम् । अलिपर्णयप्यत्र ।

अलिप्रिय न० अलीनां प्रियमधिकमादकत्वात् । रक्तोत्पले । पाटलावृक्षे स्त्री० । अलिवल्लभाप्यत्र ।

अलिमोदा स्त्री० अलीन् मोदयति मुद-णिच्-अच् । (गणि-आरी), गणिकारीवृक्षे ।

अलीक न० अल-ईकन् । अप्रिये, ललाटे, स्वर्गे च । अलति गच्छत्यधोऽनेन । असत्ये । मिथ्याकथने हि नरकपातः ।

अलौकिक त्रि० लोके विदितः ठक् न०त० । लौकिकप्रत्यक्षा-गम्ये, लोकातीते, चमत्कारिणि च ।

अल्प त्रि० अल-प । क्षुद्रे,ईषदर्थे, सूक्ष्मे, मर्त्ये च । स्वार्थे के । अल्पकमप्यत्र । यवासे पु० । [त्रि० ।

अल्पगन्ध न० अल्पो गन्धोऽस्य । रक्तकैरवे । स्वल्पगन्धयुक्ते ।

अल्पतनु त्रि० अल्पा क्षुद्रपरिमाणा तनुः शरीरं यस्य । खर्व्वे, दुर्बले, स्वल्पास्थियुक्ते च ।

अल्पप्रमाणक पु० अल्पं प्रमाणमस्य ब० कप् । (तरमुज) (खरमुज) वा इति ख्याते वृक्षे । अल्पप्रमाणयुक्ते त्रि० ।

अल्पमारिष पु० अल्पः मारिषः शाकः कर्म्म० । (नटिया) इति ख्याते शाके । [प्रमाणे सरसि ।

अल्पसरस् न० अल्पं सरः कर्म्म० । डोवा इति ख्याते अल्प

अल्पायुस् पु० अल्पमायुः जीवनकालो यस्य । छागे पशुषु तस्यैवाल्पायुष्कत्वात् । अल्पायुष्कमत्र त्रि० ।

अल्पिका स्त्री० अल्पैव स्वार्थे के अत इत्वम् । क्षुद्रपर्ण्याम् ।

अल्पिष्ठ त्रि० अतिशयेनाल्पः अल्प+इष्ठ । क्षुद्रतरे ।

अल्पीयस् त्रि० अल्प+ईयसु । अत्यन्ताल्पे । स्त्रियां ङीप् ।

अल्ला स्त्री० अल्यते इत्यल् क्विप् अले भूषायै मृद्गाति बालम् अल्+ला-क । मातरि । अलतीति अल् पर्य्याप्तः लाति सर्व्वानत्ति गृह्णाति जानाति वा । सर्व्वज्ञायां सर्व्वभक्षिकायां परमात्मदेवतायाम् सा च अथर्व्ववेदे अल्ला-ल्लेत्यादिसूक्ते प्रसिद्धा ।

अव रक्षणे, गतौ, स्पृहायां, तृप्तौ, शोभायां,श्रवणे, व्याप्तौ, आलिङ्गने, प्रार्थने, प्रवेशे, सत्तायां, वृद्धौ, ग्रहणे, बधे, सामर्थ्ये, अवगमे, करणे, इच्छोत्पादने च यथायथं सक० अक० च भ्वादि० सेट् पर० । अवति आवीत् ।

अव अव्य० अव-अच् । निश्चये, व्याप्तौ अनादरे, असाकल्ये, आलम्बने, शुद्धौ, परिभवे, नियोगे, निम्नतायां च ।

अवकर पु० अवकीर्य्यते संमार्ज्जन्यादिभिः अव-कॄ-अप् । सम्मार्ज्जन्यादिभिः क्षिप्ते धूल्यादौ ।

अवकाश पु० अव+काश-घञ् । अवस्थितियोग्यतासम्पादके काले, देशे च । तत्र कालिकोऽवकाशः क्रियान्तरस्थितियोग्यतासम्पादकः सचावसर इत्यप्युच्यते, "कृतावकाश रुचि संक्रान्त"मिति भट्टिः । द्रव्यान्तरस्थितियोग्यतासम्पादको

देशिकः स चावकाश इत्येव "अवकाशं किलोदन्वानिति" रघुः

अवकीर्ण त्रि० अव-कॄ कर्म्मणि क्त । चूर्णिते, ध्वस्ते च ।

अवकीर्णिन् त्रि० अवकीर्णं ध्वस्तं व्रतमस्त्यस्य इनि । क्षतव्रते ।

अवकृष्ट त्रि०अव+कृष-क्त । दूरीकृते, अपसारिते, वहिष्कारिते च

अवकेशिन् त्रि० अवच्युतं कं सुखं यस्मात् ५ब०अवकं शून्यतां फलशून्यतामीशितुं शीलमस्य अवक+ईश-णिनि । अफले वृक्षे । अवसन्नाः केशा विद्यन्ते अस्य इनि । अल्पकेशयुक्ते ।

अवक्रय पु० अवक्रीयते प्रतिरूपदानेन स्वाधीनं क्रियतेऽनेन अव+क्री-अच् । ग्राह्यस्य प्रतिरूपत्वेन देये मूल्ये, भाटके च

अवक्षुत त्रि० अव-क्षु-क्त । उपरि कृतक्षुते । [भर्त्सने च न० ।

अवक्षेप पु०अव+क्षिप-घञ् । निन्दायाम् । ल्युटि अवक्षेपणमप्यत्र

अवगणित त्रि० अव+गण-क्त । तिरस्कृते, अवज्ञाते च ।

अवगण्ड पु० अव+गम-ड डकारस्य नेत्त्वम् । गण्डस्थव्रणे ।

अवगत त्रि० अव+गम-क्त । निम्नगते, ज्ञाते च ।

अवगाढ़ त्रि० अव+गाह-क्त । निविडे, अन्तःप्रविष्टे, निमग्ने च

अवगाह पु०अव+गाह-घञ् । स्नाने, अन्तःप्रवेशे च । आधारे घञ् । स्नानस्थाने । वा अल्लोपे वगाहोऽप्यत्र । ल्युटि अवगाहनमप्यत्र । [च ।

अवगीत त्रि० अव+गै-क्त । निर्व्वादे जनापवादे, दुष्टे, गर्हिते

अवगुण पु० अव+गुण-क । दोषे ।

अवगुण्ठन न० अव+गुण्ठ-ल्युट् । योषितां शिरःप्रावरण क्रियायाम् । करणे ल्युटि । मुखाच्छादने वस्त्रे ।

अवगुण्ठिका स्त्री० अव+गुण्ठ-ण्वुल् स्त्रीत्वात् टापि अत इत्वम् । स्त्रीणां मुखावरणशाट्याम्, जवनिकायाञ्च ।

अवगुण्ठित त्रि० अव+गुण्ठ-क्त । कृतावगुण्ठने, चूर्णिते च

अवगृह्य न०अव+ग्रह-क्यप् । व्याकरणे सिद्धे प्रगृह्यसंज्ञके पदे

अवगोरण न०अव+गुर-उद्यमे ल्युट् । वधायास्त्राद्युद्यमे ।

अवग्र(ग्रा)ह पु० अव+ग्रह-अप, घञ् वा । वृष्टिजलप्रतिबन्धे ।

अवग्रहण न० अव+ग्रह-ल्युट् । प्रतिरोधे ।

अवघट्ट पु०अव+घट्ट-अच् । बन्धे, (जांता) घरट्टे च । [च ।

अवघात पु० अव+हन-घञ् । अवहनने, तण्डुलादेर्वितुषीकरणे

अवचय पु०अव+चि-अच् । पुष्पफलाद्यादाने । [वस्त्रे ।

अवचूड़(ल) पु०अवनता चूडाग्रं यस्य वा डोलः । ध्वजाधोबद्ध

अवचूर्णित त्रि० अव+चूर्ण-क्त । पिष्टे, क्षिप्ते, चूर्णीकृते च ।

अवचूलक अवनता चूडा यस्य डस्य लत्वम् संज्ञायां कन् । चामरे । [अवच्छेदकतानिरूपके च ।

अवच्छिन्न त्रि० अव+छिद-क्त । सङ्कुचिते, विशिष्टे, न्यायमते

अवच्छुरित न० अव+छुर-क्त । अट्टहासे । मिश्रिते त्रि० ।

अवच्छेद पु० अव+छिद-घञ् । विरामे, परिच्छेदे एकदेशे च ।

अवच्छेदक त्रि०अव+छिद-ण्वुल् । एकदेश, व्यावर्त्तकविशेषणे च

अवज्ञा स्त्री० अव+ज्ञा-अङ् । अनादरे ।

अवट पु०अव-अटन् । गर्त्ते, कूपे, ऐन्द्रजालिकजीविकावति च ।

अवटि स्त्री०अव-अटि । गर्त्ते, कूपे च । वा ङीप् अवटीत्यपि ।

अवटीट त्रि० अवनता नासिका प्रा०स० । नतार्थे नासायाः टीटादेशः अर्श्आदित्वादच् । (खांदा) नतनासिके जने ।

अवटु पु० अव+टीक-डु । गर्त्ते, वृक्षभेदे, कूपे च । ग्रीवापश्चाद्भागे, ग्रीवाया उन्नतभागे च स्त्री० । [गतिभेदे

अवडीन न० अव+डी-ल्युट् । अवरोहणरूपे पक्षिणां

अवतंस पु०न० अव+तन्स-घञ् । कर्णपूरे, शिरोभूषाभेदे च ।

अवतमस न०अवकृष्टं हीनं तमः प्रा०स० अच् । अल्पान्धकारे ।

अवतार पु० अव+तॄ करणे घञ् । तीर्थे, (पुष्करिण्यादेः सोपानपद्धतौ) । भावे घञ् । अवरोहणे, देवानामंशावेशवशेन प्रादुर्भावे च ।

अवतारण न० अव+तॄ-णिच्-ल्युट् । भूतादीनामावेशनेन प्रादुर्भावने, अवरोपणे, ग्रन्थप्रस्तावने च । अवतारणमप्यत्र ।

अवतोक स्त्री० अवपतितं तोकमस्याः । स्रवद्गर्भायां स्त्रियाम्

अवदंश पु०अव+दन्स-घञ् । भर्ज्जिते चर्व्वणद्रव्ये, (मद्यपानोत्साहादिकारके चर्व्वणद्रव्ये) । [मनोज्ञे च त्रि० ।

अवदात पु० अव-दै-क्त । शुभ्रे, पीते च वर्णे । तद्वति, विशुद्धे

अवदान न० अव+दो-ल्युट् । खण्डने, पराक्रमे, अतिक्रमे, शुद्धिकरणे, वीरणमूले च । [ण्वुल् । भेदनकर्त्तरि त्रि० ।

अवदारक पु०अवदारयति दृ-णिच्-ण्वुल् । (खोनता) खनित्रे

अवदारण न० अव+दृ-णिच्-करणे ल्युट् । खनित्रे ।

अवदाह न० अव+दह्यते दह-कर्म्मणि घञ् । वीरणमूले ।

अवद्य त्रि० वद-यत् न०त० । अधमे, पापिनि, निन्द्ये, कथनायोग्ये च । [विषयान्तरतो मनोनिवर्त्तते ।

अवधान न० अव+धा-ल्युट् । मनोयोगविशेषे, यद्वशात्

अवधारण न० अव+धृ-णिच्-ल्युट् । इयत्तापरिच्छेदे, अयमेवेति विषयपरिच्छेदके निश्चये च । [विले ।

अवधि पु० अव+धा कि । सीमायां, काले च । आधारे कि ।

अवधीर अवज्ञायाम् अद०चुरा० उभय०सक०सेट् । अवधीरयति ते आववधीरत् त । मतान्तरे अवादिधीरत् त ।

अवधूत त्रि० अव+धू-क्त । अभिभूते निवर्त्तिते, चालिते, अनादृते च । "यो विलङ्घ्याश्रमान् वर्णान् आत्मन्येव स्थितः पुमान् । अतिवर्णाश्रमी योगी अवधूतः स उच्यते" इत्युक्तलक्षणे वर्णाश्रमधर्म्मत्यागिनि सन्न्यासिनि पु० ।

अवध्वंस पु॰अव+ध्वन्स-घञ् । परित्यागे,चूर्णिते,निन्दायाञ्च

अवन न॰ अव-ल्युट् । प्रीणने, रक्षणे, प्रीतौ च ।

अवनत त्रि॰ अव+नम-क्त । अधोभूते, आनते च ।

अवनति स्त्री॰ अव+नम-क्तिन् । औद्धत्याभावे, विनये, अधोनमने च । [वाद्ये न॰ ।

अवनद्ध त्रि॰अव+नह-क्त । खचिते, रोपिते च । मृदङ्गादि-

अवनय पु॰ अव+नी-अच् । अधोनयने ।

अवनाट त्रि॰अवनता नासिका प्रा॰स॰ नतार्थे नासिकाया नाटादेशः अर्श आद्यच् (खांदा) अवनतनासिके जने ।

अवनि (नी) स्त्री॰अव-अनि । भूमौ । वा ङीप् अवनीत्यपि ।

अवनेजन न॰ अव+निज-ल्युट् । प्रक्षालने, श्राद्धे पिण्डप्रदानार्थमास्तृतकुशस्थानसेचने च ।

अवन्ति (न्ती) पु॰स्त्री॰ अव-झि । मालवदेशे ।

अवन्तिका स्त्री॰ अवन्तिषु कायति प्रकाशते । मालवदेशीयराजधान्यामुज्जयिन्याम् । [काञ्जिके ।

अवन्तिसोम न॰ अवन्तिषु अभिषुतं सोममिव शाक॰त॰।

अवपात पु॰ अव+पत-घञ् । विले, अधःपतने, निपाते च ।

अवप्लुत त्रि॰ अव+प्लु-क्त । सहसाऽवतीर्णे ।

अवभास पु॰ अव+भास-घञ् । साक्षात्कारे, अन्यधर्म्मस्यान्यस्मिन्नारोपेण भाने च ।

अवभृथ पु॰ अव+भृ-क्थन् । मुख्ययज्ञसमाप्तौ क्रियमाणे यज्ञशेषे कर्म्मणि, यज्ञाङ्गभूते यज्ञान्ते स्नाने च ।

अवभ्रट त्रि॰अवनता नासिका प्रा॰स॰नतार्थे नासिकाया भ्रटादेशः अर्शआद्यच् । अवनतनासिके (खांदा) जने ।

अवम त्रि॰ अवत्यस्मादात्मानम् अव-मप् । कदाचारादौ, कुत्सिते, नीचे च । ज्योतिषप्रसिद्धे एकतिथिद्वयान्तवर्ति एकस्मिन् दिनवारे न॰ । अवमदिनमप्यत्र ।

अवमत त्रि॰ अव+मन-क्त । अनादृते ।

अवमर्द्द पु॰ अव+मृद-घञ् । पीडने । [शभेदे च ।

अवमर्श पु॰अव+मृश-घञ् । आलोचनायाम्, नाटकस्य सन्ध्यं

अवमानना त्रि॰ अव+चुरा॰-मन-युच् । अपमानकरणे ।

अवमानित त्रि॰ अव+चुरा॰ मन-क्त । कृतापमाने ।

अवमोटन न॰ अव+मुट्-णिच्-ल्युट् । (मोचड़ान) परिवर्त्तनेनान्यथापादनरूपे परिमोटने ।

अवयव पु॰ अव+यु-अच् । देहादावङ्गे, उपकरणे, न्यायमते प्रतिज्ञाहेतूदाहरणादिषु पञ्चसु वाक्येषु च ।

अवर त्रि॰अव+रा-क । चरमे,अधमे,कार्य्ये च । पश्चाद्वर्त्तिनि देशे काले पु॰ तद्वर्त्तिनि त्रि॰ । हस्तिजङ्घायाः पश्चाद्देशे न॰।

अवरज पु॰अवरस्मिन् काले जातः । कनिष्ठसोदरे भ्रातरि, शूद्रे च । कनिष्ठसोदरभगिन्यां, शूद्रायाञ्च स्त्री॰ टाप् ।

अवरति स्त्री॰ अव+रम-क्तिन् । विरामे, निवृत्तौ च ।

अवरवर्ण पु॰ कर्म्म॰ । शूद्रे,

अवरीण त्रि॰ अव+रीङ-क्त । तिरस्कृते ।

अवरुद्ध त्रि॰अव+रुध-क्त । आच्छादिते,बन्ध्यादिना प्रतिरुद्धे च अन्तःपुरवासिन्यां भोग्यायां दास्यां,राजयोषिति च स्त्री॰ ।

अवरूढ़ त्रि॰अव+रुह-क्त । अवतीर्णे, स्वस्थानादुत्थिते ।

अवरोध पु॰अव+रुध-भावे घञ् । निरोधे । कर्म्मणि घञ् । राजान्तःपुरस्थायां योषिति, राजदारेषु च । आधारे घञ् । राजान्तःपुरे । ल्युट् । अवरोधनमप्यत्र न॰ ।

अवरोधिक पु॰ अवरोधे रक्षणादौ नियुक्तः ठन् । राजान्तःपुररक्षणार्थं नियुक्ते वामनादौ ।

अवरोपित त्रि॰ अव+रुह-णिच्-पुक् च क्त । उत्पाटिते ।

अवरोह पु॰ अव+रुह-घञ् । अवतरणे, ऊर्द्धदेशान्निम्नदेशगमने, आरोहे च । पचाद्यच् । तरोर्मूलादग्रपर्य्यन्तमारूढायां गुडूच्यादिलतायां । अपादाने घञ् । स्वर्गे, ततो हि भोगावसाने सर्व्वेऽवतरन्ति ।

अवरोहशाखिन् पु॰ अवरोहति छिन्नोऽपि पुनः प्ररोहति अव+रुह-अच् कर्म्म॰, अवरोहति अधोगच्छति मूलमस्याः तादृशी शाखा कर्म्म॰ ततः बाहुल्ये मत्वर्थीय इनिर्वा । वटवृक्षे, तस्य छेदनेऽपि पुनः प्ररोहः च । शाखातोऽपि बहूनि मूलान्यवतरन्ति ।

अवरोहिका स्त्री॰ अव-रोहति अत्यन्तमधोगच्छति रुह-ण्वुल् टाप् कापि अतइत्त्वम् । अश्वगन्धालतायाम् ।

अवरोहिन् पु॰अव+रुह-णिनि । वटवृक्षे । अवरोहिशाखोऽप्यत्र

अवर्ण पु॰वर्ण-घञ् विरोधे नञ्तत॰। प्रशंसाविरोधिनि अपवादे

अवलक्ष अव+लक्ष घञ् श्वेतवर्णे । तद्वति, मूर्खे च त्रि॰ । अर्शआदेरतो लोपे,वलक्षोऽप्यत्रैवार्थे ।

अवलग्न पु॰ अव+लग-क्त नि॰ इडभावः । (माजा) देहमध्यभागे । संबद्धमात्रे त्रि॰।

अवलम्ब पु॰अव+लबि-आधारे घञ् । आश्रये । करणे घञि । अवलम्बसाधने दण्डादौ । अवलम्बनमप्यत्र ल्युट् ।

अवलम्बित त्रि॰ अव+लबि-क्त । आश्रिते,वस्त्रादिना बद्धे च

अवलिप्त त्रि॰ अव+लिप-क्त । गर्विते, कृतलेपने च ।

अवलीढ़ त्रि॰ अव+लिह्-क्त । भक्षिते, कृतावलेहे च ।

अवलीला स्त्री॰ अवरा लीला । अनायासे, अनादरे च ।

अवलेप पु॰ अव+लिप-घञ् । गर्व्वे,लेपने,दूषणे,सम्बन्धे च ।

अवलेपन न० अव+लिप-भावे ल्युट्। विलेपे, गर्वे, सङ्गले च। करणे ल्युटि। चन्दनादौ।

अवलेह पु० अव+लिह-घञ्। जिह्वाग्रेण स्वादने। कर्म्मणि घञि। तथास्वाद्ये औषधादौ च।

अवलोकन न०अव+लुक-ल्युट्। दर्शने,अनुसन्धाने च। करणे ल्युट्। आलोके, नेत्रे च। [लतायाम्।

अवल्गुज पु० अवल्गोरशोभनाज्जायते जन-ड। सोमराजी

अववाद पु०अव+वद-घञ्। निन्दायाम्, विश्वासे,आज्ञायाम्, अवालम्बने च। [परवशे, पराधीने च।

अवश त्रि० नास्ति वशमायत्तत्वं यस्य। अस्वाधीने, कामादि-

अवशिष्ट त्रि०अव+शिष-क्त। अतिरिक्ते, परिशिष्टे, अधिके च

अवश्यम् अव्य०अव+श्यै-डम्। निश्चये, अशक्यनिवारणे च।

अवश्याय पु०अव-श्यै-ण। कुज्झटिकायाम्, अभिमाने च।

अवश्रयण न० अव+श्री-अच्। चुल्लीतोऽवतार्य्य स्थापने।

अवष्टब्ध त्रि० अव+स्तम्भ-क्त। आसन्ने, आक्रान्ते, अवलम्बिते,प्रतिरुद्धे च।

अवष्टम्भ पु० अव+स्तम्भ-घञ्। स्वर्णे,स्तम्भे,प्रारम्भे, रोधने, गर्वे च "रघोरवष्टम्भमयेन पत्रिणे"ति रघुः।

अवस् अव्य० अवर+प्रथमायाः पञ्चम्याः सप्तम्या वाऽर्थे असि अवादेशः। वाह्ये पश्चादर्थे च।

अवसथ पु० वस-अथन् न०प्र०व०। निलये,ग्रामे च।

अवसथ्य पु० अवसथ+स्वार्थे यत्। आवासे, ग्रामे च।

अवसर पु० अव+सृ-अच्। प्रस्तावे, जिज्ञासानिवृत्तयेऽवश्य वक्तव्ये, वत्सरे, मन्त्रभेदे, वर्षणे, क्रियास्थितियोग्यतासम्पादककाले कालिकेऽवकाशे च। [कामचारानुज्ञायां च।

अवसर्ग पु०अव+सृज-घञ्। अप्रतिबन्धे, यथेष्टं क्रियतामिति

अवसर्प पु० अव+सृप-अच्। चरे। [कूपावसन्नतायाञ्च।

अवसाद पु० अव+सद-घञ्। नाशे, विषादे, स्वकार्य्याक्षमत्व

अवसादन न० अव+सद-णिच्-ल्युट्। कार्य्याक्षमत्वापादने, नाशने च। [समाप्तौ च।

अवसान न० अव+सो-ल्युट्। विरामे, समाप्तौ, सीमायां,

अवसाय पु० अव+सो-घञ्। समाप्तौ, शेषे, निश्चये च।

अवसित त्रि० अव+सो-क्त। समाप्ते, ऋद्धे, ज्ञाते, परिपक्वे, निश्चिते, मर्हितधान्ये च। अव+सि-क्त। संबद्धे।

अवस्कन्द पु०अव+स्कन्द-आधारे घञ्। जिगीषूणां सैन्यनिवेशस्थाने शिविरे, आक्रमणे च। [तरणे,आक्रमणे च।

अवस्कन्दन न० अव+स्कन्द-ल्युट्। सर्व्वाङ्गेणावगाहने,अव

अवस्कर पु०अव+कृ-अप् सुट्। विष्ठादिमले। अपादने अपि गुह्यदेशे उपस्थादौ। [अवादेशः। अवरकालादौ।

अवस्तात् अव्य० अवरस्मिन् अवरस्मात् अवरमित्यर्थे अस्ताति

अवस्तार पु० अव+स्तृ-घञ्। परदा इति ख्यातायां जवनिकायाम्, आस्तरणे च। [अवस्थाने च।

अवस्था स्त्री० अव+स्था-अङ्। कालकृतायां देहादेर्दशायाम्,

अवस्थान न० अव+स्था-ल्युट्। स्थितौ। आधारे वञि। आवासे, प्रतिज्ञायाञ्च।

अवस्यन्दन न० अव+स्यन्द-ल्युट्। हिंसने।

अवस्रंसन न० अव+स्रन्स-ल्युट्। अधःपतने, च्युतौ च।

अवहार पु०अव+हृ-कर्त्तरि ण। चौरे,ग्राहनामके, जलजन्तु भेदे च। भावे घञि। युद्धादिविश्रामे। कर्म्मणि घञि। निमन्त्रितविप्रादिभ्यो देये द्रव्ये। [भावे।

अवहित्था स्त्री० न० न वहिस्तिष्ठति स्था-क ष्टषो०। हृद्गत-

अवहेल न०स्त्री०। अव+हेल-अङ् घञर्थे क वा। अनादरे।

अवाक्पुष्पी स्त्री० अवाक् अधोमुखं पुष्पमस्याः। (सुलफा) इति ख्यातायाम् शतपुष्पिकायाम्।

अवाक्शिरस् त्रि० अवाक् शिरोऽस्य व०। अधोमुखे।

अवाग्र त्रि० अवनतमग्रमस्य। नम्रमुखे।

अवाङ्मुख त्रि० अवाक् मुखमस्य। अधोमुखे।

अवाच् त्रि० अवाञ्चति अव+अन्च-क्विप्। अधोमुखगते, अवरे-देशे, काले च। दक्षिणस्यां दिशि स्त्री० ङीप्। नास्ति वाक् यस्य ६व०। वाक्यरहिते त्रि०। पूर्व्वार्थे औ अवाञ्चौ,अत्र अवाचौ इत्यादिभेदः। कालाद्यर्थे प्रथमादीनां स्थानेऽस्ताति तस्य लुक्। अवरकालादावर्थे अव्य०।

अवाच्य न० वच-ण्यत् कुत्वम् न०त०। दुष्टवचने, वचनानर्हे,निन्दनीये च अवाच्+यत्। अवरकालादौ भवे त्रि०।

अवान्तर त्रि० अवगतमन्तरं मध्यम् प्रा०स०। प्रधानान्तःपातिनि अङ्गादौ, सामान्यस्य विशेषे च।

अवार न० न वारमत्र। नद्यादेर्जलानतिक्रमेण प्राप्ये तीरे।

अवारपार पु० अवारं पारञ्च स्तो यस्य अर्शआद्यच्। उभयकूलवति समुद्रे।

अवारपारीण त्रि०अवारपारे गच्छति+ख। पारगामिणि।

अवारिका स्त्री० नास्ति वारि यत्र। धन्याके, तस्य अतिशुष्कफलत्वेन जलशून्यत्वात्।

अवासस् त्रि० न वासोऽस्य। वस्त्ररहिते नग्ने।

अवि पु० अव-इन्। सूर्य्ये, मेषे, छागे, पर्व्वते, मूषिककम्बले, प्रभौ च। ऋतुमत्यां स्त्रियां लज्जायाञ्च स्त्री० वा ङीप्।

अविकट पु० अवि+समूहे कटच्। मेषसंघाते। विकट उपः

न०त०। उग्रभिन्ने सौम्ये। [अजगन्धाहचे।

अविगन्धा स्त्री० अवेश्छागस्य गन्ध इव गन्धः पुष्पादावस्याः।

अविग्न पु० विज-क्त न०त०। (करमचा) करमर्द्दकवृक्षे।

अवितथ न० न वितथं मिथ्या न०त०। सत्ये।

अविद्या स्त्री० विद्-क्यप् न०त०। विद्याभावे, अहङ्कारहेतौ अज्ञाने, विद्याविरोधिन्याम् अयथार्थबुद्धौ च। वेदान्तमते भावाभावाभ्यामनिर्वाच्यायामचेतनायां मायायाम्।

अविद्धकर्णी स्त्री० न विद्धः अच्छिद्रः पर्णरूपः कर्णोऽस्याः। पाठालतायाम्।

अविनाभाव पु० विना व्यापकम्तते न भावः स्थितिः। व्यापकस्थित्यनुरोधिसत्ताकरूपायां व्याप्तौ।

अविनीत त्रि० अव+नी-क्त। उद्धते। कुलटायां स्त्री०।

अविप्रिय पु० अवीन् मेषान् प्रीणाति प्री-क। श्यामातृणे। विप्रियमपकारः न०त०। प्रतिकूलभिन्ने। न०ब०। अपकारशून्ये त्रि०। श्वेतालतायां स्त्री०।

अविभक्त पु० वि+भज-क्त। संसृष्टे,विभागरहिते द्रव्ये-स्वामिनि च। अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः इति, अविभक्तं स्थावरं यत्सर्व्वेषामेव तद्भवेदिति च स्मृतिः।

अविमुक्त न० "न विमुक्तं शिवाभ्यां यदविमुक्तं ततो विदुः"-रित्युक्तलक्षणे काशीक्षेत्रे। वि+मुच-क्त न०त०। मुक्तभिन्ने त्रि०

अविरत त्रि० वि+रम भावे-क्त न०ब०। विरामशून्ये, अनवरते द्रव्यादौ च क्रियाविशेषणत्वे न०।

अविरति स्त्री०विरामो विरतिः भावे क्तिन् न०त०। विषयादौ स्थिरचित्ततायाम्, विरामाभावे च।

अविरल त्रि० न विरलः न०त०। घने,निविड़े।

अविलम्बित त्रि० वि+लबि-क्त न०त०। विलम्बशून्ये त्वरायुक्ते द्रव्यादौ। क्रियाविशेषणत्वे न०।

अविवेक पु० वि+विच-घञ् न०त०। सदसद्विवेकाभावे,सम्भूयैककार्य्यकरणे, भ्रमे च। न०ब०। विवेकशून्ये त्रि०।

अविवेकिन् त्रि० वि+विच-घिनुण् न०त०। विवेचकभिन्ने, मूर्खे,शास्त्राद्युपदेशशून्ये,विवेकोभेदस्तद्रहिते च। साङ्ख्यमते प्रधाने, महदादौ च। प्रधानं महदादिभ्यः, महदादयश्च प्रधानात् न विविच्यन्ते (भिद्यन्ते) इत्युक्तम् तत्रैव।

अविशेष पु० वि+शिष-घञ् न०त०। विशेषाभावे, अभेदे च। न०ब०। विशेषशून्ये तुल्ये त्रि०। साङ्ख्यादिमतसिद्धेषु तन्मात्राख्येषु सूक्ष्मभूतेषु तानि च इदमेतदेवंगुणकमिति व्याहृततया नानुभूयन्ते इत्यविशेषाः।

अविश्रान्त त्रि० वि+श्रम-क्त न०त०। विरामरहिते द्रव्ये।

अविष पु०अव-टिषच्। समुद्रे, नृपे च। ङीप्। नद्यां स्त्री०। विषशून्ये त्रि०। (आतइच्) विश्वायां स्त्री० टाप्।

अविसोढ़ न०अवेर्दुग्धम् अवि+सोढ न षत्वम्। मेष्यादुग्धे।

अविस्पष्ट न० विस्पष्टं श्रुतमात्रेणार्थावबोधकं सुखेन श्रवणायोग्यञ्च वि+स्पश-क्त न०त०। अस्पष्टवाक्ये। [यत्र।

अवीचि पु०नास्ति वीचिः सुखमत्र। नरकभेदे अवीचिमयोऽ-

अवीजा स्त्री० ईषदर्थे नञा ब०। अल्पवीजवत्यां द्राक्षायाम्। वीजशून्ये त्रि०। [प्रवर्त्तमाने निषेधके अनुमाने।

अवीत न० वि+इण्-क्त न०त०। न्यायप्रसिद्धे व्यतिरेकमुखेन

अवीर त्रि० वीरः पुत्रादि र्नास्ति यस्य। पुत्रादिशून्ये।न०त० वीर्य्यवर्ज्जिते। पतिपुत्ररहितायां स्त्री०। "अजातपुत्राविधवा साऽवीरा परकीर्त्तितेति" स्मृतेः। [धाने च।

अवेक्षण न० अव+ईक्ष-ल्युट्। दर्शने, प्रतिजागरणे, अव-

अव्यक्त पु०वि+अन्ज-क्त न०त०। विष्णौ, कामे, शिवे, सांख्यमते सर्व्वकारणे, प्रधाने, रूपाद्यहीनतया चक्षुराद्यगोचरत्वात्तस्य, वेदान्तमते सूक्ष्मशरीरे स्वप्नावस्थायां शब्दप्रवृत्तिनिमित्तजातिगुणादिभिर्वर्ज्जिते निराकारे ब्रह्मणि च न०। अस्पष्टे वस्तुमात्रे त्रि०। [ईषद्रक्ते अरुणवर्णे।

अव्यक्तराग पु० न व्यक्तोऽस्पव्यक्तोरागोऽरुणिमा यस्य।

अव्यङ्गा स्त्री० अवेरङ्गं शृङ्गमिवाङ्गमस्याः। शूकशिम्ब्याम्। न विकलमङ्गमस्य ६ब०। विकलाङ्गभिन्ने पूर्णाङ्गे त्रि०।

अव्यञ्जन पु० नास्ति व्यञ्जनं शुभलक्षणं शृङ्गं यस्य। शृङ्गहीनपशौ, सुलक्षणशून्ये, चिह्नशून्ये च त्रि०।

अव्यण्डा स्त्री० न विगतमण्डं वीजमस्याः। शुकशिम्ब्याम्।

अव्यथ पु०न व्यथते पद्भ्यां न सञ्चलति व्यथभयचलनयोः अच्। सर्पे। व्यथाशून्ये त्रि०। नास्ति व्यथा यस्याम् ७त०। हरितक्याम् शुण्ठ्याञ्च स्त्री०। [व्यथाशून्ये त्रि०।

अव्यथिन् पु० बहुचलनेऽपि न व्यथते व्यथ-इनि। अश्वे,

अव्यभिचारिन् त्रि० वि+अभि+चर-णिनि न०त०। केनापि प्रतिकूलहेतुना निवारयितुमशक्ये। न्यायमते व्यभिचारो व्याप्तेरभावस्तच्छून्ये हेतौ पु०।

अव्यय पु० न० वि+इण्-अच् न०त०। सर्व्वासु विभक्तिषु सर्व्ववचनेषु च एकरूपे शब्दवृत्तिधर्म्मविशेषे, यथा स्वरादयोऽव्ययाः सर्व्वत्रैकरूपाः शिवे, विष्णौ च पु०। आद्यन्तरहिते विकारशून्ये त्रि०। परब्रह्मणि न०। "सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु। वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययमिति श्रुतिः।

अव्ययीभाव पु० अनव्ययमव्ययं भवत्यनेन अव्यय+च्वि-भू

10219731

घञ् । व्याकरणसिद्धे समासविशेषे । तत्र हि उपकुम्भमित्यादौ अनव्ययस्यापि कुम्भादिपदस्याव्ययत्वम् ।

अव्यवस्था स्त्री० वि+अव+स्था-अङ् न०त० । इदं कर्त्तव्यमिदं नेति नियमाभावे, शास्त्रादिविरुद्धायां व्यवस्थायाम्, अविधौ च । [भोजनादौ एकत्रावस्थानायोग्ये पतितादौ ।

अव्यवहार्य्य त्रि० वि+अव+हृ-ण्यत् न०त० । शयनासन-

अव्यवहित त्रि० वि+अव+धा-क्त न०त० । व्यवधानरहिते साक्षात्संबद्धे ।

अव्याकृत त्रि० वि+आ+कृ-क्त न०त० । वेदान्तमते अप्रकटीभूते वीजरूपे जगत्कारणेऽज्ञाने । सांख्यादिमते प्रधाने च ।

अव्याप्यवृत्ति त्रि० व्याप्य स्वाधिकरणं देशादिकं साकल्येन संबध्य न वृत्तिः स्थितिर्यस्य । स्वाधिकरणे देशादौ प्रदेशविशेषस्थिते वस्तुनि । यथा घटोभूतलादौ एकदेश एव तिष्ठति इत्यतोऽव्याप्यवृत्तिः । व्याप्यवृत्तिस्तु जात्यादिः घटादौ साकल्येन सम्बध्य स्थित इति न्यायमते प्रसिद्धम् ।

अव्युत्पन्न त्रि० वि+उद्+पद्-क्त न०त० । समुदायशब्दस्यावयवशोऽर्थबोधकताशक्तिः व्युत्पत्तिस्तच्छून्ये अवयवार्थशून्ये शब्दे, शब्दार्थानभिज्ञे मूर्खादौ च ।

अश संहतौ-व्याप्तौ च स्वादि० आत्म० वेट् सक० । अश्नुते आशिष्ट आष्ट आनशे ।

अश भोजने क्र्यादि० पर० सक० सेट् । अश्नाति आशीत् ।

अशकुम्भी स्त्री० अश्नुते व्याप्नोति अश-अच् अशा स्तुभ्नाति जलमावृणोति स्तुम्भ-ट पृषो० सलोपः टित्वात् ङीप् कर्म्म० । अल्पकालेन जलव्यापके जलोपरिजाते पाना इति ख्याते तृणभेदे ।

अशन पु० अश्नुते व्याप्नोति अश-ल्यु । पीतसालवृक्षे दन्त्यमध्योऽप्ययमत्रार्थे । भावे ल्युट् । व्याप्तौ, भोजने च न० । कर्म्मणि ल्युट् । अन्ने न० ।

अशनपर्णी स्त्री० अशनस्य पीतसालस्य पर्णमिव पर्णमस्याः । आराटी इति ख्याते वृक्षभेदे तस्य पीतसालतुल्यपर्णत्वात्

अशनाया स्त्री० अतिलोभेनाशनमिच्छति अशन+क्यच्-भावे अ । बुभुक्षायाम् । [बुभुक्षायाम् न० ।

अशनायित त्रि०अशन-क्यच-कर्त्तरि-क्त । क्षुधिते । भावे-क्त ।

अशनि पु० स्त्री० अश्नुते संहन्ति अश-अनि । मेघोत्पन्ने ज्योतिषि वज्रे, प्रस्तरवर्षिणि उल्काविशेषे,विद्युति च ।

अशब्द त्रि० नास्ति शब्दो, वेदादौ वाचकशब्दो वा यस्य । शब्दहीने, वेदे वाचकशब्दवर्जिते च "प्रधानेऽशब्दमस्पर्शमरूपमव्ययमिति" श्रुतिः "ईक्षतेर्नाशब्दमिति" शारीरकसूत्रञ्च

अशरीर त्रि० नास्ति शरीरं तदभिमानो वा यस्य । "प्रत्यग्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके । नेतिनेतिस्वरूपत्वादशरीरो भवत्ययम्" इत्युक्तलक्षणे सकलानर्थधरूपे देहशून्ये परमात्मनि, शरीराभिमानशून्ये जीवन्मुक्ते च "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतइति श्रुतिः ।

अशास्त्र न० शास-करणे ष्ट्रन् शास्त्रं वेदादि विरोधे न०त० । वेदादिविरुद्धे नास्तिकागमादौ ।

अशित त्रि० अश-कर्म्मणि क्त । भक्षिते । कर्त्तरि क्त । तृप्ते ।

अशितङ्गवीन त्रि०अशितास्तृप्ता गावोऽत्र । पूर्व्वगोचारणक्षेत्रे ।

अशितम्भव त्रि० अशितस्तृप्तो भवत्यनेन ख मुम् च । तृप्तिसाधने अन्नादौ । [इत्र । चरौ ।

अशित्र पु०अश-संहतौ इत्र । चौरे । भोजनार्थात् कर्म्मणि

अशिर पु० अश-भोजने इर । वह्नौ,राक्षसे,सूर्य्ये,वायौ च । वज्रे न० । [याम् । स्वार्थे के ह्रस्वे अशिश्विकाप्यत्र ।

अशिश्वी स्त्री० नास्ति शिशुर्यस्याः ङीष् । शिशुहीनायां स्त्रि-

अशीति स्त्री० दशानामवयवं दशतिः दशकमष्टगुणिता दशतिः नि० अशीत्यादेशः । अष्टगुणिते दशके संख्याभेदे, तत्संख्यान्विते च

अशुभ न० नास्ति शुभं यस्मात् ५व० । पापे "प्रयतत्वादोपचितमशुभं नाशयती"ति स्मृतिः । न०त० । अमङ्गले । तद्वति त्रि०

अशेष त्रि०नास्ति शेषो यस्य । शेषरहिते सम्पूर्णे । क्रियाविशेषणत्वे न० । नञ् त० । शेषाभावे ।

अशोक पु० नास्ति शोको यस्मात् ५व० । स्वनामख्याते अशोकवृक्षे, वकुलवृक्षे च । पारदे न० । कटुकवृक्षे स्त्री० । न०त० । शोकशून्ये त्रि० ।[कटुकीति ख्यातायां कटुकायाम् ।

अशोकरोहिणी स्त्री० अशोक इव रोहति रुह-णिनि ।

अशोच्य त्रि० शुच-योग्यत्वे ण्यत् न०त० । शोचितुमयोग्ये

अशौच न० शुचेर्भावः शौचं न०त० । स्मृतिप्रसिद्धे ,विहितकर्म्मानधिकारित्वसम्पादके अधर्म्मे, शुचित्वाभावे च । स्वार्थे ष्यञ् आशौच्यमप्यत्र "आशौच्याद्विप्रमुच्येते"ति स्मृतिः ।

अश्मकदली स्त्री० अश्नुते अश-मनि कर्म्म० । काष्ठकदल्याम् ।

अश्मकुट्ट पु० अश्मनि प्रस्तर एव धान्यादिकं कुट्टयति । वानप्रस्थभेदे, तस्योदूखलादिशून्यत्वेन तण्डुलादेर्निस्तुषीकरणं प्रस्तरे एव विहितम् । [मरकतमणौ ।

अश्मगर्भ पु०अश्मना जातो गर्भोऽस्य । पन्ना इति ख्याते

अश्मगर्भज पु० अश्मगर्भाज्जायते जन-ड । मरकतमणौ अश्मयोनिरप्यत्र । [वृक्षे ।

अश्मघ्न पु० अश्मानं हन्ति भिनत्ति हन-ट । पाषाणभेदके

अश्मज न०अश्मनो जायते जन-ड । प्रस्तरजाते शिलाजतुनि,

लौहे च । अश्मजतुरप्यत्र । [भेदके टङ्कनामास्त्रे ।

अश्मदारण पु० अश्मानं दारयति दृ-णिच्-ल्यु । पाषाण-

अश्मन् पु० अश्नुते व्याप्नोति,संहन्त्यनेन वा। कर्त्तरि करणे वा मनिन् । पाषाणे । [चूल्लग्राम्य। असूनामन्त्रः। अश्मन्तोऽप्यत्र ।

अश्मन्त न० अश्मनोऽन्तोऽत्र शक० पररूपम् । अशुभे चेत्रे,

अश्मन्तक पु०न० अश्मानमन्तयति । चूल्लग्राम्, दीपाधाराच्छादने, तृणविशेषे च । आवुडेति ख्याते अम्लोटकवृक्षे, अम्लपत्रे कोविदारकवृक्षे च पु० ।

अश्मपुष्प न०अश्मनः पुष्पमिव। शिलाजतुनि,शैलेये गन्धद्रव्ये

अश्मभाल न० अश्मेव भाजयति चूर्णितं करोति । भज-णिच्-अण् पृषो० जस्य लत्वम् । द्रव्यचूर्णकारके हामानदिस्ते इति ख्याते लौहपात्रभेदे ।

अश्मभिद् पु० अश्मानमुद्भिद्य जायते । पाषाणभेदके वृक्षे । क । अश्मभिदोऽप्यत्र ।

अश्मरी स्त्री० अश्मानं राति रा-क गौरा०ङीष् । मूत्रकृच्छ्ररोगे स हि मूत्रद्वारे प्रस्तरमिव कठिनमांसं रचयति ।

अश्मरीघ्न पु० अश्मरीं मूत्रकृच्छ्रं हन्ति हन-ट । वरुणवृक्षे

अश्मरीहर पु० अश्मरीं हरति हृ-ट । (देधान) देवधान्ये ।

अश्मसार पु०न० अश्मनः सार इव । लौहे । ६ब० । तत्तुल्यकठिने त्रि० । [अस्यते अस-कर्म्मणि रक् अस्रमप्यत्र ।

अश्र(स्र) न० अश्नुते नेत्रं कण्ठम् वा अश-रक् । चक्षुर्जले,रक्ते च

अश्र(स्र),प पु० अश्रं (स्रं) पिबति पा-क । राक्षसे ।

अश्रान्त त्रि० श्रम-भावे-क्त न०ब० । सन्तते निवृत्तिरहिते च। कर्त्तरि क्त न०त० । श्रान्तभिन्ने त्रि० । [वा ङीप् ।

अश्रि(श्री) स्त्री० अश-रि । अस्त्रादेरग्रभागे गृहादिकोणे च

अश्रु(स्रु) पु० अश्नुते अस्यते वा । अश् (अस) रुक् । चक्षुर्जले ।

अश्लील न० श्रियं लाति गृह्णाति ला-क रस्य लत्वम् श्री+सिध्मादित्वात् ल वा न०त० । लज्जादिसम्पादिकायाम् ग्राम्यभाषायाम् ।

अश्लेषा स्त्री० न श्लिष्यतेऽन्योन्यम् सप्ततारात्मकत्वेऽप्यस्याः योगकारकताराऽन्तराभावात् न परस्परमेलनम् श्लिष-अच् न०त० । अश्विन्यवधिनवमतारायाम् । श्लेषः अलङ्कारविशेषः संबन्धो वा न०ब० । तद्रहिते त्रि० ।

अश्व पु० अश्-क्वन् । घोटके । [अश्वगन्धाख्यवृक्षे ।

अश्वकन्दिका स्त्री० अश्वस्य मेढ्रमिव कन्दोमूलमस्याः ।

अश्वकर्ण पु० अश्वस्य कर्ण इव पत्रमस्य । स्वनामख्याते सालवृक्षे । स्वार्थे के अश्वकर्णकोऽप्यत्र ।

अश्वखरज पु० अश्वस्य खरी च, अश्वी च खरस्य वा ताभ्यां जायते पुंवद्भावः। खचरे घोटकभेदे । खराश्वजोऽप्यत्र ।

अश्वखुर पु० अश्वस्य खुरमिव खुरं मूलमस्य । नखीति ख्याते गन्धद्रव्ये । अपराजितायाम् स्त्री० ।

अश्वगन्धा स्त्री० अश्वस्य गन्ध एकदेशोमेढ्रमिव मूलमस्याः । वराहकर्णतुल्यपत्रे स्वनामख्याते क्षुद्रवृक्षभेदे ।

अश्वघ्न पु०अश्वं हन्ति हन-ट । करवीरवृक्षे तस्याश्वनाशकत्वात्

अश्वतर पु०तनुरश्वः अश्व+तनुत्वे ष्टरच् अश्वशामश्वेनोत्पन्नत्वेऽश्वत्वं तस्य तनुत्वञ्चान्यपितृकत्वात् । गर्द्दभेनाश्वशामुत्पन्ने, खचरेऽश्वविशेषे, सर्पभेदे च । जातित्वेन स्त्रियां ङीप् ।

अश्वत्थ पु० न श्वस्थिरं शाल्मलिवृक्षादिवत् तिष्ठति स्था क नि० । स्वनामख्याते वृक्षे, गर्द्दभाण्डवृक्षे, चिरमस्थायित्वात् संसाररूपे वृक्षे च "ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्यय"मिति गीता ।

अश्वपाल पु० अश्वान् पालयति पा+णिच्-लन् कण् । घोटरक्षके । ण्वुल् अश्वपालकोऽप्यत्र जले न० ।

अश्वपुच्छी स्त्री०अश्वस्य पुच्छमिव केशरोऽस्य । माषपर्णीवृक्षे

अश्ववाल पु० अश्वस्य बालः केशर इव तदाकारपुष्पत्वात् । क्याशा इति ख्याते काशे । ६त० । अश्वस्य केशे ।

अश्वमार पु० अश्वं मारयति मृ-णिच्-अण् । करवीरे । ण्वुल् अश्वमारकोऽप्यत्र । [षाकारान्याङ्गे किन्नरे। स्त्रियां ङीप्

अश्वमुख पु० अश्वस्य मुखमिव मुखमस्य । अश्वाकारमुखे पुरु-

अश्वमेध पु० अश्वो मेध्यते बध्यतेऽत्र मेध-घञ् । यज्ञभेदे ।

अश्वमेधीय पु० अश्वमेधस्यायं हितोवा छ । अश्वमेधाङ्गेऽश्वे ।

अश्वयुज स्त्री० अश्वं युनक्ति रूपेणानुकरोति क । अश्विनीनक्षत्रे तस्या अश्वतुल्यरूपत्वात् । युज-क्विन् अश्वयुगपि अश्वेन अश्वाकारेण युज्यते यत्र चान्द्राश्विनमासि पौर्णमास्याम् । तस्मिन् चान्द्रमासे च "अश्वयुक् कृष्णपक्षे तु श्राद्धं कुर्य्यादि"ति स्मृतिः । मत्वर्थीयेऽचि । अश्वयुजोऽप्यत्र

अश्वरोधक पु० अश्वं रुणद्धि रुध-ण्वुल् । करवीरे वृक्षे ।

अश्ववक्त्र पु० अश्वस्य वक्त्रमिव वक्त्रमस्य । अश्वमुखाकारमुखवति पुरुषाकारान्याङ्गके किन्नरे ।

अश्ववार(ह) पु० अश्वं वारयति चुरा०वृ-अण् । अश्वारोहिणि । वह-णिच्-अण् । अश्ववाहोऽप्यत्र ।

अश्वस्तन त्रि०न श्वोभवं श्वस्+ट्युल् तुट् च। परदिनास्थायिनि एकदिननिर्वाहोचितेऽन्नादौ "अश्वस्तनविधानेन हर्त्तव्यमि"तिमनुः

अश्वाक्ष पु० अश्वस्याक्षीव अच् समा० । देवसर्षपवृक्षे ।

अश्वाभिधानी स्त्री० अश्वोऽभिधीयतेऽभिधार्य्यतेऽनया अभि-धा-ल्युट् । अश्वबन्धनरज्ज्वामभिधानीवाज्ज्वाम् "इमाम-

ष्टम्बाद्दशनां स्तस्येत्यश्वाभिधानीमादत्ते” इति श्रुतिः ।

अश्वारि पु० अश्वस्यारिः ६त० । महिषे ।

अश्वारोह पु० अश्वमारोहति रुह-अण् । अश्ववाहके, अश्वारोहणेन युद्धकर्त्तरि च । अश्वगन्धायां स्त्री० । [श्वाहत्ते ।

अश्वावरोहक पु० अश्वस्तम्बमिवावरोहति ण्वुल् । अश्वग-

अश्विन् पु० द्वि० अश्वाः सन्ति ययोः इनि । स्वर्गवैद्ययोः

अश्विनी स्त्री० अश्वः अश्वाकारो विद्यते यस्याः अश्व+इनि । सप्तविंशतिनक्षत्रमध्ये प्रथमे नक्षत्रे ।

अश्विनीकुमार पु० द्वि० अश्वीभूता संज्ञानाम्नी सूर्य्यपत्नी तस्यामश्वरूपेण सूर्य्येण जातौ कुमारौ । स्वर्गवैद्ययोः ।

अश्वीय न० अश्वानां समूहोऽश्वेभ्योहितं वा छ । अश्वसमूहे अश्वहिते त्रि० । [अश्वे ।

अश्वोरस न० अश्वानामुर इव मुख्यम् षच्समा० । मुख्ये

अष दीप्तौ अक० गतौ, ग्रहणे च सक० भ्वादि०उभ० सेट् । अषति ते आषीत् आषिष्ट ।

अषडक्षीण त्रि० न सन्ति षडक्षीणि श्रोत्रेन्द्रियाणि यत्र च । तृतीयजनकर्णाश्रुते द्वाभ्यामेव कृते मन्त्रादौ ।

अषाढ़(ड़) पु० अषाढ़(ड़)या युक्ता पौर्णमासी आषाढी (डी) सा यत्र मासे अण् वा ह्रस्वः । वैशाखादितस्तृतीये मासे आषाढ़मासे । आषाढ़ी पूर्णिमा प्रयोजनमस्य प्रयोजनार्थे अण् । ब्रह्मचारिधार्य्ये दण्डे, तस्य हि आषाढपौर्णमास्यां विहितकर्म्मोपयोगित्वात् आशाडः आषा(डो)ढोऽप्युभयत्र ।

अषाढ़ा(ड़ा) स्त्री० षाढिः साहनं सह-णिच्+क्तिन् षत्वम् अर्श आद्यच् न०त० पृषो० वा डत्वम् । अश्विन्यवधिके पूर्व्वादिके विंशे, उत्तरादिके एकविंशे च नक्षत्रे । अशाडाप्यत्र ।

अष्टक न० अष्टौ अध्यायाः परिमाणमस्य अष्टन्+कन् । पाणिनेरष्टाध्यायीग्रन्थे, प्रत्येकमष्टाध्यायात्मके ऋग्वेदांशे च

अष्टका स्त्री० “अष्टका तु समाख्याता सप्तम्यादिदिनत्रयमि” त्युक्तलक्षणे सप्तम्यादिदिनत्रये, अश्नन्ति पितरोऽस्यां तिथौ अश-तकन् । पौषमाघफाल्गुनानां कृष्णाष्टम्यां, “अष्टका पितृदैवत्ये” इत्यजादिपाठात् न इत्त्वम् । तद्विहितश्राद्धे च

अष्टन् त्रि० बहु० अश-व्याप्तौ कनिन् तुट् च । संख्याभेदे ।

अष्टपदिका स्त्री० अष्टसु दिक्षु पादा अस्याः अन्त्यलोपः ङीपि पुंवद्भावे संज्ञायां कन् ह्रस्वः । (हापरमालि) लतायाम्

अष्टपाद् पु० अष्टौ पादा अस्य ब० वा अन्त्यलोपः मृगविशेषे, शरभे, लूतायाञ्च । अष्टपादोऽप्यत्र ।

अष्टमङ्गल पु० अष्टसु स्थानेषु उरःखुरचतुष्टयपुच्छमुखपृष्ठस्थकेशेषु श्वेतरूपात्मकं मङ्गलमस्य । तादृशलक्षणयुक्ते अश्वे । अष्टानां मङ्गलद्रव्याणां समाहारः । “लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणोगौर्हुताशनः । हिरण्यं सर्पिरादित्य आपो राजा तथाष्टम” इत्युक्तेषु अष्टसु द्रव्येषु ।

अष्टमान न० अष्टौ मुष्टयः मानं परिमाणमस्य । कुडवरूपे अष्टमुष्टिमिते परिमाणभेदे ।

अष्टमी स्त्री० अष्टानां पूरणी । पञ्चदशकलात्मकचन्द्रस्य अष्टम कलाक्रियारूपायां स्वनामख्यातायां तिथौ अष्टसंख्या पूरण्याञ्च । अश+क्त अष्ट संघातं व्याप्तिं वा माति मा-अच् क गौरा० ङीष् । कोटालतायाम् ।

अष्टमूर्त्ति पु० अष्टौ भूम्यादयो मूर्त्तयोऽस्य । “क्षितिर्जलं तथा तेजो वायुराकाशमेवच । यष्टार्कश्च तथा चन्द्रः मूर्त्तयोऽष्टौ पिनाकिनः” इत्युक्ताष्टमूर्त्तिधारिणि शिवे ।

अष्टलौहक न० अष्टानां लौहानां धातूनां समाहारः । “सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा । वङ्गं लौहं तीक्ष्णलौहमित्यष्टौ धातवः स्मृता” इत्युक्तेषु अष्टसु धातुषु ।

अष्टाकपाल पु०अष्टसु कपालेषु मृत्पात्रेषु संस्कृतः पुरोडाशः । संस्कारार्थकस्य तद्धितस्य लुक् आत्वम् । अष्टसु कपालेषु संस्कार्य्ये पुरोडाशे, तत्साध्ये यज्ञे च ।

अष्टाङ्ग पु० अष्टावङ्गानि यस्य । योगविशेषे, यमनियमासन प्राणायामप्रत्याहारध्यानधारणासमाधिरूपे योगशास्त्रोक्ते एतेषां स्वरूपादि तत्तच्छब्दार्थे वक्ष्यते । “जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरित इत्युक्तलक्षणे प्रणामे “आपः क्षीरं कुशाग्रं च दधि सर्पिः सतण्डुलम् । यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः” इत्यष्टद्रव्यघटिते पूजोपकरणेऽर्घे, शारीफलके च तस्य प्रत्येकपङ्क्तौ अष्टपदरूपाङ्कत्वात् ।

अष्टादशन् त्रि०बहु० । अष्टाधिका दश, अष्टौ च दश चेति वा । संख्याविशेषयुक्ते । पूरणे डटि । तत्पूरणे त्रि० । [पाचने

अष्टादशाङ्ग पु० न० अष्टादश अङ्गानि यत्र । वैद्यकप्रसिद्धे

अष्टापद पु०न० अष्टौ अष्टौ पदानि पङ्क्तावस्य वृत्तौ संख्या शब्दस्य वीप्सार्थत्वाङ्गीकारात् आत्वम् । शारीफलके । अष्टसु धातुषु पदं प्रतिष्ठा यस्य । स्वर्णे । शरभे, लूतायाञ्च पु०, तयोरष्टपदत्वात् । अष्टाभिः सिद्धिभिरापद्यते आ+पद-अच् । अणिमाद्यष्टसिद्धियुक्ते कैलाशे । अष्टसंख्यातेन आपद्यते अप् । कावे ।

अष्टि स्त्री० अस्यते भूमौ क्षिप्यते अस-क्तिन् पृषो० षत्वम् । आटि इति ख्याते वीजे, षोड़शाक्षरपादके छन्दोभेदे च ।

अष्टीला स्त्री० “आध्मापयन् वस्तिमुक्तं रुद्धा वातश्चलोन्न-

ताम्। कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीमिति वैद्यकोक्तलक्षणयुक्ते वातजन्ये व्याधिभेदे।

अष्ठीवत् पु० नास्ति अतिशयितमस्थि यस्मिन् मतुप् पृषो० नि०। (आंटु) इति ख्याते जान्वोः सन्धिस्थाने।

अस दीप्तौ अक०ग्रहणे गतौ च सक०भ्वादि०उभ०सेट्। असति ते आसीत् आसिष्ट। 'लावण्य उत्पाद्य इवास' इति कुमारः

अस विद्यमानतायाम् अदा०अक०पर० सेट्। अस्ति अभूत्।

अस क्षेपे दिवा० पर० सक० सेट्। अस्यति आस्थत्।

असंस्कृत त्रि०सम्+कृ-क्त सुट् न०त०। गर्भाधानादिसंस्कार रहिते, व्याकरणसंस्कारशून्ये अपशब्दे च।

असकृत् अव्य० न सकृत् न०त०। पौनःपुन्ये।

असक्त त्रि० सन्ज-क्त न०त०। आसक्तिशून्ये फलाभिलाष शून्ये च "असक्तः सुखमन्वभूदि"ति रघुः। "कुर्य्यात् विद्वांस्तथाऽसक्तः" इति गीता। [पथि च पु०।

असङ्कुल त्रि०न सङ्कुलः। परस्पराविरुद्धे। ग्रामादिपथे विस्तीर्णे

असङ्क्रान्तमास पु० न सङ्क्रान्तः राश्यन्तरं प्राप्तोरवि र्यत्र चान्द्रमासे। शुक्लप्रतिपदादिदर्शान्ते संक्रमणशून्ये मलमासे।

असङ्ख्य त्रि०नास्ति संख्या यस्य। परार्द्धातीते,बहुसंख्यके च

असङ्ग पु० सन्ज-घञ् न०ब०। सङ्गरहिते परमात्मनि, हरौ च। न०त०। सङ्गविरोधिनि, पुत्रवित्तलोकैषणात्याग रूपे वैराग्ये। न०ब०। विषयरागाभाववति त्रि०।

असङ्गत त्रि०सम्+गम-क्त न०त०। सङ्गतिरौचिती तच्छून्ये, अनन्तराभिधानोत्थापकाकाङ्क्षाविषयभिन्ने च। "नासङ्गतं प्रयुञ्जीतेत्य"भियुक्तोक्तिः। [अर्थालङ्कारभेदे सा०१०परि०।

असङ्गति स्त्री० सम्+गम-क्तिन् न०त०। सङ्गतिविरहे।

असत् त्रि० अस+शतृ न०त०। सद्भिन्ने, निरुपाख्ये निःस्वरूपे निषेधरूपेण प्रतीयमाने, अभावस्वरूपे, "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ"ति गीतोक्ते अश्रद्धया कृते होमादौ च। इन्द्रे पु०। दुष्टाचारिणि असाधौ त्रि०। स्त्रियां ङीप् कुलटायाम्।

असद्ग्रह पु० असति अविद्यमाने वस्तुनि ग्रहः आग्रहः। बालादीनाम् आवदार इति ख्याते आग्रहभेदे।

असपर्णी स्त्री० असनस्य पर्णमिव पर्णमस्याः। वातकवृक्षे।

असभ्य त्रि० सभायामर्हः यत् न०त०। सभायामनुपयुक्ते। स्त्रीवर्णनादौ, खले च। [राजस्य ज्येष्ठपुत्रे पु०।

असमञ्जस न० समञ्जसं युक्तियुतं न०त०। असङ्गते। सगर-

असमय पु० अपकृष्टार्थे न०त०। दुष्टकाले अयोग्यकाले च।

असमर्थ त्रि० समर्थः शक्तः न०त०। अशक्ते,दुर्बले च। समर्थः सङ्गतार्थः न०त०। असङ्गतार्थे, व्याकरणशास्त्रे प्रसिद्धायां यत्र यस्यान्वययोग्यता तत्सहचराभावेनापेक्षायाम् अत एव अश्राद्धभोजीत्यादौ असमर्थसमासः नञ्पदस्य श्राद्धेन सहान्वयायोग्यत्वात् भोजनेन च सहचाराभावेन अपेक्षणीयत्वात्।

असमवायिकारणम् न० समवैति सम+अव+इण-णिनि न०त० कर्म्म०। न्यायमते समवायिकारणं द्रव्यं तद्भिन्नं द्रव्यवृत्ति यत् गुणादिकं कारणं तस्मिन्नर्थे। यथा कपालद्वयसंयोगरूपो गुणोघटस्य,द्रव्याश्रिता क्रिया संयोगविभागादेः

असमीक्ष्यकारिन् त्रि० समीक्ष्य विविच्य न करोतीति कृ+णिनि। विवेचनामकृत्वैव कर्म्मकारके, मूर्खे च।

असम्बद्ध न० सम्बद्धं परस्परमन्वितं न भवति सम्+बन्ध-क्त न०त०। अर्थानवोधकेऽनन्वितार्थके वाक्ये।

असम्बद्धप्रलाप पु० ६त०। असम्बद्धस्य असङ्गतस्य कथने, असङ्गतस्य अप्रस्तुतस्य निष्प्रयोजने कथने च।

असम्बाध त्रि० नास्ति सम्बाधा अन्योन्यं पीड़ा यत्र। परस्परसंघर्षरूपपीड़ारहिते विरले,बाधारहिते च। "असंबाधा देवनदी'ति भारतम्।

असम्मत त्रि० सम्+मन-क्त नास्ति सम्मतो यस्मात् ५ब०। प्रणयिजने। न०त०। अनभिमते "असम्मतः कस्तव मुक्ति मार्ग"मिति कुमारः। [ताभिमानरहिते च।

असम्मुग्ध त्रि० सम्+मुह-क्त न०त०। अकृतसन्देहे पण्डि-

असरु पु०सरति सृ-उ न०त०। (कुकुरसोङ्गा) वृक्षे।[शून्ये त्रि०

असहन पु० न सहति सह-ल्यु न०त०। शत्रौ। क्षमा-

असाधारण त्रि० न०त०। साधारणं सामान्यधर्म्मयुक्तं तद्भिन्ने, तन्मात्रवृत्तिधर्म्मयुक्ते, विशेषे, अधिके च। न्यायमते "यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मत"इत्युक्ते सपक्षविपक्षाव्यावृत्तौ दुष्टे हेतौ पु०। यथा वह्निसाधने गगनादिहेतुः स च पक्षे पर्व्वतादौ, पक्षभिन्ने जलादौ च न विद्यते गगनादेः कुत्रापि विद्यमानत्वाभावात्।

असाधु त्रि० न०त०। साधुभिन्ने, असच्चरिते, संस्कृतशब्दभिन्ने, अपभ्रंशादौ च।

असाध्य त्रि० सिध-णिच्-साधादेशः यत् न०त०। "ऊर्द्धं साध्यमधोयाप्यमसाध्यं युगपद्गत"मित्युक्ते प्रतिकारानर्हे रोगभेदे, असाधनीये, दुर्द्दमे शत्रौ च।

असाम्प्रतम् अव्य० न साम्प्रतम् युक्तं न०त०। अयुक्ते।

असार पु० नास्ति सारो यस्य। सारहीने एरण्डवृक्षे। न० त०। सारभिन्ने। न०ब०। निस्सारे त्रि०। "असारः खलु

संसार'' इत्युद्भटः। [प्रतिरूपकम् अव्य०।

असि पु० अस-दीप्तौ क्षेपणे वा इन्। खड्गे। त्वमित्यर्थे विभक्ति

असिक्नी स्त्री० सो-क्त सिता केशादौ शुभ्रा जरती तद्भिन्ना अवृद्धा क्नादेशः ङीप् च। अन्तःपुरचारिण्यामवृद्धायां प्रेष्यायाम्, नदीभेदे च। [यत्र। क्षुद्रोपधाने।

असिगण्ड पु० अस्यते क्षिप्यते अस-इन् असिः क्षिप्तोगण्डो

असित पु० सितः शुभ्रः विरोधे न०त०। शुभ्रवर्णभिन्ने तद्विरुद्धे कृष्णवर्णे। तद्वति त्रि०। कृष्णपक्षे पु०। नीलोषधौ, अन्तःपुरचारिण्यामवृद्धायां प्रेष्यायाञ्च स्त्री० टाप्।

असितकार्च्चिस् पु० असितयति णिच्-ण्वुल् सा अर्च्चिः शिखा यस्य। वह्नौ तच्छिखासम्बन्धेन हि सर्व्वेषामसितत्वम्।

असितफल पु० असितं कृष्णं फलं यस्य। मधुनारिकेले।

असिदंष्ट्र पु० असिरिव तीक्ष्णा दंष्ट्रा यस्य। मकराख्ये यादसि

असिद्ध त्रि० सिद्धोनिष्पन्नः पक्वश्च न०त०। अपक्वे, अनिष्पन्ने च न्यायमते आश्रयासिद्धत्वादिभिस्त्रिभिर्दोषैर्दुष्टे हेतौ पु०।

असिद्धि स्त्री० सिध-क्तिन् न०त०। अनिष्पत्तौ, अपाके, न्यायमते आश्रयासिद्धिप्रभृतित्रिविधहेतुदोषे च।

असिधाव पु० असिं खड्गं धावति मार्ज्जयति धाव-अण्। शस्त्राणां मार्ज्जनकरे। ण्वुल्। असिधावकोऽप्यत्र।

असिधेनुका स्त्री० असिर्धेनुरिव यस्याः ब० वा कप्। असेर्धेनुतुल्यत्वेन तद्वत्सतुल्यायाम् छुरिकायाम्।

असिपत्र(क) पु० असिरिव तीक्ष्णं पत्रमस्य वा कप्। इक्षुवृक्षे गुण्डनामकतृणे च। असिरेव पत्राकारो यत्र। नरकभेदे। असेः पत्रमिवाच्छादकम्। खड्गकोषे न०।

असिपत्रवन न० असिरेव पत्राकारो यस्य कर्म्म०। नरकभेदे "यस्त्विह वै निजवेदपथादनापदि अपगतः पाषण्डञ्चोपगतस्तमसिपत्रवनं प्रवेश्येति भागवतम्। [जन्तुभेदे।

असिपुच्छ पु० असिरिव धारायुक्तः पुच्छोऽस्य। शिशुमारे जल

असिपुत्रिका स्त्री० असेः पुत्रीव स्वार्थे कन् ह्रस्वे अत इत्त्वम्। छुरिकायाम्। कनभावे असिपुत्रीत्यप्यत्र।

असिमेदा पु० असिरिव तीक्ष्णः मेदो निर्यासो यस्य। विट्खदिरे

असिहेति पु० असिर्हेतिः साधनमस्य। खड्गेन युद्धकर्त्तरि।

असु पु० अस्यते क्षिप्यते अस-उ। चित्ते। कर्त्तरि उ। तापे। करणे उ। पञ्चवृत्तिषु वायुभेदेषु पु० बहु०। [त्रि०

असुख न० विरोधे न०त०। सुखविरोधिनि दुःखे। न०ब०। तद्वति

असुधारण न० असूनां प्राणादिपञ्चवायुवृत्तीनां धारणम्। जीवने। [उर। सुरविरोधिनि दैत्ये। रात्रौ स्त्री०।

असुर पु० अस-दीप्तौ उर। सूर्य्ये। अस्यति क्षिपति देवान्

असुररिपु पु० असुराणां रिपुः। दानवशत्रौ विष्णौ।

असुरसा स्त्री० न सुष्ठु रसो यस्याः ५ब०। (वाबुइतुलसी) वर्व्वरीवृक्षे तस्या अतिसुरसत्वात्।

असूयक त्रि० असूञ् कण्ड्वादि यक्-वुञ्। गुणेषु दोषारोपणशीले। [रोपणे।

असूया स्त्री० असूञ्-यकि अ, स्त्रीत्वात् टाप्। गुणेषु दोषा-

असूर्च्च(र्च)**ण** न० सुर्च्च-ल्युट् रे परे दीर्घः नास्ति सूर्च्चणमनादरो यस्मात् न०५ब०। पाठान्तरे असूनासुच्चणं तापो यस्मात् अनादरे। [न्तगुप्ते सूर्य्यादर्शिनि राजदारादौ।

असूर्य्यम्पश्य त्रि० सूर्य्यमपि न पश्यति दृश-खश् मुम् च। अत्य-

असृक्कर पु० असृजं शोणितं करोति कृ-ट। शरीरस्थे रसधातौ, अन्नादेरशितस्य प्रथमं रसरूपता, रसस्य रक्तरूपतेति वैद्यके प्रसिद्धम्। [त्वचि।

असृग्धरा स्त्री० असृजं धरति धृ-अच्। शोणितधारिण्यां

असृज् न० न सृज्यते इतररागवत् संसृज्यते सहजत्वात् न+सृज् क्विन्, अस्यते क्षिप्यते इतस्ततो नाडीभिः अस सृजि वा। रक्ते, कुङ्कुमे, विष्कुम्भावधिके षोडशे योगे।

असेचनक त्रि० न सिच्यते तृप्यते मनोऽत्र सिच-ल्युट् संज्ञायां कन्। अत्यन्तप्रियदर्शने यद्दर्शनान्मनो न तृप्यति।

अस्त पु० अस्यन्ते सूर्य्यकिरणा यत्र आधारे क्त। पश्चिमाचले, कर्म्मणि क्त। क्षिप्ते अवसिते च त्रि०। स्तत्यौ ज्योतिषोक्ते लग्नात् सप्तमे स्थाने च न०। भावे क्त। अवसाने क्षेपे च न०। [निर्वाणमोक्षे।

अस्तक पु० अस्तं अपुनरावृत्तिम् अवसानं वा करोति कृ-ड।

अस्तम् अव्य० अस-तमि। नाशे, अदर्शने च।

अस्तमन न० मननं मनःज्ञानं अस्तत्वेन मनोज्ञानं यत्र। सूर्य्यादेरदर्शनसाधने भूगोलकक्षया तिरोधाने, "तिरोधानञ्च यत्रैति तदेवास्तमनं रवेः। नैवास्तमनमर्कस्य नोदयः सर्व्वदासतः इति ज्योतिषोक्तेः तत्काले च।

अस्तमय पु० अस्तोमीयते ज्ञायते यत्र मिन्-अच्। प्रलयादौ, सूर्य्यस्यातिप्रत्यासत्त्या प्रकाशाभावेनान्यग्रहाणामस्तत्वं वियोगे चोदयः "रविणास्तमयोयोगो वियोगस्तूदयो भवेदित्युक्तेः अन्यग्रहाणां रवियोगे च। [माचले अस्तगिरौ।

अस्ताचल पु० अस्यन्ते किरणा यत्र आधारे क्त कर्म्म०। पश्चि-

अस्ति अव्य० अस्-श्तिप्। स्थितौ, विद्यमानतायाञ्च "अस्ति नास्ति न जानातीत्या"दि।

अस्तु अव्य० अस् दीप्तौ तुन्। अनुज्ञायां, पीडायाम् प्रतिक्षेपे असूयायाम्, प्रकर्षे, अङ्गीकारे, प्रशंसायाम्, लक्षणे, असूया-

पूर्व्वकाङ्गीकारे च । [संहतस्तङ्गिन्ने त्रि० ।

अस्त्यान न०स्त्यै क्त न०त०। निन्दायाम्, भर्त्सने च । स्त्यानः

अस्त्र न०अस्यते क्षिप्यते अस-ष्ट्रन् । क्षेप्यास्त्रे शरादौ । करणे ष्ट्रन् । चापे, रिपुक्षेपणसाधने प्रहरणमात्रे खड्गादावपि ।

अस्त्रकण्टक पु० अस्त्रं कण्टकइव । वाणे तस्याग्रस्य कण्टकाकारत्वात् । [कित्-ण्वुल् ६त०। अस्त्रव्रणरोगचिकित्सके ।

अस्त्रचिकित्सक पु० अस्त्रस्य अस्त्रजन्यव्रणस्य चिकित्सकः

अस्त्रिन् त्रि०अस्त्रं धनुरस्यास्ति इनि । धनुर्द्धरे,अस्त्रधारिमात्रे च

अस्थान न० न स्थानं तलस्पर्शो यस्य । अगाधे, मन्दस्थले, अनधिकारिणि च । [स्थाते धातुभेदे ।

अस्थि न० अस्यते अस+क्थिन् । मांसाभ्यन्तरस्थे हाड़ इति

अस्थिकृत् पु० अस्थि-कृ-क्विप् । अस्थिकारके मेदधातौ ।

अस्थिज पु० अस्थ्नो जायते जन-ड । अस्थिपरिपाकाज्जाते तदन्तःस्थे मज्जधातौ । [शिवे ।

अस्थिधन्वन् पु०अस्थि अस्थिमयं धनुरस्य ब० अनङ् समा०।

अस्थिपञ्जर पु० अस्थि पञ्जर इव । शरीरस्यास्थिसञ्चये पिञ्जराकारे कङ्काले । [कुक्कुरे च ।

अस्थिभक्ष पु०अस्थि भक्षयति भक्ष-अण् । (हाड़गिला) पक्षिणि,

अस्थिमालिन् पु० अस्थिमयी मालाऽस्त्यस्य इनि । शिवे ।

अस्थिर त्रि० न०त० । स्थिरभिन्ने चञ्चले ।

अस्थिविग्रह पु० अत्यन्तकृशत्वात् अस्थिसारो विग्रहो देहोऽस्य । शिवानुचरे भृङ्गरीटे । [ग्रन्थिमति वृक्षे ।

अस्थिशृङ्खला स्त्री० अस्थ्नां शृङ्खलेव योजनहेतुः। (हाड़जोड़ा)

अस्थिसंहार पु०अस्थीनि संहरति योजयति सम्+हृ-अण् । (हाड़जोड़ा) ग्रन्थिमति वृक्षे ।

अस्थिसार पु० अस्थ्नः सारः रसपरिणामः । अस्थिजाते मज्जधातौ। अस्थ्येव सारो यस्य । रक्तमांसशून्ये त्रि० ।

अस्नाविर त्रि० नास्ति स्नावा शिरा यस्य इरच् । शिरावर्ज्जिते, स्थूलशरीरशून्ये च ।

अस्निग्धदारु न० अस्निग्धं रूक्षं दारु कर्म्म० । देवदारुभेदे

अस्मद् त्रि० अस-मदिक् । अहंप्रत्ययावलम्बनत्वेन वेद्ये प्रत्यगात्मनि, देहाभिमानिनि जीवे च ।

अस्मि अव्य०अस्-मिन् । अहमर्थे,"त्वामस्मि वच्मि विदुषा"मिति साहित्यदर्पणे । [पुरुषयोरभेदाभिमाने मोहे ।

अस्मिता स्त्री० अस्मि इत्यस्य भावः तल् । सांख्यसिद्धे प्रधान-

अस्रखदिर पु० अस्रवर्णः रक्तवर्णः खदिरः । विट्खदिरे ।

अस्रज् न० अस्रात् रुधिरात् रसपाकेन जायते । मांसे ।

अस्रपत्रक पु० अस्रमिव रक्तं पत्रमस्य संज्ञायाम् कन् । रक्तशाके भिण्डावृक्षे । [पा-क । राक्षसे पु० ।

अस्रपा पु० अस्रं पिबति पा-क्विप् । (जोंक) जलौकसि ।

अस्रफला स्त्री० अस्रमिव लोहितं फलमस्याः । सल्लकीवृक्षे ।

अस्रविन्दुच्छदा स्त्री०अस्रविन्दुः रुधिरविन्दुरिव छदो दलं यस्याः । लक्ष्मणानामके वृक्षे ।

अस्रमातृका स्त्री० अस्रस्य रुधिरस्य मातेव पोषिका संज्ञायां कन् । अशितान्नादेः रसरूपे देहस्थे प्रथमे धातौ ।

अस्ररोधिनी स्त्री० अस्रं क्षतजमाशु रुणद्धि रुध-णिनि । लज्जालुलतायाम् । [श्वेततुलसीवृक्षे ।

अस्रार्ज्जक पु० अस्रं रुधिरं सेवनेनार्ज्जयति अर्ज्ज-ण्वुल् ।

अस्वच्छन्द त्रि०नास्ति स्वस्य छन्द आयत्तता यस्य । पराधीने

अस्वतन्त्र त्रि० न स्वस्य तन्त्रः अधीनः । पराधीने ।

अस्वन्त न० असूनाम् अन्तो यस्मात् ५ब०। चूल्ल्यां तदग्नितापाद्धि प्राणक्षयः । अशुभे च । ६त० । मरणे पु० ।

अस्वप्न पु० नास्ति स्वप्नोनिद्रा यस्य । देवे । निद्रातरहिते त्रि०।

अस्वर्ग्य त्रि०स्वर्गाय हितं न भवति । स्वर्गहेतुधर्म्मविरोधिनि निषिद्धाचरणादौ । [गोक्षुरवृक्षे अतिकषाये ।

अस्वादुकण्टक पु० अस्वादुरमधुरः कण्टको यस्य । (गोखुरी)

अस्वाध्याय त्रि० न स्वाध्यायो वेदाध्ययनमस्य । वेदाध्ययनहीने "अस्वाध्यायं वषट्कारमि"ति स्मृतिः । न स्वाध्यायो यस्मिन् । अध्ययननिषिद्धकाले अष्टम्यादौ । अधीयते अधि+इङ्-घञ् अध्यायः स्वस्य स्ववर्णानुसारेण अध्यायः स्वाध्यायः"स्वाध्यायोऽध्येतव्य"इति श्रुतिः न०त०। स्वाध्यायभिन्ने

अस्वामिक त्रि० न स्वामी यस्य । स्वामिरहिते "अटव्यः पर्व्वताः पुण्या नद्यस्तीर्थानि यानि च । सर्व्वाण्यस्वामिकान्याहु र्न हि तेषु परिग्रह" इति स्मृतिः ।

अस्वैरिन् पु० स्वैरी स्वाधीनः न०त० । परतन्त्रे ।

अह गतौ आत्म० भ्वा०सक० सेट् । अहते आहिष्ट । [त ।

अंह दीप्तौ चुरा० इदित् उभ०अक०सेट् । अंहयति ते आञ्जिहत्

अह अव्य०अह-अच् । प्रशंसायां, क्षेपे, वियोगे, निग्रहे, आचारातिशये, अर्च्चने च । [गर्व्वयुक्ते ।

अहंयु त्रि० अहम् अहङ्कारोऽस्त्यस्य अहम्+यु अनादेशः ।

अहङ्कार पु० अहमिति कारो यस्मात् कृ-अपादाने घञ् । गर्व्वे "अहङ्कारश्च सर्व्वेषां पापवीजममङ्गलम् ब्रह्माण्डेषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नति"रिति पुराणात् गर्व्वेणौन्नत्यम् ।

अहङ्कृत त्रि० अहमिति कृतं येन । सगर्व्वे ।

अहत न० हन-क्त न०त० । "ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्विजानीयात् पावनं सर्व्वकर्म्मसु"स्मृ-

कालवाचके वत्से । हतभिन्ने त्रि० । [न+हा कनिन् । दिवसे ।

अहन् न० न जहाति सर्वथा परिवर्त्तमानत्वात् न त्यजति ।

अहम् अह-अम । अहङ्कारार्थे, स्वात्मसम्बन्धितयाऽभिमाने च।

अहमहमिका स्त्री० अहमहंशब्दोऽस्त्यत्र वीप्सायां द्वित्वम् ठक् न ठिलोपः । परस्पराहङ्कारे अहमेवाग्रगण्य इत्येवं रूपायामन्योन्योक्तौ च ।

अहंपूर्व्विका स्त्री० अहं पूर्व्वोऽहं पूर्व्व इत्यभिधानं यत्र । योधानां युयुत्साधिक्येन अहमेव पूर्व्वं यास्यामीत्यध्यवसाये ।

अहम्मति स्त्री० अहमित्याकारा मतिः ज्ञानं मन+क्तिन् । अविद्यायाम् अन्यस्मिन्नन्यधर्म्मावभासके अज्ञाने ।

अहर्गण पु० अह्नां गणः समूहः । त्रिंशदहिनात्मके मासे । ज्योतिषप्रसिद्धे ग्रहाणां स्पष्टतासाधनार्थमा सृष्टेः वर्त्तमान-दिनपर्य्यन्ते दिनसमूहे च ।

अहर्दिव न० अहनि च दिवा च नि० । प्रतिदिने ।

अहर्पति पु० अह्नां पतिः । सूर्य्ये, अहर्नाथादयोऽप्यत्र ।

अहर्मुख पु० अह्नोमुखमादिभागः । प्रत्यूषे । [स्त्री० ।

अहल्य त्रि० हलेन न कृष्टं । हलाकृष्टे क्षेत्रे । गौतमर्षिपत्न्यां

अहस्कार पु० अहः करोति कृ-ट कस्कादित्वात् सत्वम् । दिवाकरे सूर्य्ये, अर्कवृक्षे च । [सूर्य्ये, अर्कवृक्षे च ।

अहस्पति पु० अह्नः पतिः ६त० कस्कादित्वात् सत्वम् ।

अहह अव्य० अहं जहाति अहम्+हा-क पृषो० । सम्बोधने आश्चर्य्ये, खेदे, क्लेशे, प्रकर्षे च । [च त्रि० ।

अहार्य्य पु० हृ-ण्यत् न०त० । पर्व्वते । हर्त्तुमशक्ये, अभेद्ये

अहि पु० आहन्ति आ+हन+डिन् टिलोपः आङो ह्रस्वश्च । सर्पे, वृत्रासुरे, सूर्य्ये, धातुभेदे सीसके, राहौ, पथिके, खले, वप्रे, सर्पस्वामिके अश्लेषानक्षत्रे च ।

अहिंसा स्त्री० हिन्स-अ न०त० । वाङ्मनःकायैः पर-पीड़ाभावे, प्राणिपीडानिवृत्तौ, अशास्त्रीयप्राणिपीडनाभावे च "अहिंसा परमो धर्म्मः" इति स्मृतिः ।

अहिका स्त्री० अहिरिव कायति प्रकाशते दुराक्रमत्वात् । शाल्मलिवृक्षे । [नगरीभेदे स्त्री० ।

अहिच्छत्र पु० अहेः फणाकारः छत्रमाच्छादकः । मेषशृङ्गीवृक्षे,

अहिजित् पु० अहिं सर्पं वृत्रासुरं वा जितवान् जि-क्विप् तुक् च । विष्णौ, इन्द्रे च । [जिह्वाख्यलतायाम् ।

अहिजिह्वा स्त्री० अहेर्जिह्वेव तदाकारशिखत्वात् । नाग-

अहित पु० । न०त० । शत्रौ । पथ्यभिन्ने त्रि० ।

अहितुण्डिक पु० अहेस्तुण्डं मुखं तेन दीव्यति ठञ् । व्याल-ग्राहिणि, सर्पखेलके च ।

अहिद्विष् पु० अहिं सर्पं वृत्रासुरं वा द्विष्टवान् द्विष-भूते क्विप् । गरुड़े, इन्द्रे, मयूरे, नकुले, विष्णौ च ।

अहिनिर्लयणी स्त्री० अहिर्निर्लीयतेऽस्याम् निर्+ली-ल्युट् । (खोलस) इति ख्याते सर्पनिर्म्मोके ।

अहिपुत्रक पु० अहेः पुत्रः क्षुद्रसर्प इव कायति प्रकाशते कै-क । क्षुद्रसर्पाकारे नौकाविशेषे ।

अहिफेन पु० अहेः फेनः गरलमिव तीक्ष्णगुणत्वात् । आफिङ् इति ख्याते वृक्षभेदे । [उत्तरभाद्रपदनक्षत्रे च ।

अहिबुध्न पु० अहेरिव बुध्नो ग्रीवा यस्य । रुद्रभेदे, तद्देवताके

अहिभय न० अहेः, स्वहस्तत्वात् आवृताकारत्वाच्च अहि-तुल्यात् स्वपक्षाच्च भयं भी-अच् । सर्पभये राज्ञां स्वपक्ष-जनिते भये च । [भयनाशिकायाम् भूम्यामलक्याम् ।

अहिभयदा स्त्री० अहिभयं द्यति खण्डयति दो-क । सर्प

अहिभुज् पु० अहिं भुङ्क्ते क्विप् । गरुड़े, मयूरे, नकुले च ।

अहिमर्द्दनी स्त्री० अहिर्मर्द्द्यतेऽनया मृद-ल्युट् । गन्धना-कुलीनामलतायाम् ।

अहिमार पु० अहिं मारयति मृ-णिच्-अण् । अरिमेदकवृक्षे।

अहिमेदक पु० अहिं मेदयति स्पर्शमात्रेण गलयति मारयति मिद-णिच्-ण्वुल् । अरिमेदकवृक्षे । [ताम्बूल्याम् ।

अहिलता स्त्री० अहिलोकस्य पातालस्य लता शाक०त० ।

अहीरणि पु० अहीन् ईरयति दूरीकरोति ईर-अनि । द्वि-मुखसर्पे तद्दर्शनाद्भीतरे सर्पाः पलायन्ते । [वेदपाठे ।

अहुत पु० नास्ति हुतं हवनं यत्र । धर्म्मसाधनत्वेऽपि अहोमे

अहे अव्य-अह-ए । क्षेपे, नियोगे च ।

अहेरु पु० न हिनोति हि-रु न०त० । शतमूल्याम् ।

अहैतुक त्रि० हेतुं प्रयोजनमुद्दिश्य कृतं हैतुकं न०त० । फलाभिसन्धानरहिते, कापट्यरहिते च ।

अहो अव्य० न+हा-डो । शोके, धिगर्थे, विषादे, दयायां, सम्बोधने, विस्मये, प्रशंसायाम्, वितर्के, असूयायाञ्च ।

अहोरात्र पु० अहश्च रात्रिश्च टच् समा० । सूर्य्योदयद्वय-मध्यवर्त्तिकाले षष्टिदण्डात्मके मानुषे दिने पैत्रादिमानन्तु वृहदभिधाने । [अनुकम्पायाञ्च ।

अहोवत अव्य० अहो च वत च द्व० । खेदे, सम्बोधने,

अह्नाय अव्य० ह्नु-घञ् वृद्धिः पृषो० वस्य यत्वं न०त० । शीघ्रे ।

आ

आ अव्य० आप् क्विप् पृषो० पलोपः । वाक्ये (वाक्यसाकाङ्क्ष्य-त्वद्योतने) पूर्व्वं मैवं मंस्था इदानीमेवमिति प्रतिपादनपरे

स्मृतौ (आ एवं मन्यसे इति स्मृतस्यान्यथापादने) अनुकम्पायाम्। समुच्चये, अङ्गीकारे, ईषदर्थे क्रियायोगे, सीमायां व्याप्तौ च। वाक्यस्मृतिभिन्ने ऽस्य ङित्त्वमिच्छन्ति

आकम्पित त्रि॰ आ+कपि-चलने क्त। कम्पयुक्ते,ईषत्कम्पिते च

आकर पु॰ आकुर्व्वन्त्यत्र कुर्व्वन्ति व्यवहारमत्र वा कृ-अच्। समूहे, श्रेष्ठे च। आकीर्य्यन्ते धातवोऽत्र कॄ-अप्। रत्नाद्युत्पत्तिस्थाने। [आकरे करग्रहणार्थं नियुक्ते।

आकरिक त्रि॰ आकरे रत्नाद्युत्पत्तिस्थाने नियुक्तः ठक्।

आकर्ष पु॰ आकृष्यते विषयान्तरतोऽनेन आ+कृष-घञ्। पाशके, शारिफलके, द्यूते,इन्द्रिये धन्विनो धनुरभ्यासे च। भावे घञि। आकर्षणे। आधारे घञि। निकषे उपले। खलादिगतं धान्यमाकृष्यतेऽनेन करणे घञि। अङ्कुशाकारे आकुड़ा इति ख्याते काष्ठभेदे।

आकर्षिक पु॰ आकर्षति सन्निकर्षस्थं लौहं आ+कृष-ण्वुल्। (चुम्बक) इति ख्याते अयस्कान्ते। आकर्षणकर्त्तरि त्रि॰।

आकर्षणी स्त्री॰ आकृष्यतेऽनया आ+कृष-ल्युट् टित्त्वात् ङीप्। उच्चस्थपुष्पाद्याहरणार्थे (आङ्शी) यष्टिकाभेदे।

आकलन न॰आ+कल-ल्युट्। आकाङ्क्षायाम् गणनेऽनुसन्धाने च

आकल्प पु॰ आ+कृप णिच्-घञ्। वेशरचनायाम्, भूषणे च कल्पपर्य्यन्ते अव्य॰। आकल्पं नरकं भुङ्क्ते इति स्मृतिः।

आकल्पक पु॰ आकल्पयति अन्यस्यान्यथात्वं कल्पयति आ+कृप-णिच्-ण्वुल्। अज्ञाने, औत्सुक्ये, हर्षे च।

आकष पु॰ आकष्यते यत्र कष-अच्। स्वर्णादिकषणसाधने (कोष्ठि) प्रस्तरभेदे। [भवार्थे ठक्। अकस्माद्भवे।

आकस्मिक त्रि॰ अकस्मात् कारणसम्पत्तिं विनापि भवति

आकाङ्क्षा स्त्री॰ आ+काङ्क्ष-अङ्। अभिलाषे, न्यायमते वाक्यार्थज्ञानहेतौ यत्पदं विना यत्पदस्यानन्वयस्तत्पदे तत्पदवत्त्वरूपे, संबन्धे च।

आकाय पु॰ आचीयते यस्मिन् आ+चि यत् नि॰। निवासे।

आकार पु॰ आ+कृ-घञ्। मूर्त्तौ, अवयवसंस्थानविशेषे च। आकार्य्यते आविष्कार्य्यते हृद्गतोभावोऽनेन आ-कृ-णिच् करणे घञ्। हृद्गतभावावेदके मुखप्रसादवैवर्ण्यरूपे प्रीत्यप्रीतिसूचके देहचेष्टने। भावे घञ्। हृद्गते भावे, इङ्गिते च

आकारगुप्ति स्त्री॰ गुप-क्तिन् आकारस्य हृद्गतभावस्य गुप्तिर्गोपनम्। रत्यादिजनितसुखप्रसादस्य भयजनितविषादादेश्च गोपने। [आह्वाने। युचि स्त्रीत्वात् टाप्।

आकारण न॰ स्त्री॰ आ+कृ-णिच् ल्युट्, युच् वा।

आकालिक त्रि॰ अकाले भवं ठञ्। असमयोत्पन्ने वस्तुनि। स्त्रियां ङीप् 'आालिकीं वीक्ष्य मधुप्रवृत्ति'मिति कुमारः। समानकालौ आद्यन्तौ यस्य समानकालस्य अकलादेशः इकञ् च् नि॰। आशुविनाशिनि, आद्यन्तयोरभावात्, पूर्व्वदिवसे यत्समये उत्पत्तिः परेद्युस्तत्समये एव नश्वरे, "आकालिकमनध्यायमेतेष्विति" मनुः आशुविनाशित्वात् विद्युति स्त्री॰।

आकाश पु॰न॰ समन्तात् काश्यते आ+काश-अच्। गगने।

आकाशदीप पु॰आकाशे दीयमानो दीपः शा॰क॰। "तुलायां तिलतैलेन सायं सन्ध्यासमागमे। आकाशदीपं यो दद्यादित्युक्तलक्षणे दीपभेदे। [(पाना) कुम्भिकायाम्।

आकाशमूली स्त्री॰ आकाशे भूमिस्पृन्यदेशे मूलमस्याः।

आकाशरक्षिन् पु॰ आकाशे अत्युच्चप्राचीरोपरिस्थितः सन् रक्षति। दुर्गवहिःप्राचीरोपरिस्थिते रक्षके।

आकाशवल्ली स्त्री॰आकाशस्य वल्ली शाखेव अत्युच्चशिखत्वात्। अमरवेल इति ख्यातायां लतायाम्।

आकाशवाणी स्त्री॰ आकाशे भवा वाणी। अदृश्योत्पादकपुरुषत्वेनाकाशादिवोत्पन्नायां वाचि।

आकीर्ण त्रि॰आ+कॄ-क्त। व्याप्ते, विक्षिप्ते च। [सम्पादने च

आकुञ्चन न॰ आ+कुचि-ल्युट्। सङ्कोचे, प्रसारितस्य संक्षिप्तत्व

आकुञ्चित त्रि॰ आ+कुचि-क्त। आभुग्ने सङ्कोचिते च।

आकुल त्रि॰ आ+कुल-क। व्याकुले। [अत्यन्ताकुले च।

आकुलाकुल त्रि॰ आकुल+प्रकारे द्वित्वम्। आकुलप्रकारे,

आकूत न॰ आ+कू भावे क्त। आशये अभिप्राये। [कूमे च।

आकृति स्त्री॰ आ+कृ-क्तिन्। आकारे,अवयवसंस्थाने,जातौ,

आकृतिच्छत्रा स्त्री॰ छादयति छद-णिच् कर्त्तरि ष्ट्रन् ह्रस्वः इत॰। (घोषा) घोषातकीलतायाम्।

आकेकरा स्त्री॰ "दृष्टिराकेकरा किञ्चित्स्फुटापाङ्गे प्रसारिता। मीलितार्द्धा पुरालोके ताराव्यावर्त्तनोत्तरे"त्युक्तलक्षणे दृष्टिभेदे पारिभाषिकम्।

आक्रन्द पु॰आ+क्रन्द-घञ्। सारावे रोदने, आह्वाने, शब्दे च। कर्म्मणि घञ्। मित्रे, भ्रातरि च। आधारे घञ्। दारुणे युद्धे, दुःखिनां रोदनस्थाने च। आक्रन्दयति अच्। स्वदेशाक्रमणमाचरतः पार्ष्णिग्राहस्य प्रयोजके तत्परवर्त्तिनि नृपे। [आक्रमणमप्यत्र न॰।

आक्रम पु॰आ+क्रम-घञ् अवृद्धिः। बलेनातिक्रमणे। ल्युट्।

आक्रान्त त्रि॰ आ+क्रम-क्त। कृताक्रमणे अभिभूते व्याप्ते च।

आक्रीड पु॰आक्रीडत्यत्र क्रीड-घञ्। क्रीड़ास्थाने उद्यानादौ

आक्रोश पु॰ आ+क्रुश-घञ्। विरुद्धचिन्तने,शापे,निन्दायाञ्च

ल्युट् आक्रोशनमप्यत्र न० । [पाशक्रीड़या जाते वैरे ।

आक्षद्यूतिक न० अक्षद्यूतेन पाशक्रीड़या निर्वृत्तम् ठक् ।

आक्षपाटिक पु० अक्षपटे क्रीडास्थाने व्यवहारस्थाने वा नियुक्तः ठक् । अक्षदर्शके, व्यवहाराध्यक्षे प्राड्विवेके च ।

आक्षार पु० आ+क्षर-णिच्-घञ् । अगम्यागमनं कृतं त्वयेति पुरुषं प्रति, अगम्यगमनं त्वया कृतमिति स्त्रियं च प्रतिदूषणे । ल्युट् आक्षारणमप्यत्र न०। युच् टाप् । अत्रार्थे ।

आक्षारित त्रि० आ+क्षर-णिच्-क्त । आक्षारोमैथुनविषयापवादस्तेन दूषिते ।

आक्षिक पु० अक्षमिन्द्रियं व्याप्नोति तर्पकत्वात् । रञ्जकवृक्षे ।

आक्षीव पु० आ+क्षीव-णिच्-अच् । शोभाञ्जनवृक्षे । आ+क्षीव-क्त नि० । मत्ते ।

आक्षेप पु० आ+क्षिप-घञ् । भर्त्सने, अपवादे, आकर्षणे, धनादिन्यासरूपे निक्षेपे" अर्थालङ्कारभेदे च सा०१०द० ।

आक्षेपक त्रि० आ+क्षिप-ण्वुल् । निन्दाकारके । "यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः । तदा क्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः । मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृत, इत्युक्तलक्षणे वातरोगभेदे च ।

आक्षोड़ पु० अक्ष-ओड़ स्वार्थे अण् । शैलपीलुवृक्षे आखरोट इति ख्याते । ओट । आक्षोटोऽप्यत्र । [नोऽप्यत्र ।

आख पु० आखनत्यनेन आ+खन-ड । खनित्रे । व । काख-

आखण्डल पु० आखण्डयति भेदयति पर्व्वतान् आ+खडि-डलच् । इन्द्रे । [मूषिके च । खननकर्त्तरि त्रि०।

आखनिक पु० आ+खन-कर्त्तरि इकन् । चौरे, सूकरे,

आखनिकवक पु० आ+खन-करणे इकवक । खनित्रे । डर । आखरोऽप्यत्र ।

आखु पु० आ+खन-डु । मूषिके, चौरे, सूकरे च । कर्म्मणि डु । देवताडवृक्षे । "विभवे सति नैवात्ति न ददाति जुहोति न । तमाहुराखु"मित्युक्तलक्षणे कृपणे च ।

आखुकर्णी स्त्री० आखोः मूषिकस्य कर्ण इव पर्णमस्याः । (उन्दुरकाणी) मूषिककर्णतुल्यपर्णवल्यां लतायाम् । [गणेशे ।

आखुग पु० आखुना मूषिकेण गच्छति । गम-ड । मूषिकवाहने

आखुपर्णिका स्त्री० आखोः कर्ण इव पर्णमस्याः ङीप् स्वार्थे कन् अतइत्त्वम् । (उन्दुरकाणी) इति ख्यातायां लतायाम् ।

आखुभुज् पु० आखुं भुङ्क्ते भुज-क्विप् । मूषिकभक्षके विड़ाले

आखुविषहा स्त्री० आखुविषं मूषिकविषं हन्ति हन-ड । मूषिकविषहरे देवताडवृक्षे, देवतालीलतायाञ्च ।

आखेट पु० आखिद्यन्ते त्रास्यन्ते प्राणिनोऽत्र आ+खिट-घञ् । प्राणित्रासदायां मृगयायाम् । स्वार्थे कन् आखेटकोऽप्यत्र ।

आखेटिक पु० आखेटे कुशलः ठक् । मृगयाकुशले कुक्कुरे ।

आखोट पु० आखः खनित्रमिव उटानि पर्णान्यस्य । आखरोट इति ख्याते शैलपीलौ । [च । भावे अङ् । कथने ।

आख्या स्त्री० आख्यायतेऽनया आ+ख्या-अङ् । संज्ञायां,नाम्नि

आख्यात त्रि० आ+ख्या-क्त । कथिते, व्याख्याते, व्याकरणप्रसिद्धे तिङन्ते पदे च "क्रियाप्रधानमाख्यातमि"ति यास्कः ।

आख्यातृ त्रि० आ+ख्या-तृच् । कथनकर्त्तरि । पाठयितरि "आख्यातोपयोगे" इति पाणिनिः ।

आख्यान न० आ+ख्या+ल्युट् । प्रसिद्धेतिवृत्तकथने यथा अमृतमन्थनाद्युपाख्यानम् ।

आख्यायिका स्त्री० आ+ख्या-ण्वुल् कापि अतइत्त्वम् । विदितवृत्तान्तार्थायां कथायाम्,गद्यपद्यप्रबन्धे च । कथके त्रि०।

आगत त्रि० आ+गम-क्त । आयाते, उपस्थिते, प्राप्ते च । भावे क्त । आगमने न० ।

आगन्तु त्रि० आ+गम-तुन् । अनियतस्थायिनि अतिथौ, आगमनशीले च । स्वार्थे कन् । आगन्तुकोऽप्यत्र ।

आगम न० "आगतं शिववक्त्रेभ्यो गतञ्च गिरिजाश्रुतौ । मतञ्च वासुदेवस्य तस्मादागमसुच्यते" इत्युक्तलक्षणे "सृष्टिश्च प्रलयश्चैव देवानां च तथार्च्चनम् । साधनञ्चैव सर्व्वेषां पुरश्चरणमेवच । षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदोविदुरित्युक्तलक्षणे च तन्त्रशास्त्रे। "सिद्धं सिद्धैः प्रमाणैस्तु हितं चात्र परत्र च । आगमं शास्त्रमाप्तानामित्युक्तलक्षणे शास्त्रमात्रे च । भावे घञ् अवृद्धिः उपदेशे आगतौ च पु०। आगम्यते ज्ञायतेऽनेन करणे घञ्। व्यवहारे सन्दिग्धार्थसाधके पत्रलेख्यादौ । आगच्छति प्रकृतिप्रत्ययानुपघातेन प्राप्नोति अच् । व्याकरणप्रसिद्धे प्रकृतिप्रत्ययानुपघातेन तन्मध्ये आगन्तरि इडादौ।

आगस् न० आ+इण-असुन् इणः गादेशः । अपराधे, पापे च ।

आगामिन् त्रि० आ+गम-णिनि । आगन्तुके, प्रवासिनि । भविष्यति काले, तद्वृत्तौ च । [वृ-अण् वा । गृहे ।

आगार न० आ+गृ-कर्म्मणि घञ्, आगच्छति आग+आ+

आगू स्त्री० आ+गम-क्विप् मलोपे ऊकारादेशः । इदं कर्त्तव्यमेवेत्यङ्गीकारे प्रतिज्ञायाम् च ।

आग्नीध्र न० अग्निमिन्धे क्विप् नलोपः अग्नीध् होता ततः स्थानार्थे रण् । होतुर्गृहे, मनुवंश्ये नृपभेदे च ।

आग्नेय न० अग्निर्देवतास्य अण् । स्वर्णे, घृते च । इदमर्थेऽणि । रक्तवर्णे । "अग्निनोक्तं पुराणं यदाग्नेयं वेदसम्मित"मित्यु-

तलक्षणे महापुराणभेदे वह्निपुराणे च । अग्निदेवताके द्रव्यमात्रे त्रि० । दक्षिणपूर्व्वदिशि, अग्नियोषिति स्वाहायाम् अग्निदेवताकायामृचि च स्त्री० ङीप् ।

आग्रयण न० अग्रहायणे नवशस्ये विहितं पृषो० हालोपः । नवशस्यनिमित्त के इष्टिरूपे यज्ञे ।

आग्रहायणिक पु० आग्रहायणी पौर्णमासी यस्मिन् मासे ठक् । चान्द्रे मार्गशीर्षमासि । अण् । आग्रहायणोऽप्यत्र ।

आग्रहायणी स्त्री० अग्रहायण्या मृगशिरसा नक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । चान्द्रमार्गशीर्षमासपूर्णिमायां तस्या एव पूर्णिमाया मृगशिरसा योगसम्भवात् ।

आग्रहारिक पु० अग्रस्य प्रेतोद्देश्यकस्य हारं हरणमर्हति ठक् । अग्रदानीये विप्रे । [पामार्गे ।

आघट्ट पु० आघट्टयति रोगान् नाशयति अच् । रक्तवर्णेऽ-

आघाट पु० आघटयति रोगान् वियोजयति आ+घट-णिच् । घञ् वृद्धिः नि०। रक्तापमार्गे,सीमायाञ्च । [बधस्थाने ।

आघात पु० आ+हन-घञ् । आहनने । आधारे घञ् ।

आघार पु०आ+घृ-कर्म्मणि घञ् । घृते । भावे घञ् । होमादौ, मन्त्रविशेषेण देवताविशेषाय घृतदाने ।

आघूर्णित त्रि० आ+घूर्ण-क्त । चालिते, भ्रामिते च ।

आघ्राण न० आ+घ्रा-ल्युट् । गन्धग्रहणे, तृप्तौ च ।

आघ्रात(ण) त्रि० आ+घ्रा-क्त वा तस्य नत्वम् । गृहीतगन्धे, आक्रान्ते च ।

आङ्गिक त्रि० अङ्गेन अङ्गचालनेन निर्वृत्तं ठक् । भावव्यञ्जकेऽङ्गनिष्पन्ने भ्रूक्षेपादौ,अङ्गजातमात्रे च । मृदङ्गे वाद्ये न०

आङ्गिरस पु० अङ्गिरसो मुनेरपत्यम् अण् । वृहस्पतौ ।

आचमन न० आ+चम-ल्युट् । विधिना जलप्राशने, मुखादि प्रक्षालने,वैधकर्म्मादौ जलप्राशनपूर्व्वकमष्टाङ्गस्पर्शरूपक्रियायाञ्च,विस्तरो वृहदभिधाने । [पतद्ग्रहे निष्ठीवनपात्रे ।

आचमनक पु० आचमनस्य मुखप्रक्षालनस्य कं जलं यत्र ।

आचमनीय न० आचमनाय मुखक्षालनाय हितम् छ, आ+चम-कर्म्मणि अनीयर् वा। मुखप्रक्षानार्थे जले । [भक्ष्यमात्रे

आचाम पु० आ+चम-भावे घञ् । आचमने। कर्म्मणि घञ् ।

आचार पु० आ+चर-घञ् । चरित्रे, मन्वाद्युक्ते स्नानाचमनादिव्यवहारे च । [(हेलञ्चा) हिलमोचिकालतायाम् ।

आचारी स्त्री० सम्यक् चारः प्रसरणं यस्याः गौ० ङीष् ।

आचार्य्य पु० "उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते" इति मनूक्तलक्षणे वेदाध्यापयितरि, "आम्नायतत्त्वविज्ञानाच्चराचरसमानतः । यमादियोगसिद्धत्वादाचार्य्य इति कथ्यते इत्युक्तलक्षणे मतप्रस्थापके शङ्कराचार्य्यादौ च । स्त्रियां टाप् आचार्य्या । आचार्य्यपत्न्यान्तु आचार्य्यानी । ङीप् न णत्वम् ।

आचार्य्यक पु० आचार्य्यस्य कर्म्म कन् । आचार्य्यकर्त्तव्यकर्म्मणि

आचित त्रि० आ+चि-क्त । संगृहीते, वाक्ये, ग्रथिते च ; दशभारमितपरिमाणे,शकटपरिमाणे च पु०। [आच्छादिते

आच्छन्न त्रि० आ+छद-क्त । आवृते । छद-णिच्-क्त नि० ।

आच्छाद पु० आच्छाद्यतेऽनेन छद-णिच्-करणे घञ् । वस्त्रे ।

आच्छादन न० आ+छद-णिच्-ल्युट् । पिधानवस्त्रे ।

आच्छिन्न त्रि० आ+छिद-बलाद्ग्रहणे क्त । बलादगृहीते ।

आच्छुरित न० आ+छुर क्त । सशब्दहासे, नखाघातेन वाद्ये च । स्वार्थे क । आच्छुरितकमप्यत्र । [मृगयायाम् ।

आच्छोदन न० आच्छिद्यन्तेऽत्र छिद-ल्युट् पृषो० इतओत् ।

आञ्छ आयामे (दीर्घविस्तारे) । इदित् भ्वादि० पर०अक० सेट् । आञ्छति आञ्छीत् ।

आज न० आज्यतेऽनेन आ+अन्ज-यजर्थे क । घृते । अजस्येदम् अण् । छागमांसादौ त्रि० ।

आजक न० अजानां समूहः वुञ् । छागसमूहे । [वृक्षे ।

आजन्मसुरभिपत्र पु०आ जन्मनः सुरभि पत्रमस्य । मरुवक

आजानेय पु० "शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदेपदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृता" इत्युक्तलक्षणे उत्तमाश्वे । अवयवार्थस्तु अजानेयशब्दे दृश्यः ।

आजि स्त्री०अजन्त्यस्याम् अज-इण् न वीभावः । समरभूमौ, संग्रामे, आक्षेपे, क्षणे, मर्य्यादायाम् च ।

आजीव पु०आजीव्यतेऽनेन आ+जीव-घञ् । आजीविकायाम् कर्त्तरि ण्वुल् । आजीविकाप्यत्र स्त्री० । [कर्म्मकारके ।

आजू स्त्री० आजवति आ+जु-क्विप् दीर्घः । भृतिं विना

आज्ञा स्त्री० आ+ज्ञा-अङ् । निदेशे इदं क्रियतामिति शासने, ज्योतिषप्रसिद्धे लग्नात् दशमे स्थाने च ।

आज्य न०आ अज्यते अन्ज-क्यप् नलोपः । घृते । [घृते च

आज्यभाग पु० आज्यस्य भागो यत्र । होमे आहुतिविशेषे,

आञ्जनेय पु०अञ्जना नाम वानरी तस्या अपत्यं ठक् ।हनुमति

आञ्जिनेय पु० अञ्जन्यां भवः ठक् । (आजनाइ) कीटभेदे ।

आटविक न० अटव्यां भवः ठक् । आरण्यके सैन्ये ।

आटि(डि) पु० आ+अट्-इण् । शरारिपक्षिणि । आ+अड-इण् । आडिरप्यत्र,मत्स्यभेदे च। जातित्वेन स्त्रियां वा ङीप्

आटोप पु० आ+तुप घञ् पृषो० टत्वम् । दर्पे, संरम्भे, वातजन्ये उदरव्याधिभेदे च ।

आडम्बर पु॰ आ+डवि-क्षेपे, अरन्। हर्षे, दर्पे, तूर्य्यस्वने, आरम्भे, संरम्भे, अक्षिलोम्नि, घनगर्ज्जिते, आयोजने च।

आढक पु॰न॰ आढौकते अच् पृषो॰। सर्व्वतोदशाङ्गुलमाने, प्रस्थचतुष्टयमिते, पुष्कलचतुष्टयमिते च धान्यमानपात्रे, षट्पञ्चाशदधिकद्विशतमुष्टिपरिमाणे, द्रोणस्य चतुर्थभागे च।

आढकिक त्रि॰ आढक+वापाद्यर्थे ठञ्। आढकमितस्य धान्यस्य वपनयोग्ये क्षेत्रे, तत्पाचके, तत्खादके च। ख। आढकीनोऽप्यत्र

आढकी स्त्री॰ आढौकते अच् पृषो॰। (अड्हर) इति ख्याते शमीधान्यभेदे। [धनिनि च।

आढ्य त्रि॰ आ+ध्यै-क पृषो॰। युक्ते, विशिष्टे, सम्पन्ने,

आणवीन त्रि॰ अणुधान्यानां शर्षपादीनां भवनं क्षेत्रम् ख। (सुनाडाङ्गा) शर्षपादिभवनयोग्ये क्षेत्रे। अञ् आणवमप्यत्र

आणि पु॰ स्त्री॰ आ+अण-इन्। रथचक्राग्रस्थे कीलके, कोटौ, सीम्नि च। [शब्दे, भये च।

आतङ्क पु॰ आ+तकि-घञ्। रोगे, सन्तापे, सन्देहे, मुरज

आतञ्चन न॰ आ+तन्च-ल्युट्। वेगे, प्रापणे, आप्यायने, दुग्धादौ दध्यादिभावापादनाय अम्लद्रव्यप्रक्षेपे, निक्षेपे उपद्रवे, द्रवद्रव्ये प्रक्षेपणोचिते कठिनद्रव्यस्य चूर्णने, गलितस्वर्णादेर्द्रव्यान्तरयोगेन जारणे च।

आततायिन् त्रि॰ आततं विस्तीर्णम् आयितुं शीलमस्य अत-णिनि। वधोद्यते "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आततायिनः" इत्युक्तप्रकारे।

आतप पु॰ आ+तप-घ। प्रकाशे, उद्द्योते, सूर्य्याद्यालोके च।

आतपत्र न॰ आतपात् त्रायते। त्रै-क। छत्रे। स्वार्थे कन्। आतपत्रकमप्यत्र।

आतपाभाव पु॰ ६त॰ आतपस्याभावरूपायाम् छायायाम्।

आतर पु॰ आतरत्यनेन तॄ-अप्। नद्यादेःतरणार्थं देये भाटकादौ

आतर्पण न॰ आ-तृप-ल्युट्। प्रीतौ। णिचः-प्रीणने मङ्गलालेपने

आतायिन् पु॰ आ+ताय-णिनि। चिल् इतिख्याते पक्षिभेदे

आतिथेय न॰ अतिथये इदं ढक्। अतिथिनिमित्तके भोजनादौ। तत्र साधुः ढक्। अतिथिसपर्य्यायां कुशले त्रि॰।

आतिथ्य पु॰ स्वार्थे ष्यञ्। अतिथौ, तस्य सेवादिकर्म्म ष्यञ्। अतिथिसेवादौ न॰।

आतिवाहिक त्रि॰ अतिवाहे इहलोकात् परलोकनयने नियुक्तः ठक्। मृतस्य सूक्ष्मदेहादेर्लोकान्तरप्रापणार्थमीश्वर नियुक्ते अर्च्चिरादिस्थानस्थिते देवभेदे। "आतिवाहिकास्तल्लिङ्गादि"ति वेदान्तसूत्रम्।

आतुर त्रि॰ आ+तुर-क। रोगयुक्ते।

आतृप्य पु॰ आतृप्यतेऽनेन आ+तृप-क्यप्। (आता) वृक्षविशेषे

आतोद्य न॰ आसमन्तात् तुद्यते आ+तुद-ण्यत्। वीणादौ चतुर्विधे वाद्ये। [शत्रुणाभिभूते, कार्य्ये च। आत्तगर्व्वोऽप्यत्र।

आत्तगन्ध त्रि॰ आत्तोगृहीतोऽरिणा गन्धो गर्व्वो यस्य।

आत्मगुप्ता स्त्री॰ आत्मनैव दुस्पर्शत्वेन गुप्ता इतरमर्दनेभ्यो रक्षिता। (आल्कुशी) लताभेदे।

आत्मघातिन् त्रि॰ "व्यापादयेत् वृथात्मानं स्वयं योऽग्न्युदकादिभिः। अवैधेनैव मार्गेण आत्मघाती स उच्यते" इत्युक्त लक्षणे आत्मनः स्वशरीरस्य प्राणेन सह वियोजयितरि जने

आत्मघोष पु॰ आत्मानं घोषयति स्वशब्दैः। काके, कुक्कुटे च, ताभ्यां (का का) (कु कु) ध्वनिनैवात्मनामैकदेशस्य घोषणात्

आत्मज पु॰ आत्मनो जायते, आत्मा वा जायते जन-ड। पुत्रे, आत्मा वै जायते पुत्र इति श्रुतिः आत्मजन्माप्यत्र। कन्यायां, मनोजन्यायां बुद्धौ च स्त्री॰।

आत्मदर्श पु॰ आत्मा स्वरूपं दृश्यतेऽत्र दृश-घञ्। दर्पणे।

आत्मन् पु॰ आ+अत्-मनिन्। स्वरूपे, यत्ने, देहे, मनसि, धृतौ, बुद्धौ, अर्के, वह्नौ, वायौ, जीवे, ब्रह्मणि च।

आत्मबान्धव पु॰ "आत्ममातुः स्वसुःपुत्रा आत्मपितुःस्वसुः सुताः आत्ममातुलपुत्राश्च विज्ञेयाह्यात्मबान्धवा इत्युक्तेषु।

आत्मभू पु॰ आत्मना स्वयम्, आत्मनि मनसि वा भवति भू-क्विप्। चतुर्मुखे विधातरि, कामे च।

आत्ममूली स्त्री॰ आत्मैव रक्षणे मूलमस्याः दुःस्पर्शतयेतरमर्द्दनाभावेन स्वस्य स्वयं रक्षणात्। दुरालभालतायाम्।

आत्मम्भरि त्रि॰ आत्मानं बिभर्त्ति ख मुम् च्। स्वोदरमात्रपूरके

आत्मयोनि पु॰ आत्मैव योनिः कारणमस्य। हरौ, हरे, विधातरि मनसिजे मदने च। [आत्मनो रक्षणे।

आत्मरक्षा स्त्री॰ आत्मनो रक्षा यस्याः। वृक्षभेदे। ६त॰।

आत्महन् पु॰ आत्मानं हतवान् हन—क्विप्। "येऽन्यथासन्तमात्मानमकर्त्तारं स्वयं प्रभुम्। कर्त्ता भोक्तेति मन्यन्ते तएवात्महनो जना, इत्युक्तलक्षणे आत्मनो याथार्थ्यज्ञानरहिते, अज्ञे, आत्मघातिनि च जने।

आत्माधीन पु॰ आत्मनोऽधीनः। पुत्रे, श्यालके। प्राणाधारे च

आत्माश्रय पु॰ आत्मानमाश्रयति आ+श्रि-अच्। स्वस्य स्वापेक्षणरूपे तर्कदोषभेदे।

आत्मीय त्रि॰ आत्मनोऽयं छ। आत्मसंबन्धिनि।

आत्मोद्भवा स्त्री॰ आत्मनैवोद्भवति भू-अच्। माषपर्णीवृक्षे आत्मा उद्भवो यस्याः। कन्यायाम्। पुत्रे पु॰।

आत्यन्तिक त्रि॰॰ अत्यन्त+भवार्थे ठक्। अतिशयेन जाते।

आत्ययिक त्रि० अत्ययः नाशः प्रयोजनमस्य ठक्। नाशार्थे।
आत्रेय पु०अत्रेरपत्यं ढक्। अत्रिमुनिपुत्रे, देहस्थे रसधातौ च
आत्रेयी स्त्री० न सन्ति कर्म्मयोग्यानि त्रीणि दिनानि यस्याः
ङच् समा० सा अत्रा स्वार्थे ढञ्। ऋतुमत्याम्, नदी-
भेदे च। पुनः स्वार्थे कनि ह्रस्वे आत्रेयिकाप्यत्र।
आथर्व्वण न० अथर्वणा मुनिना दृष्टो वेदः अण्। तमधीते
तत्र विहितं वा पुनरण्। अथर्ववेदज्ञे ब्राह्मणे, तद्वेदविहि
तेऽभिचारादिकर्म्मणि च। [पाठके विप्रे।
आथर्व्वणिक त्रि० अथर्व्वाणं वेदमधीते ठक्। अथर्व्ववेद-
आदर पु० आ+दृ-अप्। समादरे, सम्माने, आरम्भे च।
आदर्श पु० आदृश्यतेऽत्र दृश-घञ्। दर्पणे, टीकायां प्रति-
रूपपुस्तके च। [ल्युट्। हस्तिघोषादृत्ते स्त्री०।
आदान न० आ+दा-ल्युट्। ग्रहणे,अश्वाभरणे च। कर्म्मणि
आदि पु० आ प्रथमं दीयते गृह्यते आ+दा-कि। प्रथमे, प्राक्
सत्तायाम्, कारणे, सामीप्ये, प्रकारे, अवयवे च।
आदिकारण न० आदि पूर्व्वं कारणं निमित्तम्। पूर्व्वनिमित्ते
आदितेय पु० अदितेरपत्यं ढक्। देवे।
आदित्य पु०अदितौ भवः ण्य। सूर्य्ये,देवे च। आदित्यमण्डलस्थे
हिरण्मये विष्णौ, अर्कवृक्षे अदितिदेवताके पुनर्वसुनक्षत्रे च।
आदित्यपत्र पु० आदित्यस्य अर्कवृक्षस्य पत्रमिव पत्रमस्य।
क्षुपभेदे। ६त० अर्कवृक्षपत्रे न०। [पुष्पे अर्कवृक्षे।
आदित्यपुष्पिका स्त्री० आदित्यवर्णं रक्तं पुष्पमस्याः। रक्त-
आदिदेव पु० आदौ दीव्यति स्वयं राजते। नारायणे,
शिवे, आदिकारणे वेधसि च। [गर्भे नारायणे च।
आदिपुरुष पु०आदौ पुरि देहे वसति क। प्रथमजीवे हिरण्य-
आदिम त्रि० आदौ भवः मप्। आद्ये। [कार्य्ये।
आदिमत् त्रि० आदिः कारणं विद्यतेऽस्य मतुप्। सकारणे
आदिवराह पु०आद्योवराहः। विष्णौ तस्यादिवराहरूपत्वात्
आदिष्ट न० आ+दिश-भावे क्त। आज्ञायाम्, उपदेशे च।
कर्म्मणि क्त। उपदिष्टे, व्याकरणप्रसिद्धे स्थानिजाते, यथा
इकः स्थाने यण् आदिश्यते इति यणादिष्ट इत्युच्यते।
आदीनव पु० आ+दी-भावे क्त आदीनस्य वानम् वा-ड।
दोषे, क्लेशे, दुर्दर्शे च।
आदृत त्रि० आ+दृ-क्त। पूजिते, सादरे, कृतादरे च।
आदेश पु० आ+दिश-भावे घञ्। आज्ञायाम्, शासने, उप-
देशे च। कर्म्मणि घञ्। ज्योतिषशास्त्रोक्ते,फले,व्याकरणसिद्धे
प्रकृतिप्रत्ययोपघातके कार्यभेदे (वर्णस्थाने वर्णान्तरोत्पत्तौ) च
आदेष्टृ त्रि० पु० आ+दिश-तृच्। ऋत्विजं प्रतिममेष्टसम्पा-
दनार्थं कर्म्म क्रियतामित्यादेशकर्त्तरि यजमाने, आदेश
कर्तमात्रे त्रि०। [द्रव्यमात्रे, धान्ये न०।
आद्य त्रि० आदौ भवः यत्। प्रथमे। अद-ण्यत्। अदनीय-
आद्यमाषक पु० आदौ भवः आद्यं मुख्यं मष्यतेऽनेन करणे
घञ् कर्म्म०। पञ्चगुञ्जापरिमाणे, माषा इति ख्याते माषकं
सप्तकृष्णला इत्युक्तेराद्यत्वविशेषणम् तस्य कार्य्यविशेषोप-
योगितया गौणत्वान्न मुख्यत्वम् अतएव 'दशार्द्धगुञ्जं प्रव-
दन्ति माषमिति भास्कराचार्य्येण माषस्यपञ्चगुञ्जत्वमेवोक्तम्।
आद्यून त्रि० आदिना ऊनः। आ दम्भूने। आ+दिव-क्त।
अविशेषायां निष्ठातस्य नत्वम् ऊठ् च। (पेटुक) कर्म्मा-
न्तराकाङ्क्षाविरहेण केवलमुदरपूरके।
आधमन न० आधीयते आ+धा-कमनन्। (बन्धकदाने)
आधौ, योगाधमनविक्रीतमि'ति स्मृतिः। [परैरिति स्मृतिः।
आधर्षित त्रि०आ+धृष-क्त। अन्यायेनाक्रान्ते,''मार्गेणाधर्षितः
आधान न० आ+धा-ल्युट्। आधौ, मन्त्रादिना वह्निस्थापने,
"आधाने सोमपाने" चेति स्मृतिः। गर्भाधाने च।
आधार पु० आ+धृ-घञ्। अधिकरणे, आश्रये, व्याकरण-
प्रसिद्धे औपश्लेषिकवैषयिकाभिव्यापकाख्येऽधिकरणकारके,
शस्यसम्पादनार्थं जलरोधनार्थे बन्धने वृक्षसेकार्थं जलधार-
णार्थे आलवाले च। आधारबन्धप्रमुखैरिति रघुः।
आधि पु० आधीयते मनोऽत्र। आ+धा-कि। मानसदुःखे
अत्याशायाम्, अधिष्ठाने,बन्धके, "आधौ प्रतिग्रहे क्रीते'
इति स्मृतिः। व्यसने च। [शयिततायाम्।
आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अति-
आधिदैविक त्रि०देवान् अग्निवाय्वादीन् अधिकृत्य निर्वृत्तम्
अधि+देव-ठञ् द्विपदवृद्धि। अतिवातादिहेतुजाते दुःखे।
आधिपत्य न० अधिपतेर्भावः ष्यञ्। प्रभुत्वे।
आधिभौतिक त्रि० भूतानि व्याघ्रसर्पादीन्यधिकृत्य जातम्।
अधिभूत+ठञ् द्विपदवृद्धिः। व्याघ्रसर्पादजनिते दुःखे।
आधिवेदनिक न० अधिवेदनकाले देयं ठञ्। अधिकं वेदन-
मधिवेदनं तत्र प्रथमविवाहात्परं द्वितीयविवाहकाले स्त्रियै
देये धने। 'अधिविन्नस्त्रियै देयमाधिवेदनिकं समम्'इतिस्मृतिः
आधुनिक त्रि० अधुना भवः ठञ्। इदानीन्तने, नव्ये च।
आधेय त्रि० आ+धा-यत्। आश्रिते च उत्पाद्ये "आधेयश्चा-
क्रियजश्चेति'' भाष्यकारिका। [र्य्यज्ञे हस्तिपके।
आधोरण पु० आ+घोर-गतिचातुर्य्ये ल्यु। हस्तिगतिचातु-
आध्मात त्रि० आ+ध्मा-क्त। शब्दिते, दग्धे, वातरोगजातायाम्
उदरस्फीततायाम्।

आध्मान पु० "आध्मानमिति जानीयाद्दोषं वातनिरोधज"-मित्युक्ते वातव्याधौ। आ+ध्मा-भावे ल्युट्। स्फीततायाम्। नलिकानामगन्धद्रव्ये स्त्री० ङीप्।

आध्यात्मिक त्रि० आत्मानं मनःशरीरादिकमधिकृत्य भवः। ठञ्। शोकमोहज्वरादिरूपे दुःखे। [स्मरणे च।

आध्यान न० आ+ध्यै-ल्युट्। चिन्तायाम्, उत्कण्ठापूर्व्वक-

आध्वर्य्यव न० अध्वर्य्योः कर्म्म, भावो वा अञ्। यजुर्वेदविहिते अध्वर्युसम्बन्धिनि कर्म्मणि, तद्भावे च।

आन पु० अन-घञ्। अन्तःस्थितस्य प्राणवायोर्नासिकयोच्छ्वासे

आनक पु० आनकति सोत्साहान् करोति अन-णिच् ण्वुल्। पटहे, मृदङ्गे, सशब्दमेघे च। उत्साहके त्रि०।

आनकदुन्दुभि पु० आनकः प्रोत्साहकः दुन्दुभिर्देववाद्यविशेषो यस्य कृष्णजन्मोत्सवे तथा वाद्यं तद्गृहे जातम्। कृष्णपितरि वसुदेवे। बृहड्ढक्कायां स्त्री० ङीप्।

आनत त्रि० आ+नम-क्त। कृतप्रणामे, अधोमुखे, विनयनते च

आनति स्त्री० आनमति प्रवणीभवत्यनया आ+नम-क्तिन्। सन्तोषे। भावे क्तिन्। नम्रीभावे, अधोभवने, नम्रतायाञ्च

आनद्ध न० आ+नह-क्त। चर्म्मणा बद्धमुखे पटहमुरजादौ वाद्ये, वेशभूषादिके च। ग्रथिते, व्याप्ते, बद्धे च त्रि०।

आनन न० आ अनित्यनेन आ+अन-ल्युट्। मुखे।

आनन्तर्य्य न० अनन्तरमेव चतुर्वर्णादित्वात् स्वार्थे ष्यञ्। अनन्तरे अव्यवहिते। अनन्तरस्य भावः ष्यञ्। अव्यवधाने

आनन्त्य न० अनन्त+भावे स्वार्थे वा ञ्य। बाहुल्ये "आनन्त्यात् कुलधर्म्माणामि"ति स्मृतिः देशकालाद्यपरिच्छिन्ने "तदानन्त्यं समश्नुते इति श्रुतिः। अनन्तं सुखमित्यर्थः।

आनन्द पु० आ+नन्द-घञ्। हर्षे, सुखे, दुःखाभावे, ब्रह्मणि च। आनन्दवति त्रि० सत्यज्ञानमानन्दं ब्रह्मेति श्रुतिः।

आनन्दथु पु० आ+नन्द-अथुच्। आनन्दे।

आनन्दन न० आ+नन्द-णिच्-ल्युट्। गमनागमनसमये कुशलप्रश्नेनानन्दोत्पादने।

आनन्दमय पु० आनन्देन प्रचुरः तत्प्रकृतवचने मयट्। जीवे, वेदान्तोक्ते सुषुप्तिसाक्षिणि प्राज्ञे च।

आनन्दार्णव पु० आनन्दस्यार्णव इव। परमेश्वरे "स्वोत्थामूलत्रिकोणस्थाः सौम्याः पापविवर्ज्जिताः आनन्दार्णवयोगोऽयमित्युक्ते यात्रालग्नभेदे च। कृत०। अत्यन्तानन्दे।

आनन्दि पु० आ+नन्द-इन्। हर्षे, कौतुके च। कौशल्यानन्दिवर्द्धनो राम इति रामायणम्।

आनर्त्त पु० आ+नृत्यन्त्यत्र आ+नृत-घञ्। नृत्यशालायाम् रङ्गे, जले, द्वारकासन्निकृष्टदेशे, तद्देशवासिनि च।

आनाम्य त्रि० आ+नम-णिच्-अभिभवे, यत्। अभिभवनीये

आनाय पु० आनयति मत्स्यानननेन आ+नी-घञ्। जाले। भावे अच् आनयः। आनयने।

आनाय्य पु० आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ नी-ण्यत् आयादेशः। वैदिकप्रसिद्धे दक्षिणाग्नौ। [भेदे च

आनाह पु० आ+नह-घञ्। दैर्घ्ये विण्मूत्ररोधके वैद्यकोक्ते रोग-

आनुपूर्व्वी स्त्री० पूर्व्वमनुक्रम्य अनुपूर्व्वं तस्य भावः ष्यञ् ततो वा ङीषि यलोपः। परिपाट्याम् मूलावधिके क्रमे ङीषभावपक्षे। आनुपूर्व्यमप्यत्र न०।

आनुमानिक त्रि० अनुमानेन प्राप्तः ठक्। अनुमानमात्रसिद्धे सांख्योक्ते प्रधाने 'आनुमानिकमि'ति वेदान्तसूत्रम्।

आनुश्रविक पु० गुरुपाठादनुश्रूयते अनुश्रवोवेदस्तत्र विहितः ठक्। स्वर्गादिसाधनतया वेदविहिते कर्म्मसमूहे "दृष्टवदानुश्रविक" इति साङ्ख्यकारिका।

आनृत त्रि० अनृतं शीलमस्य अण्। असत्यस्वभावे। [अक्रौर्य्ये च

आनृशंस्य न० नृशंसो घातुकः न० त० भावे ष्यञ्। दयायां,

आन्तर त्रि० अन्तर्मध्ये भवः अण्। आभ्यन्तरे। [सौसादृश्ये

आन्तरतम्य न० अन्तरतमस्य अत्यन्तसदृशस्य भावः ष्यञ्।

आन्त्र न० अमत्यनेन अम-ष्ट्रन् उपधादीर्घः। नाडीभेदे। अन्त्रस्येदम् अण्। अन्त्रसम्बन्धिनि त्रि०। स्त्रियां ङीप्।

आन्दोल दोलने अद० चुरा० उभय० सक० सेट्। आन्दोलयति ते आन्दुदोलत् त। [अनुसन्धाने च।

आन्दोलन न० आन्दोल-ल्युट्। पुनःपुनर्दोलने, मुहुश्चलने,

आन्धसिक त्रि० अन्धो भक्तं शिल्पमस्य ठक्। पाचके।

आन्वयिक त्रि० अन्वये प्रशस्तकुले भवः ठञ्। प्रशस्तकुलजाते

आन्वाह्निक त्रि० अहनि अहनि अन्वहम् तत्र भवः ठञ्। प्रतिदिनसाध्ये पाकादौ।

आन्वीक्षिकी स्त्री० अनु वेदश्रवणानन्तरमीक्षा परीक्षणमन्वीक्षा सा प्रयोजनमस्याः तत्र साधु वा ठञि ङीप्। तर्कविद्यायाम् अध्यात्मविद्यायाञ्च। [भेदे पु०।

आप न० अपां समूहः अण्। अपां समूहे। आप अच् वसु-

आपगा स्त्री० आपं जलसमूहं गच्छति प्राप्नोति। नद्याम्।

आपण पु० न० आपण्यन्ते विक्रीयन्त्यत्र पण-घ। हट्टे, क्रयविक्रेयद्रव्यशालायाञ्च। भावे घ। क्रयविक्रयव्यवहारे पु०

आपणिक त्रि० आपणो व्यावहारोऽस्यास्ति ठन्। क्रयादिकर्त्तरि वाणिजे। [प्रसङ्गरूपे तर्कदोषे च।

आपत्ति स्त्री० आ+पद-क्तिन्। आपदि, प्रापणे, अनिष्ट-

आपद् स्त्री॰ आ+पद-क्विप् । विपत्तौ ।

आपन न॰ आप-ल्युट् । प्राप्तौ, मरीचे च । कर्म्मणि ल्युट् । क्लेशे

आपन्न त्रि॰ आ+पद क्त । विपद्ग्रस्ते, प्राप्ते च ।

आपन्नसत्त्वा स्त्री॰ आपन्नं सत्त्वं यया । गर्भवत्याम् ।

आपमित्यक न॰ अपमित्य परीवर्त्य निर्वृत्तम् अप+मे-क्त्वा ल्यप् ततोनिर्वृत्तेऽर्थे कक् कित्त्वात् वृद्धिः । तुल्यरूपद्रव्य विनिमयेन ग्रहणे । [तस्य तृतीयभागभवे पित्र्याद्यादौ

आपराह्णिक त्रि॰अपराह्णे भवः ठञ् । त्रिधा विभक्तस्य दि-

आपस् न॰ आप-असुन् । जले, "आपोभिर्मार्ज्जन"मितिस्मृतिः "सर्व्वमापोमयं जगदि"ति देवीमाहात्म्यम् । [लतायाम् ।

आपस्तम्भिनी स्त्री॰ आपः स्तभ्नाति स्तम्भ-णिनि । त्रिङ्गिन्यां

आपाक पु॰ आपच्यतेऽत्र आ+पच+घञ् । (पोयान्) कुम्भ-कारस्य मृत्पात्रपाकस्थाने । [घञ् । तत्काले, मार्गे च ।

आपात पु॰ आ+पत-भावे घञ् । सहसा पतने, । आधारे

आपाततस् अव्य॰ आपात+तसिल् । अनिश्चये विनेत्यर्थे "आपाततोयदर्थस्ये"ति साहित्यदर्पणे ।

आपान न॰ आ सम्भूय पिबन्त्यत्र । सुरापानार्थं सम्भूयोपवे-शने, (चक्रे) मद्यपानसभायाञ्च ।

आपानभूमि स्त्री॰ आपानस्य भूमिः । सुरापानस्थाने ।

आपिञ्जर न॰ ईषत् पिञ्जरवर्णम् । स्वर्णे ।

आपीड पु॰ आ+पीड-अच् । शिखामाल्ये, शिरोभूषणे, स्तम्ह-वह्निर्निःसृतकाष्ठे च । [पीते त्रि॰ ।

आपीत न॰ आपीयते आ+पा-क्त । माक्षिकधातौ । ईषत्-

आपीन न॰ आ+प्याय-क्त पीभावः तस्य नत्वम् । (मेड़) ऊधसि । कूपे पु॰ । ईषत्स्फीते त्रि॰ ।

आपूपिक न॰ अपूपानां पिष्टकानां समूहः ठक् । पिष्टकसमूहे पिष्टकसम्पादनेन जीव्यतीत्याद्यर्थे ठक् । पिष्टकाजीवे, तद्-भक्षणकारके, तद्रचयितरि, तद्भक्षणशीले च त्रि॰ ।

आपूप्य पु॰अपूपार्थं पिष्टःअन्न । सक्तुषु, गोधूमचूर्णादौ च । [च।

आपृच्छा स्त्री॰आ+प्रच्छ-अङ् । आलापे, जिज्ञासायामाभाषणे

आप्त त्रि॰ आप-क्त । विश्वस्ते, प्राप्ते, लब्धे, सत्ये, रागद्वेषा-दिवर्ज्जिते, यथार्थोपदेष्टरि भ्रमादिशून्ये यथार्थज्ञातरि च।

आप्तकाम त्रि॰आप्तः प्राप्तः कामः कामनाविषयो येन । सम्पूर्णकामे नित्यतृप्ते । परमेश्वरे पु॰ ।

आप्ति स्त्री॰ आप-क्तिन् । संबन्धे, योगे, लाभे प्राप्तौ च ।

आप्तोक्ति स्त्री॰ आप्तस्य उक्तिः वच-क्तिन् । सन्दिग्धेविषय निर्णयार्थं सिद्धान्तिवाक्ये, यथार्थज्ञवाक्ये च ।

आप्य न॰ आप-ण्यत् । (कुड) कुष्ठभे । कर्म्मीभूते गम्यादौ प्राप्तव्ये च त्रि॰। अपां विकारः ष्यञ् । जलविकारे फेनादौ त्रि॰ । [ल्युट् । तर्पणे प्रीणने च । ल्यु । तत्कर्त्तरि त्रि॰।

आप्यायन न आ+प्याय-ल्युट् । तृप्तौ, प्रीतौ च । णिच्-

आप्रच्छन न॰ आ+प्रच्छ-ल्युट् । आनन्दने, गमनागमनसमये बन्धूनामन्योन्यकुशलजिज्ञासयानन्दसम्पादने ।

आप्रपद अव्य॰प्रपदं पादाग्रं तत्पर्य्यन्तम् अव्ययी॰ । पादाग्रपर्य्यन्ते

आप्रपदीन त्रि॰आप्रपदं पादाग्रान्तं प्राप्नोति ख । पादाग्रान्तं लम्बमाने वस्त्रादौ । [जलानां सर्व्वतः समुच्छलने च ।

आप्ल(प्ला)व पु॰ आ+प्लु-घञ्-अप् वा । स्नाने । (कयलाप)।

आप्लुत त्रि॰ आ+प्लु-क्त । स्नाते । भावे क्त । स्नाने न॰ ।

आप्लुतव्रत पु॰ आप्लुतं वेदाध्ययनानन्तरं स्नानं व्रतमस्यस्य । अधीतवेदे, अकृतम्दहस्थाश्रमे ब्रह्मचारिभेदे स्नातके ।

आबद्ध न॰ आ सम्यक् बद्धम् बन्ध-भावे क्त । दृढबन्धने । आधारे क्त । प्रेम्णि । कर्म्मणि क्त । भूषणे । करणे क्त । योक्त्रे पु॰ । बद्धे आप्ते प्रतिरुद्धे च त्रि॰ ।

आबन्ध पु॰ आ+बन्ध-घञ् । दृढबन्धे, योक्त्रे च ।

आबाधा स्त्री॰ आ+बाध-अङ् । पीडायां,क्लेशे च । लीलाव-त्यादौ प्रसिद्धे । त्रिकोणक्षेत्रे लम्बोभयपार्श्वस्थे क्षेत्रमध्ये रज्जुनिक्षेपाज्जायमाने भूखण्डे ।

आबिल त्रि॰ आ+बिल भेदने, क । कलुषे, अस्वच्छे च ।

आबुक पु॰ आपनमाप् क्विप् आपस्तत्तनोति उद्+तन-ड । नाट्योक्तौ भगिनीपतौ ।

आभरण न॰आ+भृ-ल्युट् । भूषणे । [माने, वातरोगभेदे च।

आभा स्त्री॰आ+भा-अङ् । दीप्तौ, शोभायाम्, कान्तौ, उप

आभाषण न॰ आ+भाष-ल्युट् । आलापे, परस्परकथने च

आभाषित त्रि॰ आ+भाष-क्त । अभिमुखीकृत्य कथिते ।

आभास पु॰ आ+भास-घञ् । प्रतिबिम्बे, दीप्तौ, पश्वादेरादौ सकृतिदर्शनोत्थापने अवतारणे च ।

आभास्वर पु॰ आ+भास-वरच् । चतुःषष्टिमिते, द्वादशमिते वा गणदेवताभेदे । दीप्ते त्रि॰। [पाण्डित्ये च।

आभिजात्य न॰ अभिजातस्य भावः ष्यञ् । कौलीन्ये,

आभीक्ष्ण न॰स्वार्थेऽण् । अत्यर्थे । तद्वति त्रि॰। क्रियाविशेषणत्वे न॰

आभीक्ष्ण्य न॰ अभीक्ष्णस्य भावः ष्यञ् । पौनःपुन्ये ।

आभीर पु॰आ सम्यक् भियं राति रा-क। आहिर इतिख्याते ब्राह्मणादम्बष्ठायामुत्पन्ने वर्णसङ्करभेदे गोपे, देशभेदे च।

आभीरपल्लि(ल्ली) स्त्री॰आभीराणां पल्लिः । गोपग्रामे,पक्षे ङीप्

आभील न॰ आ समन्तात् भियं लाति आभी+ला+क । कष्टे तद्वति, भयानके च त्रि॰ ।

आभोग पु० आ-भुज-भावे आधारे वा घञ् । वरुणस्य छत्रे परिपूर्णतायां, यत्ने, गानसमाप्तौ (भणिता) कविनामख्यापपने च । [कर्म्मणि तद्दृश्यर्थं कर्त्तव्ये श्राद्धे ।

आभ्युदयिक त्रि० अभ्युदयार्थं वृद्ध्यर्थं वि हृतं टक् । चूड़ादि

आम त्रि० आ ईषत् अम्यते पच्यते आ+अम-घञ् । अपक्वे वैद्यकोक्ते अजीर्णताख्ये रोगभेदे पु० ।

आमगन्धि न० आमस्यापक्वस्य गन्धइव गन्धो यत्र इत् समा० । अपक्वमांसादितुल्यगन्धाढ्ये ।

आमनस्य न० अप्रशस्तं मनो यस्य तस्य भावः ष्यञ् । दुःखे ।

आमन्त्रण न० आ+मन्त्र-ल्युट् । अभिनन्दने, संबोधने, कामचारानुज्ञाल्कमे स्वनामख्याते च । अवश्यकर्त्तव्ये नियोगो निमन्त्रणं यथा श्राद्धादौ भोजने, अकरणे प्रत्यवायासाधने नियोग आमन्त्रणं यथा स्थलविशेषे शयने ।

आमन्त्रित त्रि० आ+मन्त्र-क्त । आमन्त्रिते, संबोधिते च । व्याकरणे संबोधने या प्रथमा तस्यां न० ।

आमय पु० आमं रोगं यात्यनेन या-ड । रोगे ।

आमयाविन् त्रि०आमयोऽस्यास्ति विनि दीर्घश्च । रोगयुक्ते ।

आमर्शन न०आ+मृश-ल्युट् । स्पर्शे । [निर्वीर्य्यमित्युद्भटः ।

आमर्ष पु० न+मृष-घञ् दीर्घः । क्रोधे,"निरुद्योगं निरामर्षं

आमलक पु० आ+मल-वुन् । वासकवृक्षे । ङीप् । धात्र्याम् तिष्यफलायां च स्त्री० । तस्याः फलं फले लुगिति तद्धितस्य लुक् । धात्रीफले न० । [स्वनामख्याते वातरोगभेदे ।

आमवात पु० आमयति पीडयति अम-णिच्-अच् कर्म्म० ।

आमातीसार पु० कर्म्म० । स्वनामख्याते रोगभेदे । [स्थाने

आमाशय पु० आमस्याशयः । नाभिस्तनयोर्मध्यभागे अपाक

आमिक्षा स्त्री०आमिष्यते सिच्यते मिष-सक् । तप्ते पक्वे दुग्धे दधियोगजायां (छाना) विकृतौ । [स आमिक्षीयमप्यत्र ।

आमिक्षीय न० आमिक्षायै हितं छ । आमिक्षोपकरणे दधि

आमिष न०पु० आ+मिष-क । मांसे, भोग्यवस्तुनि, उत्कोचे, रुचिररूपादौ,लोभसङ्गये,लाभे,कामगुणे, भोजने,विषये च

आमिषप्रिय पु० 6त० । कङ्कपक्षिणि । मांसाभिलाषिणि त्रि०

आमिषाशिन् त्रि० आमिषमश्नाति अश-णिनि । मांसभक्षके

आमिषी स्त्री० आमिषनामैकदेशनामिकायां जटामांस्याम् ।

आमुक्त त्रि० आ+मुच-परिधाने क्त । परिहिते । कर्त्तरि क्त । परिहितकवचे जने । [सूक्तायां नाटकाङ्गे प्रस्तावनायाम्

आमुख न० "आमुखं तद्विजानीयात् बुधैः प्रस्तावना मते"

आमुष्मिक त्रि० अमुष्मिन् परलोके भवः ठञ् टिलोपश्च । परलोके जन्मान्तरे भवे वस्तुनि । स्त्रियां ङीप् ।

आमुष्यायण त्रि० अमुष्यप्रत्यक्षीकृतस्यापि सद्वंशत्वेन सच्चरितत्वेन च प्रख्यातस्यापत्यं फक् षष्ठ्या अलुक् । सद्वंशोद्भवे ।

आमोद पु० आ समन्तात् मोदयति आ+मुद+णिच्-अच् । अतिदूरव्यापके गन्धे,गन्धमात्रे च । आ+मुद भावे घञ् हर्षे

आमोदिन् त्रि० आमोदोऽतिदूरगो गन्धोऽस्त्यस्मिन् । सुखसुगन्धितापादके कर्पूरादौ, हर्षवति च ।

आम्नाय पु० आम्नायते अभ्यस्यते आ+म्ना-घञ् । वेदे, आगमे निगमे,गुरुपरम्परागते, सदुपदेशे, वंशे, कुलक्रमेण कथने च । भावे घञ् । अभ्यासे ।

आम्र पु०अम-रक् दीर्घश्च । स्वनामख्याते वृक्षे । तत्फलादौ न०

आम्रातक पु० आम्र तद्रसम् आ ईषत् अतति याति आ+अत ण्वुल् । आमड़ा इति ख्याते वृक्षे ।

आम्रावर्त्त पु० आम्रइव आ ईषत् तुल्यरसतया वर्त्तते आ+वृत-अच् । आम्रातकवृक्षे ।

आम्रेडित न० आ+म्रेड-उन्मादे अच् उन्मत्तेनैवाचर्य्यते । आम्रेड+आचारे क्विप् ततः क्त । उन्मत्तेन यथा कथितस्य पुनःपुनः कथनं क्रियते एवं कथितस्य द्विस्त्रिकथने ।

आम्ला स्त्री० आ सम्यक् अम्लो रसो यस्याः । तिन्तिड्याम् स्वार्थे कनि आम्लिकाप्यत्र ।

आय पु० आ-इण्-अच् । लाभे । प्राप्तौ,धनागमे, ज्योतिषोक्ते एकादशस्थाने,ग्रामादौ स्वामिग्राह्यभागे,वनितागारपालके च

आयःशूलिक त्रि० अयःशूलेनार्थानिच्छति । तीक्ष्णोपायेनाभीष्टसाधके जने । [अतियत्नशालिनि

आयत त्रि०आ+यम-क्त । दीर्घे,आकृष्टे च । आ+यत-अच् ।

आयतच्छदा स्त्री० आयतः छदोऽस्याः । कदल्याम् ।

आयतन न० आयतन्तेऽत्र यत-आधारे ल्युट् । देवादिवन्दनस्थाने,आश्रये, विश्रामस्थाने, यज्ञस्थाने च ।

आयति(ती) स्त्री० आ+या डति वा ङीप् । उत्तरकाले, प्रभावे, फलदानकाले च । आ+यम-क्तिन् । सङ्गमे, दैर्घ्ये, प्रापणे च ।

आयत्त त्रि० आ+यत-कर्त्तरि क्त । अधीने, वशीभूते ।

आयत्ति स्त्री० आ+यत-क्तिन् । स्नेहे, वशित्वे, सामर्थ्ये, सीम्नि, शयने, प्रभावे च । [लौहकवचे स्त्री०ङीप् ।

आयस न०अयसा निर्म्मितं तद्विकारो वा अण् । लौहपात्रादौ

आयस्त त्रि० आ+यस-क्त । क्षिप्ते, क्लेशिते, हते तीक्ष्णीकृते

आयाम पु० आ+यम-घञ् । दैर्घ्ये ।

आयास पु० आ+यस-घञ् । परिश्रमे, अतियत्ने च ।

आयु पु०इण-उण् । जीवनकाले,'मा वधिष्ट जटायु मामि'ति

भट्टिः । [कर्म्माध्यक्षे,कुशले च ।

आयुक्त त्रि० आ+युज-क्त । व्यापारिते, ईषद्युक्ते, नियुक्ते,

आयुध न० आ+युध-करणे घञर्थे क । प्रहरणमात्रे ।

आयुधिक पु० आयुधं शिल्पमस्य ठक् । शस्त्राजीवे । तदर्थे छ आयुधीयस्तत्र । [सोपाङ्गे ।

आयुर्वेद पु० आयुर्विन्दतेऽनेन घञ् । चिकित्साशास्त्रे वेद-

आयुर्वेदिन् त्रि० आयुर्वेदोवेद्यतया विद्यतेऽस्य इनि । आयुर्वेदज्ञे चिकित्सके । [मत्वर्थीये तृतीये योगे पु० ।

आयुष्मत् त्रि० आयुर्विद्यतेऽस्य मतुप् । चिरजीविनि । विष्कु

आयुष्य त्रि० आयुषे हितम् यत् । आयुषोहितकारके पथ्ये । स्वार्थे यत् आयुषि न० । [रघुः ।

आयुस् न० इण-असि-णिच्च । जीवनकाले 'आयुषः क्षये' इति

आयोग पु० आ+युज-घञ् । गन्धमाल्योपहारे, व्यापारे, रोधे च

आयोगव पु०शूद्राद्वैश्यायामुत्पन्ने प्रतिलोमवर्णसङ्करजे जातिभेदे

आयोजन न० आ+युज-ल्युट् । उद्योगे, आहरणे च ।

आयोधन न० आ+युध-आधारे ल्युट् । युद्धस्थाने । भावे ल्युट । योधने, तत्फले बधे च ।

आर पु० ऋ-घञ् । मङ्गलग्रहे, शनिग्रहे मधुराम्लफले वृक्षभेदे च । पित्तले, कोणे, प्रान्तभागे, मुण्डलौहे च न० ।

आरकूट पु०न० । आरं पित्तलं कूटयति स्तूपीकरोति अच् । पित्तलाभरणे । 'किमारकूटाभरणेन न श्रिय'इति नैषधम् ।

आरक्त पु० आ+रञ्ज-अच् । हस्तिकुम्भाधःस्थले, हस्तिमस्तक चर्म्मणि, सैन्ये च । रक्तके त्रि० । भावे घञ् । रक्षायाम् ।

आरग्वध पु० रगे-शङ्कायां क्विप् आरगं रोगशङ्कामपि हन्ति अच् बधादेशश्च । सोंदाल इति ख्याते वृक्षे ।

आरट्ट पु० आरट्यते विख्याप्यते आ+रट टन् टस्य नेत्त्वम् । अश्वोत्पत्तिस्थाने (आरव) देशभेदे । [घोटके ।

आरट्टज पु० आरट्टे देशे जायते जन-ड । (आरव) स्थानजाते

आरणि पु०आ+ऋ अणिच् । आवर्त्ते पयसां स्वतोभ्रमे ।

आरण्य त्रि० अरण्ये भवः यक् । वनजाते मृगसिंहादौ ।

आरण्यक पु० अरण्ये भवः ततः स्वार्थे क । पथि, अध्याये, न्याये, विहारस्थाने मनुष्ये, हस्तिनि च । वेदांशविशेषे न० । "आरण्यकमधीत्य चेति" मनुः ।

आरति स्त्री० आ-रम-क्तिन् । उपरमे, निवृत्तौ च ।

आरनाल न० ऋच्छतीति आरः ऋ+ण, नल-गन्धे घञ् । आरो नालोगन्धो यस्य । काञ्जिके । वा कप् । आरनालकमप्यत्र

आरभटी आरभ्यतेऽनया आ+रभ-अटि ङीप् । नाट्ये रचनाभेदे

आरम्भ पु० आ+रभ-घञ् मुम् च । त्वरायाम् वेगे-उद्यमे, दर्पे, उपक्रमे, प्रस्तावनायाञ्च । कर्म्मणि-घञ् । आरभ्यमाणे ।

आरम्भवाद पु० आरम्भस्य वादो यत्र । न्यायमते वैशेषिक-मते च "पृथिव्यब्वह्निवायूनां क्रियासंयोजिताणवः द्व्यणु-कादिक्रमेणैवमारभन्ते इदं महदिति" तयोः स्वीकारात्

आर(रा)व पु० आ+रु-घञ् अप् वा । शब्दमात्रे ।

आरा स्त्री० आ+ऋ अच् । चर्म्मभेदकास्त्रभेदे । टेको इति ख्याते लौहास्त्रे च । 'आराग्रमात्रो ह्यवरोऽपीति' श्रुतः

आरात् अव्य० आ+रा-आति । दूरे, समीपे च ।

आरात्रिक न० अरात्रावपि निर्वृत्तं ठञ् दीपो हि रात्रावेव प्रदर्श्यते इदं दिनेऽपि दर्श्यते । (आरति) नीराजनकर्म्मणि ।

आराधन न० आ+राध-ल्युट् । पाके, साधने, पूजने, तोषणे, प्राप्तौ च ।

आराधना स्त्री० आराध-युच् स्त्रीत्वात् टाप् । सेवायाम् ।

आराम पु० आ+रम-आधारे घञ् । उपवने, कृत्रिमवने, क्रीडार्थवने च । [वक्रगामिणि त्रि० ।

आरालिक पु० अरालं कुटिलं शिल्पमस्य ठक् । पाचके ।

आरु पु० ऋ-उण् । वृक्षभेदे, कर्कटे, शूकरे च ।

आरेवत पु० आरेवयति रेचयति मलं रेव-णिच्-विच् अतति-अच् । अत्यन्तसारके (सोन्दाल) आरग्वधवृक्षे ।

आरोग्य न०अरोगस्य भावः ष्यञ् । रोगराहित्ये अनामये ।

आरोग्यशाला स्त्री० आरोग्यार्थं शाला । चिकित्सालये ।

आरोप पु० आ रुह-णिच्-पुक् घञ् । अतस्मिन् अन्यधर्म्मा-वभासे यथा रज्ज्वां सर्पज्ञानम् । रूपकालङ्कारादौ तु सत्यपि वाधज्ञानेऽभेदावबोधः शाब्दः न प्रतिरुध्यते ।

आरोह पु० आ+रुह-घञ् । दैर्घ्ये । उत्तमस्त्रीणां नितम्बे, आरोहणे, उच्छ्रये, परिमाणभेदे च ।

आरोहण न० आ+रुह-करणे ल्युट् । पाषाणादिरचिते उच्चप्रासादरोहणसाधने (सिंडि) सोपाने । भावे घञ् । निम्नस्थानादूर्द्ध-गमने ।

आर्चिक पु० ऋचां व्याख्यानं ठक् । ऋचां व्याख्याने । ऋक्षु भवः ठक् । ऋग्वेदभवे त्रि० । ईकार्क आर्चीकइत्यप्यत्र त्रि० ।

आर्जव पु० ऋजोर्भावः अण् । सरलतयां परप्रतारणाराहित्ये

आर्त्त त्रि० आ+ऋ-क्त । पीड़िते, दुःखिते, अस्वस्थे च ।

आर्त्तव न० ऋतौ भवम् अण् । स्त्रीपुष्पे, पुष्पे च । ऋतुरस्य प्राप्तः अण् । ऋतुजे फलपुष्पादौ त्रि० । घोषकायाम् स्त्री० ङीप् । [धनुस्कोट्याञ्च ।

आर्त्ति स्त्री० आ+ऋ-क्तिन् ऋति धातौ वृद्धिः । पीडायाम्

आर्त्विज्य न० ऋत्विजः कर्म्म ष्यञ् । ऋत्विग्योग्ये कर्म्मणि ।

आर्थिक त्रि० अर्थं गच्छति अर्थात् आगच्छति वा ठक्। अर्थ-याहके ऽर्थागते च। [आरभ्य षष्ठे नक्षत्रे च स्त्री०न०।
आर्द्र न० अर्द्द-रक् दीर्घश्च। क्लिन्ने, सजलवस्तुनि। अश्विनीत
आर्द्रक न० आर्द्रायां भूमौ जातं वुन्। (आदा) ख्नाम-ख्याते मूलभेदे।
आर्य्य पु० ऋ-ण्यत्। स्वामिनि, गुरौ, सुहृदि च। श्रेष्ठकुलोत्पन्ने पूज्ये, श्रेष्ठे, सङ्गते, नाट्योक्तौ मान्ये, उदारचरिते, शान्तचित्ते "कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्। तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृतः" इत्युक्तलक्षणे जने च त्रि०।
आर्य्यक पु० अतिशयेनार्य्यः पितोरपि पूज्यत्वात् प्राशस्त्ये कन्। पितामहे, मातामहे च। स्वार्थे कन्। श्रेष्ठे त्रि०।
आर्य्यपुत्र पु० आर्य्यः श्वशुरो गुरुश्च तस्य पुत्रः। पत्यौ,गुरुपुत्रे च।
आर्य्यावर्त्त पु०आर्य्याणामावर्त्तोदेशः। 'आ समुद्रात्तु वै पूर्व्वादा समुद्रात्तु पश्चिमात्। हिमवद्विन्ध्ययोर्मध्यमार्य्यावर्त्तं प्रचक्षते' इति मनूक्ते देशभेदे।
आर्ष त्रि० ऋषिभिःप्रोक्तम् स्मृतं वा अण्। ऋषिप्रणीते धर्म्मशास्त्रे, तत्स्मृते वेदे च। "आर्षं धर्म्मोपदेशञ्चेतिमनुः।" आर्षं आदाय गोयुगमित्युक्ते विवाहभेदे पु०।
आर्हत पु०अर्हन्नेव स्वार्थे अण्। बुद्धविशेषे। तन्मत्स्वध्विनि त्रि०।
आर्हन्ती स्त्री० अर्हतोभावः ष्यञ् नुम् च ङीप् यलोपः। योग्यतायाम्। [बहुषु च त्रि०।
आल न० आलयन्ति भूषयन्ति अच्। हरिताले। अनल्पे,
आलभन न० आ+लभ-ल्युट्। स्पर्शे।
आलम्ब पु० आ+लबि घञ्। अवलम्बे, आश्रये च।
आलम्बन न० आ+लबि-ल्युट्। आश्रये,अलङ्कारमते रसाश्रये विभावे च। [लम्भमिति स्मृतिः" स्पर्शे च।
आलम्भ पु०आ+लभ घञ् मुम् च। वधे,"अश्वालम्भं गवा-
आलय पु० आलीयतेऽस्मिन् अच्। गृहे। अव्ययी०लयपर्य्यन्ते। अव्य०। "पिबत भागवतं रसमालयमि"ति भागव०।
आलयविज्ञान न० आलयं विज्ञानम्। बौद्धमते लयपर्य्यन्त स्थायिनि अहङ्कारास्पदे विज्ञाने तन्मते हि सर्व्वज्ञानानां क्षणिकतयाऽनुभवजन्यसंस्कारस्य तस्मिन् ज्ञाने एव प्रकल्पनात् पूर्व्वानुभूतस्य स्मृतिसम्भवः।
आलवाल न० आ समन्तात् जललवमालाति आ+ला-क। वृक्षमूले सेकार्थं मृदादिघटिते जलाधारे सेतौ।
आलस्य न० अलसस्य भावः ष्यञ्। सत्यपि सामर्थ्येऽवश्य-कर्त्तव्येऽनुत्साहरूपेऽलसत्वे। अलसएव प्राज्ञादित्वात् स्वार्थे ष्यञ्। अलसत्वयुक्ते। [रज्ज्वां, बन्धनमात्रे च।
आलान न० आलीयतेऽत्र आ+ली-ल्युट्। गजबन्धनस्तम्भे
आलाप पु० आ+लप-घञ्। कथोपकथने, सम्भाषणे च।
आलाबू स्त्री० आ+लबि ऊङ् नलोपश्च। तुम्ब्याम्।
आलावर्त्त न० आ समन्तात् अलमत्यर्थं वर्त्तते चाल्यते आ+अल+वृत-णिच् घञ्। वस्त्रनिर्म्मिते व्यजने।
आलि(ली) स्त्री० आ+अल-इन्। आगन्तुकजलवारणार्थे शस्यसेकजलधारणार्थे च वृत्तिरूपे सेतौ, सख्यां समवयस्कायां, पङ्क्तौ, आरामादिवर्त्मश्रेण्याम्, सन्ततौ च। वा ङीप् आलीत्यपत्र। शुद्धान्तःकरणे अत्यर्थे च त्रि०। भ्रमरे, वृश्चिके च पु०।
आलिङ्गन न० आ+लिगि-ल्युट्। प्रीतिपूर्व्वकमन्योन्यदेह संश्लेषणे, परिरम्भे च। [म्दृदङ्गे च।
आलिङ्ग्य त्रि० आ+लिगि-ण्यत्। आलिङ्गनीये, यवाकृति-
आलिञ्जर पु० अलिञ्जर एव अण्। जाला इति ख्याते मृण्मये जलपात्रे मणिके।
आलिम्पन न० आ+लिप-ल्युट् मुम् च। मङ्गलार्थे लेपने।
आलीढ न० "नमिता पूर्व्वजङ्घा तु पश्चिमा प्रसृता भवेत्। अश्समोमध्यकायः स्यादालीढस्य च लक्षणमित्युक्तलक्षणे "आलीढं दक्षिणं पादमित्युक्तलक्षणे च धन्विनां पादविन्यास विशेषेणावस्थाने। आ+लिह्-क्त। भुक्ते, क्षते च त्रि०। 'सेनान्यमालीढमिवासुरास्त्रैरि'ति रघुः। भावे क्त लेहने न०।
आलीनक न० आईषत् प्रयासेन अग्निसंबन्धमात्रेण लीयते द्रवीभवति आ+ली-क्त संज्ञायां कन्। (रां) इतिख्याते रङ्गे
आलु पु० आ+लु-डु। स्वनामख्याते कन्दभेदे, भेलके, पेचके पक्षिणि च। झारी इति ख्यातायां क्षुद्रघटिकायां स्त्री०।
आलुक न० आलुरेव स्वार्थे कन्। मूलभेदे, काष्ठालुशङ्खालु प्रभृतिकन्दमात्रे च। शेषे नागे पु०। आ-लू-क्किप् संज्ञायां कन् ङीप्। आलूकी रक्तालुप्रभेदे स्त्री०।
आलेख्य न० आ-लिख-आधारे-ण्यत्। चित्रपटादौ।
आलेख्यशेष त्रि० आलेख्यं चित्रमेव शेषो यस्य ब०। मृते, तस्य चित्रे एव प्रतिकृतिरूपेण अवस्थानात्।
आलोक पु०आ+लुक-घञ्। दर्शने,उद्द्योते,वन्दिनामालोकशब्देत्यादि स्तुतिवाक्ये। "आलोकशब्दं वयसां विरावैरि"ति रघुः
आलोचन न० आ+लुच-ल्युट्। कर्त्तव्यतयाऽवधारणे, विवेचने च। "अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्। ततः परं पुनर्वस्तुधर्म्मैर्जात्यादिभिर्यया। बुद्ध्याऽवसीयते सापि

प्रत्यक्त्वेन सम्मते’ति सांख्योक्ते निर्द्धर्म्मके शुद्धवस्तुविषयके प्राथमिके ज्ञाने च ।

आवपन न० आउप्यते स्थाप्यतेऽत्र ल्युट् । धान्यस्थापनपात्रे (थल्या इति ख्याते । वप-णिच्-भावे ल्युट् । सर्व्वमुण्डने ।

आवरक न० आ+वृ-करणे अप् संज्ञायां वुन् । अपवरके, आच्छादके वस्त्रादौ ।

आवरण न० आ+वृ-करणे ल्युट् । (ढाल) चर्म्ममयफलके । भावे ल्युट् । आच्छादने, वेदान्तमतेऽविद्यादिना ज्ञान-प्रकाशाच्छादने च । [मिते च ।

आवर्जित त्रि० आ+वर्ज्ज-क्त । आहृते, क्षिप्ते, दत्ते, आन-

आवर्त्त पु० आ+वृत-घञ् । चक्राकारेण जलस्य स्वयं भ्रमणे, ध्रुवाख्ये रोमसंस्थानभेदे घोटकचिह्ने वामावर्त्तनामके मणौ आवर्त्तने, चिन्तने च । अच् । मेघाधिपभेदे माक्षिकधातौ च न०

आवर्त्तन न० आ+वृत-णिच् ल्युट् । (आवटान) दुग्धादेरा-लोडने । आवर्त्तते परिवर्त्तते यस्मिन् काले । मध्याह्नोत्तरं यदा प्रश्चिमतः पूर्व्वस्यां दिशि सूर्य्यच्छाया प्रथमं गच्छति, तस्मिन् काले ‘आवर्त्तनसमीपे वेति स्मृतिः । धातुद्रव्यस्य द्रवीकरणे च ।

आवर्त्तनी स्त्री० आवर्त्त्यते द्रवीकृत्य आलोड्यतेऽत्र आ+वृत णिच्-आधारे ल्युट् । ताम्रादिधातुद्रव्यस्य द्रवीकरणाधारे मृण्मये (मुची) पात्रभेदे, मूषायाम् ।

आवर्त्तित त्रि० आ+वृत-णिच् क्त । अभ्यस्ते, गुणिते च ।

आवर्ह पु० आ+वृह-घञ् । उत्पाटने । [स्त्रियां ङीप् ।

आवश्यक त्रि० अवश्यं भव्यः मनोज्ञा० वुञ् । नियतकृत्ये

आवसथ पु० आवसत्यत्र वस-अथच् । वसतिस्थाने, विश्राम-स्थाने, व्रतभेदे च । [मपनीततृणे राशीकृते धान्ये च ।

आवसित त्रि० आ+अव+सो-क्त । पक्वधान्ये, मर्दनानन्तर

आवहमान त्रि० आ+वह-शानच् । क्रमागते ।

आवाप पु० आ+वप-घञ् । आलवाले, (थल्या) पात्रभेदे, प्रक्षेपे, भाण्डे, वलये, शत्रुचिन्तने परराष्ट्रचिन्तने, निम्नोन्नत भूमौ, प्रधानहोमे च । [ष्ठाभरणे वलयादौ ।

आवापक पु० आ+वप-कर्म्मणि घञ् संज्ञायां कन् । प्रको-

आवापन न० आ+वप-णिच्-ण्वुल् । (तांत) सूत्रयन्त्रे ।

आवास पु० आ+वस-आधारे घञ् । वासस्थाने गृहादौ ।

आवाहन न० आ+वह-णिच् ल्युट् । सान्निध्याय देवानामाह्वाने

आविक न० अविना तल्लोम्ना निर्म्मितं ठक् । कम्बले । अवेर्मे-षस्य सम्बन्धिनि त्रि० । [इति ख्याते करमर्द्दवृक्षे च ।

आविग्न पु० आ+विज-कर्त्तरि क्त । उद्विग्ने (पाणिआमला)

आविद्ध त्रि० आ+व्यध-क्त । विद्धे, वक्रे, पराहते, क्षिप्ते, अभिभूते, मूर्खे च ।

आविध पु० आविध्यतेऽनेन व्यध-घञर्थे क । काष्ठादिवेधनसाधने (भमर) (तुरपिन) सूच्याकाराग्रे अस्त्रे । [व्याप्ते च ।

आविष्ट त्रि० आ+विश-क्त । भूतादिग्रस्ते, आवेशयुक्ते, निविष्टे,

आविस् अव्य० आ+उ-इस् । प्रकाशे । एतच्छब्देन सह भूधातुःप्रकाशार्थे यथा आविर्भावः । कृञ्धातुः प्रकाश करणेऽर्थे यथा आविष्कारः ।

आवीरचूर्ण पु० आ समन्तात् विशेषेण ईर्य्यते क्षिप्यते आ+वि+ईर-घञ् कर्म्म० । आवीर इति ख्याते फल्गुनि ‘आवीरचूर्णं रुचिरं गृह्यतां परमेश्वरे’ति पुराणम् ।

आवुक पु० आवति पालयति उण् संज्ञायां कन् । नाट्योक्तौ जनके

आवृत् स्त्री० आ+वृत-संपादादित्वात् क्विप् । परिपाट्यामनुक्रमे ।

आवृत त्रि० आ+वृ-क्त । वेष्टिते कृताच्छादने ।

आवृत्त त्रि० आ+वृत-क्त । निवृत्ते, ‘आवृत्तानां गुरुकुलादिति स्मृतिः अभ्यस्ते, गुणिते च ।

आवृत्ति स्त्री० आ+वृत-क्तिन् । अभ्यासे, पुनःपुनर्गुणने ‘चण्ड्याः शतावृत्तिपाठादि’ति पुराणम् । [वृद्धदारकवृक्षे ।

आवेगी स्त्री० आवेगोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष् ।

आवेश पु० आ+विश-घञ् । अहङ्कारभेदे, संरम्भे, अभि-निवेशे, आसङ्गे, अनुप्रवेशे, यथा भूतावेशः । ग्रहभये, भूतादिना रोगे च । [भूतावेशे रोगे, सूर्य्येन्दुपरिधौ च

आवेशन न० आ+विश-आधारे ल्युट् । शिल्पशालायाम्

आवेशिक त्रि० आवेशे गृहे भवः आगतो वा ठञ् । अतिथौ असाधारणे स्वकीये बान्धवादौ च । [(वेड़ा) ।

आवेष्टक पु० आवेष्टयति ण्वुल् । आवरणकारके प्राचीरादौ

आशंसा स्त्री० आ+शंस-अ । अप्राप्तस्य प्राप्तीच्छायाम्, इष्टार्थाशंसने च । [क्त । कथने न० ।

आशंसित त्रि० आ+शंसि-क्त । वाञ्छिते, कथिते च । भावे

आशंसु त्रि० आ+शन्स-उ । इच्छावति, इष्टार्थलाभेच्छौ, कथयितरि च ।

आशङ्का स्त्री० आ+शकि-अ । त्रासे, सङ्कोचे, ईषदितर्के च

आशय पु० आ+शी-अच् । अभिप्राये, आधारे, विभवे, पनसवृक्षे वैद्यकोक्ते अजीर्णे स्थाने च । आ फलविपाकात् चित्तभूमौ शेते इति कर्त्तरि अच् कर्म्मजन्ये वासनारूपे संस्कारे, धर्म्माधर्म्मरूपे अदृष्टे च । आधारे अच् । आशयवति चित्ते । भावे अच् । शयने स्थाने च ।

आशर पु० आशृणाति आ+शृ-अच् । अग्नौ, राक्षसे च ।

आशा स्त्री॰ आ समन्तात् अश्नुते अश-अच् । दिशि, अशक्योपायार्थविषयायाम्, दीर्घाकाङ्क्षायाम् अनधिगतविषयायां तृष्णायां च । [हेत॰ । तृष्णासंबन्धे दिशां बन्धे च ।

आशाबन्ध पु॰ आशां दिशं बध्नाति अच् । मर्कटजाले, बन्ध-घञ्

आशास्य त्रि॰ आ+शास-ण्यत् । आशीःसाध्ये, आशंसनीये च "आशास्यमन्यत् पुनरुक्तमि"ति रघुः ।

आशित त्रि॰ आ+क्र्यादि॰ अश-क्त । भुक्ते, अशनेन तृप्ते च ।

आशितङ्गवीन अशितङ्गवीनवत् सर्व्वम् । दीर्घादिरिति बहवः

आशितम्भव पु॰ अशितम्भववत् सर्व्वम् । दीर्घादिरिति बहवः

आशिस् स्त्री॰ आ+शास-क्विप् इत्त्वम् । हितप्रार्थने अभीष्टवृद्धिप्रार्थने, सर्पतालुस्थदन्ते, सर्पदंष्ट्रायामाशीत्यपि पृषो॰ ।

आशीर्व्वाद पु॰ आशिषोवादः वद-घञ् । मङ्गलप्रार्थने आशीर्व्वचने च ।

आशीविष पु॰ आशिषि आश्यां वा विषोऽस्य पृषो॰ । सर्पे ।

आशु अव्य॰ अश-उण् । क्षिप्रत्वे । वर्षाभवे षष्टिकादौ धान्ये, पाटले व्रीहौ च पु॰न॰ । क्षिप्रे त्रि॰ । क्रियाविशेषणत्वे न॰

आशुग पु॰ आशु+गम-ड । वायौ, वाणे, सूर्य्ये च । शीघ्रगामिनि त्रि॰

आशुपत्री स्त्री॰ आशु पत्रं यस्याः । शल्लकीलतायाम् ।

आशुशुक्षणि पु॰ आ+शुष-सन्+अनि । अग्नौ, वायौ च ।

आशौच न॰ अशौचमेव स्वार्थेऽण् । अशौचसमनार्थे वैदिककर्म्मानर्हावस्थायाम् ।

आश्चर्य्य न॰ आ इति चर्य्यतेऽभिनीयते आ+चर ण्यत् सुट् च । अपूर्व्वे अद्भुते चित्रे, विस्मये च । अद्भुतवति त्रि॰

आश्मन पु॰ आ+अश-मनन् । सूर्य्यसारथौ अरुणे । [रघुः

आश्यान त्रि॰ आ+श्यै-क्त । ईषद्घनीभूते 'पथश्चाश्यानकर्द्दमानि'ति

आश्रम पु॰ न॰ आ+श्रम-आधारे घञ् अवृद्धिः । ब्रह्मचर्य्यादिके शास्त्रोक्ते धर्म्मभेदे, मुनीनां वासस्थाने, मठे, वने च कलौ तु ब्रह्मचर्य्यवानप्रस्थौ न स्तः गृहस्थभिक्षुकाश्रमावेव "गृहस्थो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" इति स्मरणात् सर्व्वक्लेशहानेन विश्रामस्थाने परमेश्वरे च ।

आश्रमधर्म्म पु॰ आश्रमेषु विहितो धर्म्मः । ब्रह्मचार्य्यादीनां शास्त्रविहिते धर्म्मे ।

आश्रय पु॰ आ+श्रि-अच् । सामीप्ये, आधारे, गृहे, राज्ञां सन्धिप्रभृतिषु षट्सु गुणेषु मध्ये प्रबलशत्रोराश्रयणरूपे गुणे च

आश्रयाश पु॰ आश्रयमाधारं काष्ठमश्नाति अश-अण् । वह्नौ ।

आश्रव पु॰ आ+श्रु-अप् । अङ्गीकारे, क्लेशे च । आशृणोति वाक्यम् पचाद्यच् । प्रवर्त्तयितुं निवर्त्तयितुं वा शक्ये वचनस्थिते

आश्रित त्रि॰ आ+श्रि-क्त । आश्रयप्राप्ते, शरणागते, आधेये च

आश्रुत त्रि॰ आ+श्रु-क्त । अङ्गीकृते, आकर्णिते च ।

आश्लेष पु॰ आ ईषदेकदेशेन श्लेषः संबन्धः आ+श्लिष-घञ् । एकदेशसंबन्धे । [ऽण् । रथादौ त्रि॰ ।

आश्व न॰ अश्वानां समूहः अण् । अश्वसमूहे । अश्वैरूह्यते-

आश्वत्थ न॰ अश्वत्थस्य फलमित्यणि तस्य न लुक् । अश्वत्थफले ।

आश्वयुज पु॰ आश्वयुजी अश्विनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासेऽण् । शुक्लप्रतिपदादिके दर्शान्ते चान्द्रे आश्विने मासे

आश्वयुजी स्त्री॰ अश्वयुजा अश्विनीनक्षत्रेण युक्ता पौर्णमासी 'नक्षत्रेण युक्तः काल' इत्यण् । आश्विनमासीयपौर्णमास्याम्

आश्वास पु॰ आ+श्वस्-घञ् । निर्वृतौ आश्रयदाने भीतस्य भयनिवारणार्थे सान्त्वने च । [चान्द्रे मासि ।

आश्विन पु॰ आश्विनी पूर्णिमा यस्मिन् मासे । स्वनामख्याते

आश्विनी स्त्री॰ अश्विना अश्वाकारवता नक्षत्रेण युक्ता पूर्णिमा नक्षत्राण् । आश्विनमासिकपौर्णमास्याम् ।

आश्विनेय पु॰ द्वि॰ अश्विन्याः अश्वाकारवत्याः सूर्य्यपत्न्याः संज्ञाया अपत्ये ढक् । स्वर्वैद्ययोः । [गम्ये स्थाने ।

आश्वीन त्रि॰ अश्वेनैकाहेनातिक्रम्यते खञ् । अश्वस्य एकाह

आषाढ़ पु॰ आषाढी पूर्णिमाऽस्मिन् मासेऽण् । स्वनामख्याते मासे

आषाढी स्त्री॰ आषाढ़या नक्षत्रेण युक्ता पूर्णिमा 'नक्षत्रेण युक्तः काल' इत्यण् । आषाढमासीयपौर्णमास्याम् ।

आस उपवेशने अदादि॰ आत्म॰ अक॰ सेट् । आस्ते आसिष्ट

आस् अव्य॰ आस्-क्विप् । स्मरणे, अपाकरणे, कोपे, सन्तापे, पीड़ायां, सगर्व्वतर्जने च ।

आसक्त त्रि॰ आ+सन्ज-क्त । आसङ्गे युक्ते विषयान्तरनिष्ठ्या तत्परे च । नित्ये सतते च न॰ । तद्वति त्रि॰ ।

आसङ्ग न॰ आ+सन्ज-घञ् । अभिनिवेशे, प्राप्तस्योपस्थितस्यापि नाशतो रक्षणाभिलाषे, भोगाभिलाषे, कर्त्तृत्वाभिमाने च । तद्युक्ते त्रि॰ । सौराष्ट्रमृदि स्त्री॰ ।

आसत्ति स्त्री॰ आ+सद्-क्तिन् । संसर्गे, लाभे, सन्निधौ । न्यायादिमते यत्पदार्थेन यत्पदार्थस्यान्वयापेक्षा तयोरव्यवधानेन पदेनोपस्थापने च ।

आसन न॰ आस-ल्युट् । उपवेशने । आधारे ल्युट् पीठादौ, हस्तिस्कन्धदेशे, सन्ध्यादिषु षट्षु नृपगुणेषु शत्रुदुर्गादीन्यवरुध्य स्थितौ, यात्रानिवृत्तौ, अष्टाङ्गयोगमध्ये तृतीयेऽङ्गे पद्मासनादौ । अस्यति ल्यु स्वार्थेऽण् । जीरकवृक्षे पु॰ । युच् टाप् । स्थितौ ।

आसन्न त्रि॰ आ+सद-क्त । निकटस्थे, उपस्थिते च ।

आसव पु॰ आ+सु-अप् । मद्यमात्रे "शीधुरिक्षुरसैः पक्वै-

रपक्वै रासवो भवेदि''त्युक्तप्रकारे मद्ये च । [तालवृक्षे

आसवद्रु पु० आसवस्य (ताड़ी) मद्यस्य कारणं द्रुः शाक०त०।

आसादन न० आ+सद-णिच्-ल्युट् । सन्निधापने, स्थापने च

आसादित त्रि० आ+सद-णिच्-क्त । लब्धे, सन्निधापिते, आयोजिते च ।

आसार पु० आ+सृ घञ् । धारासम्पाते वेगवृष्टौ, प्रसरणे, सैन्यानां सव्वतो व्याप्तौ च । करणे घञ् । सुहृद्‌वले ।

आसीनप्रचलायित न० आसीनेन उपविष्टेनैव प्रचलवत् आचरितम् प्रचल-क्यच् क्त : उपविश्य निद्रावशेन प्रचलन रूपे (ढोला) दोलने । [घ्मादने (चोयान) इति ख्याते पाके

आसुति स्त्री० आ+सु-क्तिन् । सोमादिनिष्पीड़ने अभिषवे, मद्यनि-

आसुतीवल पु० आसुतिरस्यास्ति वलच् दीर्घः । शौण्डिके । सोमाभिषवशालिनि याज्ञिके त्रि० ।

आसुर पु० 'आसुरो द्रविणादाना'दित्युक्तलक्षणे धनदानेन कन्याविवाहे। असुरस्येदम् अण् । असुरसंवन्धिनि त्रि०। स्त्रियां ङीप् 'आसुरो रात्रिरन्यत्र' इति स्मृतिः ।

आसुरस्व न० ६त० । ''अयज्वनान्तु यद्‌द्रव्यमासुरस्वं तदु-च्यते'' इति मनूक्ते अयाज्ञिकधने ।

आसेचन त्रि० असेचन+स्वार्थेऽण् । असेचनार्थे अल्पतृप्तिकारकं यस्य दर्शनं तत्र । स्वार्थे कन् आसेचनकमप्यत्र ।

आसेध पु० आ+सिध-घञ् । राजाज्ञयाऽन्यत्र गमनादेः प्रति-षेधरूपेऽवरोधे ।

आसेवा स्त्री० आ+सेव-अ । अभिलाषपूर्व्वकं पौनःपुन्येन प्रवृत्तौ । [आधारे घञ् । रणे ।

आस्कन्दन न० आ+स्कन्द-ल्युट् । शोषणे, आक्रमणे च ।

आस्कन्दित न० आ+स्कन्द-स्वार्थे णिच्-क्त । अश्वगतिभेदे त्वरितगमने च । स्वार्थे कन् । आस्कन्दितकमप्यत्र ।

आस्तर पु० आ+स्तृ-करणे अप् । हस्तिपृष्ठस्थकम्बले झुल इति ख्याते । ल्युट् । आस्तरणमप्यत्र न० ।

आस्तिक त्रि० अस्ति परलोक इति मतिर्यस्य ठक् । परलोका-स्तित्ववादिनि ''अस्तीत्युक्त्वा गतो यस्मादास्तिकस्तेन कथ्यते इति निरुक्तसंज्ञाके जरत्कारुमुनिसुते । आस्तीकोऽप्यत्र।

आस्तिक्य न० आस्तिकस्य भावः कर्म्म वा। वैदिकधर्म्मे श्रद्धायाम्

आस्तीकजननी स्त्री० ६त० । जरत्कारुमुनिपत्न्यां जरत्कारु-नाम्न्यां वासुकिभगिन्यां मनसादेव्याम् ।

आस्था स्त्री० आ+स्था-अङ् । आलम्बने, अपेक्षायां, श्रद्धा-यां, स्थितौ, यत्ने च । आधारे अङ्। प्रतिष्ठायां, स्थाने च।

आस्थान न० आ+स्था-आधारे ल्युट् । सभायां, विश्रामस्थाने च । स्त्रीत्वमपि तत्र ङीप्। आस्थानीत्यप्यत्रैवार्थे ।

आस्थित त्रि० आ+स्था-क्त। आरूढे प्राप्ते, अङ्गीकृतवति च

आस्पद न० आ+पद-घ सुट् च । प्रतिष्ठायाम्, पदे, स्थाने, कृत्ये, प्रभुत्वे च । [''ऐरावतास्फालनकर्कशेनेति कुमारः

आस्फालन न० आ+स्फुर-णिच् ल्युट् स्फालादेशः । चालने

आस्फोट पु० आ+स्फुट-अच् । स्वयं फलस्य स्फोटनात् अर्कवृक्षे (तालठोका) मल्लादेर्वाह्वादेर्हस्तताडेन शब्दकरणे च । (हा-परमाली) वनमल्ल्यां स्त्री० । ल्युट् आस्फोटनमप्यत्र न०।

आस्फोटक पु० आस्फोटोऽर्कवृक्ष इव। (आखरोट) शैलपीलौ

आस्फोटनी स्त्री० आस्फोट्यते विदार्य्यतेऽनया अस्फुट-णिच्-करणे ल्युट् स्त्रीत्वात् ङीप्। (तुरपन) वेधनास्त्रे ।

आस्फोत पु० आ+स्फुट-अच् पृषो० टस्य तत्वम् । अर्कवृक्षे कोविदारवृक्षे, भूपलाशवृक्षे च । स्वार्थे कन् । आस्फोतकोऽर्कवृक्षे

आस्फोता स्त्री० आ+स्फुट-अच् पृषो० । अपराजितायां, वनमल्ल्याम् (हापरमाली) लताभेदे च ।

आस्य न० अस्यते ग्रासोऽत्र+अस-आधारे ण्यत् । मुखे । तन्मध्ये च । आस्ये भवः यति यलोपः । मुखभवे त्रि० ।

आस्यपत्र न० आस्यमेव पत्रमस्य । पद्मे ।

आस्यलाङ्गल पु० आस्यं लाङ्गलमिव भूविदारकं यस्य। शूकरे

आस्यलोमन् न० ६त० । पुरुषमुखजाते लोम्नि (दाड़ि) ।

आस्या स्त्री० आस-ण्यत् टाप् । स्थितौ, आसने च ।

आस्यासव पु० आस्यस्यासवः प्रसवः ६त० । लालायाम् (थुथु) (लाल) इति ख्यातायाम् । [अप् । निरन्तरास्रवणे ।

आस्रव पु० आस्रवति मनोऽनेन करणे अप् । क्लेशे । भावे

आस्वाद पु० आ+स्वद-कर्म्मणि घञ् । रसे।भावे घञ् । रसानुभवे

आह अव्य० आ+हन-ड । आक्षेपे, नियोगे, दृढ़सम्भाषने, उवाचेत्यर्थे 'अथाह वर्णी विदितो महेश्वर' इति कुमारः ।

आहत त्रि० आ+हन-क्त। गुणिते, ताड़िते, वन्ध्यासुतोऽस्ती-त्यादौ मृषार्थके वाक्ये च । ढक्कायाम् पु०। पुरातने नूतने च वस्त्रे न० ।

आहतलक्षण पु० आहतमभ्यस्तं लक्षणं यस्य । गुणैः प्रसिद्धे

आहर पु० आ+हृ-अच् । उच्छ्वासे, अन्तःस्थितस्य वायोर्मु-खेन वहिर्गतौ ।

आहव न० आह्वयन्तेऽरयोऽत्र आ+ह्वे-अप् संप्रसारणे गुणः । युद्धे । आहूयतेऽत्र आ+हु अप् । यज्ञे ।

आहवनीय पु० आहवनमर्हति छ । गार्हपत्याग्नेरुद्धृत्य हो-मार्थं कृतसंस्कारे वह्नौ । आ+हु-अनीयर् । हवनीये ।

आहार पु० आ+हृ-घञ् । आहरणे, द्रव्यमात्रस्य गलाधःक-

रणरूपे भोजने च । 'नीराहाराश्च ये जीवा' इति स्मृतौ जलपानेऽप्याहारशब्दः । कर्म्मणि घञ् । अन्नादौ भक्ष्ये ।

आहार्य्य त्रि० आ+हृ-ण्यत् । आहरणीये, आगन्तुके, कृत्रिमे, आरोप्ये नाट्ये रचिते रसादिव्यञ्जकभूषादौ च ।

आहाव पु० आ+ह्वे-घञ् संप्रसारणे वृद्धिः । कूपसमीपे गवादीनां जलपानाय प्रस्तरादिना रचिते (खाल) जलाशये, युद्धे, आह्वाने च । [कृते, कृताधानसंस्कारे च ।

आहित त्रि० आ+धाञ्-क्त । न्यस्ते, स्थापिते, अर्पिते,

आहितुण्डिक त्रि० अहितुण्डेन दीव्यति ठक् । व्यालग्राहिणि

आहुत त्रि० उद्देश्यस्य आभिमुख्येन साक्षादेव हुतं हु-क्त । गृहस्थकर्त्तव्येषु पञ्चसु यज्ञेषु । मनुष्ययज्ञे भूतयज्ञे चेत्यन्ये ।

आहुति स्त्री० आ+हु-क्तिन् । देवोद्देशेन मन्त्रेणाग्नौ हविःक्षेपे

आहेय न० अहेरिदम् ढक् । सर्पसंबन्धिनि चर्म्मविषादौ ।

आहो अव्य० आ+हन-डो । प्रश्ने, विकल्पे, विचारे च ।

आहोपुरुषिका स्त्री० अहमेव पुरुषः शूरः मयू० अहो पुरुषः तस्य भावः वुञ् स्त्रीत्वात् टाप् । दर्पजन्ये आत्मनि उत्कर्षसम्भावने ।

आहोस्वित् अव्य० आहो च स्विच्च द्व० । विकल्पे, प्रश्ने च ।

आह्निक त्रि० अह्ना साध्यं ठञ् । दिनसाध्ये, स्नानसन्ध्यातर्पणादौ च । इदमर्थे ठञ् । दिनसम्बन्धिनि । अध्यायान्तर्गते ग्रन्थस्य प्रकरणसमूहे न० ।

आह्लाद पु० आ+ह्लद-घञ् । आनन्दे । [च ।

आह्वय पु० आ+ह्वे श । नामनि संज्ञायाम् प्राणिसाधने द्यूते

आह्वान न० आ+ह्वेञ् ल्युट् । आकारणे आहूतौ च ।

इ

इ पु० अस्य विष्णोरपत्यम् अ+इञ् । कामे । अस्येदम् अ+इञ् । भेदे, रोषोक्तौ, निराकरणे, अनुकम्पायाम्, खेदे, विस्मये, निन्दायाम्, सम्बोधने च । [मुद्राभञ्जन इत्युद्भटः ।

इ गतौ भ्वादि० पर० सक० अनिट् । अयति ऐषीत् । अयमुदयति

इक् स्मरणेऽधिपूर्व्वक एव कित् अदादि० पर० सक० अनिट् । अध्येति अध्यैषीत् इण इव तिङि न कृति । अधीयन् ।

इक्षु पु० इष-क्सु । मधुररसयुते असिपत्रे स्वनामख्याते वृक्षे ।

इक्षुकाण्ड पु० इक्षोः काण्ड इव काण्डोऽस्य । काशवृक्षे ।

इक्षुकुट्टक पु० इक्षुं कुट्टयति कुट्ट-ण्वुल् । गुडकारके लवणादौ । [क्षुद्रगोक्षुरे च ।

इक्षुगन्ध पु० इक्षोरिव गन्ध एकदेशावयवो यस्य । काशतृणे,

इक्षुगन्धा स्त्री० इक्षोर्गन्ध इव गन्धोऽस्याः । शुक्लविदार्य्याम्, कृष्णभूमिकुष्माण्डे, काशे, गोक्षुरे च । स्वार्थे के अत इत्वम् । इक्षुगन्धिका भूमिकुष्माण्डे । [धान्यविशेषे ।

इक्षुतुल्या स्त्री० इक्षुणा तुल्या पत्रादिना । (जनार) ।

इक्षुनेत्र न० इक्षुर्नीयते पुनरुत्पादनायारोप्यतेऽनेन नी-ष्ट्रन् । इक्षोर्नेत्रमिव वा इक्षूत्पादके इक्षुनेत्राकारे तद्ग्रन्थौ ।

इक्षुपत्र पु० इक्षोः पत्रमिव पत्रमस्य । (जनार) धान्यभेदे ।

इक्षुप्र पु० इक्षुरिव पूर्य्यते पृ-कर्म्मणि घञर्थे क । शरवृक्षे ।

इक्षुमती स्त्री० इक्षुस्तद्रसोऽस्त्यास्यां मतुप् । नदीभेदे ।

इक्षुमूल पु० इक्षोर्मूलं ग्रन्थिरिव मूलं ग्रन्थिर्यस्य । वंशवृक्षे । ६त० । इक्षुमूले तद्ग्रन्थौ न० । [इक्षुनिष्पीड़ने यन्त्रे ।

इक्षुयन्त्र न० इक्षोस्तन्निष्पीड़नस्य यन्त्रम् । (महाशाल)

इक्षुर पु० इक्षुमिक्षुगन्धं राति रा-क । (तालमाखना) कोकिलाख्ये वृक्षे, काशे च । ततः स्वार्थे क । तत्रार्थे, स्थूलशरे च ।

इक्षुरस पु० इक्षो रस इव रसो यस्य । (नडा) इति ख्याते तृणभेदे । ६त० । इक्षोः रसे ।

इक्षुरसक्वाथ पु० इक्षुरसस्य क्वाथः पाकभेदः । गुड़े ।

इक्षुवल्ली(ल्लरी) स्त्री० इक्षुरिव सुस्वादा वल्ली वल्लरी वा लता । क्षीरविदार्य्याम् । [इक्षुक्षेत्रे ।

इक्षुव(टि)टीका स्त्री० इक्षोर्वाटीव इवाऽर्थे के वा ह्रस्वः ।

इक्षुवालिका स्त्री० इक्षुरिव वलति ण्वुल् । तालमाखना इति ख्याते वृक्षे, काशे च ।

इक्षुशर पु० इक्षुरिव शृणाति शॄ-अच् । काशभेदे तद्वने गन्तुर्गात्रक्षतेर्दृष्टत्वात् तस्येक्षुवत् हिंसकत्वम् ।

इक्षुशाकट पु० इक्षूणां भवनं क्षेत्रम् इक्षु+शाकटच् । (दो) (कल्प) इति ख्याते इक्षुभवनयोग्ये क्षेत्रे । तदर्थे शाकिन् । इक्षुशाकिनशब्दोऽप्यत्रार्थे ।

इक्षुसार पु० ६त० । गुड़े । [ख्यात सूर्य्यवंश्ये आदिराजे च ।

इक्ष्वाकु पु० इक्षुमिच्छामाकरोति इक्षु+आ+कृ-डु । कटुतु-

इक्ष्वारि पु० इक्षुरिवासमन्तादृच्छति आ+ऋ-इन् । काशतृणे

इक्ष्वालिका पु० इक्षुरिव अलति व्याप्नोति ण्वुल् । काशे ।

इख गतौ भ्वादि० पर० सक० सेट् । एखति ऐखीत् ।

इखि गतौ इदित् भ्वादि० पर० सक० सेट् । इङ्खति ऐङ्खीत् ।

इगि गतौ इदित् भ्वादि० पर० सक० सेट् । इङ्गति ऐङ्गीत् ।

इङ् अध्ययने अधिपूर्व्व एव ङित् अदा० आत्म० सक० अनिट् । अधीते अध्यैष्ट अध्यगीष्ट । अधिजगे, अध्यैष्यत अध्यगीष्यत ।

इङ्गित न० इगि-क्त । अभिप्रायव्यञ्जकदैहिकचेष्टायाम् ।

इङ्गुद पु० इः उ इङ्गुः रोगस्तम् द्यति दो-क । तापसतरौ

गौरा० ङीष् इङ्गुदीत्यप्यत्रैव। [त्रि०।

इच्छक पु० इष-शक। टावालेवु इति ख्याते वृक्षे। इच्छायुक्ते

इच्छा स्त्री० इष-श। इदं मे भूयादिति मनोधर्मभेदे सुखे तत्साधने च चित्तवृत्तौ न्यायमते,"निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते। इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदी"त्युक्तदिशा सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवं रूपे आत्मधर्म्मे अभिलाषे च।

इच्छावती स्त्री० इच्छाऽस्त्यस्याः मतुप् मस्य वत्वम्। मैथुनेच्छावत्यां कामुकायाम् इच्छामात्रयुक्तायाञ्च।

इच्छु त्रि० इष-उ नि०। इच्छायुक्ते, इच्छाशीले च। [वृक्षे।

इज्जल पु० इण्-क्विप् तुक् इत् जलं यस्य। (हिजल) निचुल

इज्य पु० इज्यतेऽसौ यज-क्यप्। सुरगुरौ, नारायणे च। पूज्ये त्रि०

इज्या स्त्री० यज-भावे-क्यप् स्त्रीत्वात् टाप्। यज्ञे,यजेर्दानाद्यर्थत्वात् दाने,सङ्गमे च। कर्म्मणि क्यप्। प्रतिमायां, गवि, कुट्टन्याञ्च। [अच्। पुनःपुनर्यज्ञकारके।

इज्याशील त्रि० इज्यां यज्ञं शीलयति पुनः पुनराचरति शील-

इट गतौ भ्वादि० पर० सक० सेट्। एटति ऐटीत्।

इड़ा स्त्री० इल-अच् वा लस्य डत्वम्। गवि, वाचि, भूमौ, स्वर्गे, वामपार्श्वस्थायाम् वक्रायां नाड्याञ्च।

इण् गतौ णित् अदादि० पर० सक० अनिट्। एति ऐषीत्।

इतर त्रि० इना कामेन तरः तृ-अ। नीचे भिन्ने पामरे च।

इतरेतर त्रि० इतर+द्वित्वम्। अन्योन्यार्थे परस्परार्थे।

इतरेतरयोग पु० इतरेतरस्य परस्परस्य योगः एकपदार्थान्वयित्वेन संबन्धः। चार्थविशेषे, व्याकरणे यत्र द्वन्द्वसमासे समस्यमानानां पदानां प्राधान्यं तदर्थे।

इतरेद्युस् अव्य० इतर-एद्युस्। अन्यस्मिन्नहनीत्यर्थे।

इतस् अव्य० इदम्+तसिल्। अस्मिन्नित्यर्थे।

इतस्ततः अव्य० इतश्च ततश्च। अस्मिन् तस्मिन्नित्यर्थे।

इति अव्य० इण-क्तिच्। हेतौ, प्रकाशने, निदर्शने, प्रकारे, अनुकर्षे, समाप्तौ, प्रकरणे, स्वरूपे, सान्निध्ये, विवक्षानियमे,मते, प्रत्यक्षे, अवधारणे, व्यवस्थायाम्, परामर्शे, माने, इत्थमर्थे,प्रकर्षे, उपक्रमे च।

इतिकर्त्तव्यता स्त्री० इति इदं कर्त्तव्यं तस्य भावः। इदं कृत्वा इदं कुर्य्यादित्येवं परिपाटीरूपे कर्म्मानुष्ठानक्रमे।

इतिह अव्य० इति एवं ह किल द्व०। उपदेशपरम्परायाम् यथाऽत्र वटे यक्ष इत्युपदेशपरम्परैव न तु केनापि दृष्टा तथा कथितम्।

इतिहास पु० इतिह पारम्पर्य्योपदेश आस्तेऽस्मिन् इतिह+आस घञ्। "धर्म्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पूर्व्ववृत्तकथायुक्तमितिहासं प्रचक्षते इत्युक्तलक्षणे पुरावृत्तप्रकाशके भारतादिग्रन्थे।

इत्थम् अव्य० इदम्+थमु। इदंप्रकारे अनेन प्रकारेणेत्यर्थे।

इत्थम्भूत त्रि० इदंप्रकारं भूतः प्राप्तः भू-क्त। एवं प्रकारप्राप्ते।

इत्वर त्रि० इण् वरप्। पथिके,नीचे, क्रूरकर्म्मणि च। षण्डे पु०। अभिसारिकायां स्त्री०।

इद ऐश्वर्य्ये इदित् भ्वादि० पर० अक० सेट्। इन्दति ऐन्दीत्

इदम् त्रि० इदि-कमि नलोपश्च। पुरोवर्त्तिनि दृश्ये चराचरे

इदानीम् अव्य० इदम्+दानीम् इश् च। सम्प्रत्यर्थे।

इद्ध न० इन्ध-भावे क्त। आतपे, दीप्तौ,आश्चर्य्ये च। कर्त्तरि-क्त। दृढे,निर्म्मले च त्रि०।

इध्म न० इन्ध-मक्। समिधि, अग्निसन्दीपने काष्ठे च।

इन पु० इण-नक्। सूर्य्ये, प्रभौ, नृपविशेषे च।

इन्दिरा स्त्री० इदि-इर। लक्ष्म्याम्। [नीलोत्पले।

इन्दि(न्दी)वर न० इन्दिरिन्दी वा लक्ष्मीस्तस्या वरमभीष्टम्।

इन्दीवरिणी स्त्री० इन्दीवर+समूहे देशे वार्थे इनि। उत्पलसमुदाये, तद्युक्तलतायाञ्च। [शतमूल्याम्।

इन्दीवरी स्त्री० इन्दीं लक्ष्मीं वृणाति वृ-अच् गौरा० ङीष्।

इन्दु पु० उनत्ति चन्द्रिकया भुवं क्लिन्नां करोति उन्द-उ आदेरिच्च। चन्द्रे, तद्देवताके मृगशिरोनक्षत्रे तत्समसंख्ये एकसंख्यायुक्ते, कर्पूरे च।

इन्दुकलिका स्त्री० इन्दुरिव शुभ्रा कलिका यस्याः। केतक्याम्

इन्दुकान्तः पु० इन्दुः कान्तोऽभीष्टोऽस्य। चन्द्रकान्ते मणौ।

इन्दुजनक पु० ६त०। समुद्रे। [नद्याम्।

इन्दुजा स्त्री० इन्दोर्जायते जन-ड। सोमोद्भवायां नर्म्मदायां

इन्दुपुत्र पु० ६त०। बुधग्रहे। [जाङ्गलीवृक्षे।

इन्दुपुष्पिका स्त्री० इन्दुरिव शुभ्रं पुष्पमस्याः। (विषलाङ्गला)

इन्दुभृत् पु० इन्दुं बिभर्त्ति भृ-क्विप्। शिवे। [राजपत्न्याञ्च।

इन्दुमती स्त्री० इन्दु+प्राशस्त्ये मतुप्। पूर्णिमायाम्, अज-

इन्दुरत्न न० ६त०। मुक्तायां तस्याश्चन्द्रदेवताकत्वात्।

इन्दुलेखा स्त्री० इन्दोर्लेखेव। चन्द्रकलायाम्। तदंशनाम्न्यां सोमलतायाम्, तद्वत्आप्यायनकारिण्याममृतायां, तद्वद्ज्ज्वलगुणत्वात् यमानिकायाञ्च।

इन्दुलौहक न० ६त०। इन्दुदेवताके लौहके रौप्ये धातौ।

इन्दुवल्ली स्त्री० ६त०। चन्द्रनामिकायां सोमलतायाम्।

इन्द्र पु० इदि+र। देवाधिपे, परमेश्वरे, इन्द्रदैवते ज्येष्ठानक्षत्रे,

द्वादशार्कमध्ये अर्कभेदे, इन्द्रतुल्यसंख्याके चतुर्द्दशसंख्यान्विते, विष्कुम्भादितः षड्विंशे योगे, कुटजवृक्षे च ।

इन्द्रक न० इन्द्रस्य कं सुखमिव कं यत्र । सभागृहे ।

इन्द्रकील पु० इन्द्रस्य कीलइव अत्युच्चत्वात् । मन्दरपर्व्वते ।

इन्द्रकोष पु० इन्द्रस्य कोषइव सुखदायकत्वात् । मञ्चे, खट्वायाञ्च

इन्द्रगोप पु० इन्द्रो गोपो रक्षकोऽस्य वर्षाभवत्वात् । इन्द्ररक्षिते रक्तवर्णे कीटभेदे ।

इन्द्रजाल न० इन्द्रेण कौशलाद्यैश्वर्य्येण जालं दृष्टेरावरणम् यथास्थितवस्तुदर्शनाक्षमत्वसाधनात् । मन्त्रौषधादिना अन्यथास्थितस्य वस्तुनोऽन्यथात्वेन दर्शनसाधने कुहके (वाजी)।

इन्द्रजालिक त्रि० इन्द्रजालं शिल्पमस्य ठन् । कुहककारिणि

इन्द्रजित् पु० इन्द्रं जितवान् जि-भूते क्विप् । रावणसुते मेघनादे

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वादिन्द्रस्वामिकत्वम् । आकाशे मरुता चाल्यमाने कार्पासे सूत्रे ।

इन्द्रदारु पु० इन्द्रस्य तद्भुवनस्य दारु अत्युच्चायतयाकाशगामित्वादिन्द्रभुवनदारुत्वम् । देवदारुवृक्षे ।

इन्द्रद्रु पु० इन्द्रस्य द्रुर्वृक्षः । अर्ज्जुनवृक्षे, कुटजवृक्षे च ।

इन्द्रधनुस् न० इन्द्रस्य धनुरिव । "रविकिरणा बहुवर्णा वातेन विलोड़िता नभसि । शक्रायुधसंस्थाना दृश्यन्ते तत्तु इन्द्रधनुरि"त्युक्ते नभसि वायुचालिते शक्रधनुराकारेण परिणते रविकिरणे ।

इन्द्रध्वज पु० न० इन्द्रस्य ध्वजः । भाद्रशुक्लद्वादश्यां नृपेण प्रजावृद्ध्यर्थं पूज्यमाने उच्छ्रिते शक्रदेवताके ध्वजे ।

इन्द्रनील पु० इन्द्र इव नील । "क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेत्नीलतां नयेत् । इन्द्रनीलमि"ति ख्यातमित्युक्तलक्षणे (पान्ना) मरकतमणौ ।

इन्द्रपुष्पा स्त्री० इन्द्र इव नीलं पुष्पमस्याः (विषलाङ्गला) जाङ्गलीवृक्षे । ब० वा कपि । इन्द्रपुष्पिकाप्यत्र । [पुरे ।

इन्द्रप्रस्थ न० इन्द्रस्यतत्स्थानमेरोःप्रस्थइव (दिल्लीति) ख्याते

इन्द्रभेषज न० इन्द्र इव भेषजं श्रेष्ठत्वात् । (शुंट्) शुण्ठ्याम् ।

इन्द्रमहकामुक पु० इन्द्रमहं कामयते कम-उक । कुक्कुरे ।

इन्द्रयव न० पु० इन्द्रस्य कुटजवृक्षस्य यवाकृतिवीजत्वात् यवो वीजम् । कुटजवृक्षस्य यवाकारे तिक्तरसे वीजे स्वनामख्याते । [रोगे । इन्द्रेण लुप्ते । त्रि० ।

इन्द्रलुप्त न० ३त०। (टाक) इति ख्याते मस्तकोपरि केशनाशके

इन्द्रलुप्तिक त्रि० इन्द्रलुप्तमस्यास्ति ठन् । (टाक) रोगयुक्त शीर्षके (टेको इतिख्याते जने ।

इन्द्रवंशा स्त्री० वर्णवृत्तेषु द्वादशाक्षरपादके छन्दोभेदे ।

इन्द्रवज्रा स्त्री० वर्णवृत्तेषु एकादशाक्षरपादके छन्दोभेदे ।

इन्द्रवारुणी स्त्री० इन्द्रं वारयति वृ० वृ-उनन् । (राखाल शसा) तिक्तरसायां श्वेतमूलायां पीतपुष्पायां लतायाम् ।

इन्द्रवृक्ष पु० ६त० । देववारुवृक्षे ।

इन्द्रवृद्धा स्त्री० ३त०। व्रणरोगभेदे ।

इन्द्रव्रत न०इन्द्रस्येव वर्षणे व्रतम् । "वार्षिकांश्चतुरो मासान् यथेन्द्रोऽप्यभिवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन्नि"ति स्मृत्युक्ते प्रजापालने राज्ञोव्रतभेदे ।

इन्द्रशत्रु पु० इन्द्रः शत्रुः शातयिता यस्य । वृत्रासुरे ।

इन्द्रसावर्णि पु० चतुर्दशे मनौ । [वालिनामके वानरे च ।

इन्द्रसुत पु० ६त० । जयन्ते, मध्यमपाण्डवे पार्थे, अर्ज्जुनवृक्षे,

इन्द्रसुरस पु० इन्द्रः कुटजवृक्ष इव सुरसः पथ्यरसः । (निसिन्दा) सिन्धुवारे ।

इन्द्राणिका स्त्री०इन्द्रः कुटजइव आनयति सेवनेन जीवयति अन-णिच्-ण्वुल् संज्ञात्वेन णत्वम् । निर्गुण्ड्याम्(निसिन्दा)

इन्द्राणी स्त्री० इन्द्रस्य पत्नी ङीष् आनुक् च । शचीनाम्न्यामिन्द्रपत्न्याम् । इन्द्रः कुटज इव आनयति अन-णिच्-अण् (निसिन्दा) सिन्धुवारे वृक्षे स्थूलैलायां, सूक्ष्मैलायां, गौर्य्यादिषु षोड़शमातृकासु मध्ये आद्यायां मातृकायाञ्च ।

इन्द्रानुज पु० ६त०। विष्णौ, स हि कश्यपाददितौ वामनरूपेण इन्द्रस्य पश्चात् जातः ।इन्द्रावरजोऽप्यत्र ।

इन्द्रायुध न० इन्द्रस्यायुधं धनुरिव । इन्द्रधनुःशब्दार्थे ।

इन्द्राशन पु० इन्द्रेण अश्यते भुज्यते कर्म्मणि ल्युट् । (सिद्धि) भङ्गायाम् ।

इन्द्रिय न० इन्द्रस्य प्रत्यगात्मनः लिङ्गमनुमापकम्, तेन दृष्टं मम चक्षुः मम श्रोत्रमित्येवमभिमतम्, इन्द्रेण ईश्वरेण सृष्टं, प्रीणितं वेत्याद्यर्थे इन्द्र+घ । आत्मनो विषयोपलब्धिकरणतयेश्वरसृष्टेषु ज्ञानकर्म्मसाधनेषु चक्षुरादिषु । [प्रतिबन्धे

इन्द्रियनिग्रह पु० ६त०। स्वस्वविषयेभ्यश्चक्षुरादीनां प्रवृत्ति

इन्द्रियबध पु० ६त०। इन्द्रियाणां स्वस्वकार्य्याक्षमत्वरूपे "बाधिर्य्यं कुष्ठतान्धत्वं जडताऽजिघ्रता तथा । मूकता कौण्यपङ्गुत्वक्लैव्योदावर्त्तमत्तता" इत्युक्तप्रकारे एकादशेन्द्रियाणां क्रमेणैकादशविधे घाते ।

इन्द्रियवृत्ति स्त्री० ६त०। "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानामि"ति सांख्योक्ते श्रोत्रादीनां शब्दादिषु प्रकाशनार्थे व्यापारे।

इन्द्रियसंप्रयोग पु० इन्द्रियाणां संप्रयोगः स्वस्वविषयेषु प्रयोगः व्यापारणम् । इन्द्रियसम्बन्धे । इन्द्रियसन्निकर्षोऽप्यत्र

इन्द्रियार्थ पु॰ इन्द्रियाणामर्थो विषयः । शब्दस्पर्शरूपरस-
गन्धात्मके इन्द्रियवेद्ये विषये ।

इन्द्रियायतन न॰ ६त॰ । शरीरे ।

इन्द्रियार्थसन्निकर्ष पु॰ इन्द्रियाणामर्थैः स्वस्वविषयैः सह
सन्निकर्षः संबन्धः । प्रत्यक्षज्ञानहेतौ इन्द्रियविषयसंयोगे ।

इन्ध दीप्तौ भ्वादि॰आत्म॰अक॰ सेट् । इन्धते, ऐन्धिष्ट ।

इन्धन न॰ इध्यतेऽग्निरनेन इन्ध-करणे ल्युट् । काष्ठे ।

इभ पु॰ इण्-भ किच्च । हस्तिनि, तत्तुल्यसंख्यके अष्टसंख्यान्विते च

इभकणा स्त्री॰ इभोपपदा कणा शाक॰त॰। गजपिप्पल्याम् ।

इभदन्ता स्त्री॰ इभस्य दन्तइव शुभ्रं पुष्पमस्याः । शुभ्र-
पुष्पवत्यां नागदन्त्याम्, विषौषधौ च ।

इभनिमीलिका स्त्री॰ इभं हस्तिनमपि निमीलयति सेवनात्
निद्रापयति । भङ्गायाम् ।

इभपालक पु॰ इभं पालयति । (माहुत) हस्तिपके ।

इभया स्त्री॰ इभैर्यायते भक्ष्यतया प्राप्यते या कर्म्मणि क।
स्वर्णक्षीरावृक्षे । [न्दपे च ।

इभ्य त्रि॰ इभं हस्तिनमर्हति यत् । प्रचुरधनवति आढ्ये,

इभ्या स्त्री॰ इभावहिता इभ+यत् । शल्लकीवृक्षे । [ङीप्

इयत् त्रि॰ इदं परिमाणमस्य इदम्-वतुप् । एतावदर्थे स्त्रियां

इयत्ता स्त्री॰ इयतो भावः तल् । सीमायां, परिमाणे, संख्यायाञ्च

इरम्मद पु॰ इरया जलेन माद्यति वर्द्धते इरा-मद-खश्
ह्रस्वः मुम् च । वज्राग्नौ वाड़वानले च ।

इरा स्त्री॰ इण् रक् इं कामं राति रा-क वा । भूमौ, वाचि,
सुरायाम्, जले, अन्ने च । [जलचरे, भूचरे च त्रि॰

इराचर न॰ इरासु चरति चर-ट । (शिल) करकायाम् ।

इराज पु॰ इरया सुरया वीयतेऽसौ अज-घञ् । कन्दर्पे ।

इरावती स्त्री॰ इरां भूमिम् अवति अव-शतृ ङीप् । वट-
पत्त्रीवृक्षे, सा हि पाषाणभेदनेनापि भूमिमागच्छति ।

इरिण न॰ ऋ-इन किच्च । ऊषरभूमौ, निरालम्बे, शून्ये च

इरेश पु॰ ६त॰। वरुणे, वागीशे, भूमिपतौ, विष्णौ च ।

इर्वारु स्त्री॰ उर्व्व-आरु पृषो॰। (काकुड़) कर्कट्याम्। आलु ।
इर्व्वालुरप्यत्र । [फुटी (स्वयं भिन्नपक्वकर्कट्याम्) ।

इर्व्वारु(लु)शुक्तिका स्त्री॰ इर्वारुः शुक्तिकेव स्वयं स्फोटनात्

इल शयने अक॰गतौ क्षेपे च सक॰ तुदा॰ पर॰सेट् । इलति

इल क्षेपणे चुरा॰ उभ॰सक॰ सेट् । एलयति ते ऐलिलत् त ।

इलविला स्त्री॰ पुलस्त्यमुनिपत्न्याम् कुवेरजनन्याम् । एतत्स-
म्बन्धेनैव कुवेरस्य ऐलविल इति नाम ।

इला स्त्री॰इल-क । भूमौ, गवि, वाचि, जम्बुद्वीपस्थनववर्षमध्ये
वर्षभेदे तत्सीमा चेलावृतशब्दार्थे वक्ष्यते । वैवस्वतमनुक-
न्यायां बुधपत्न्याम् । सा हि विष्णुवरात् पुंस्त्वमासाद्य
पुनः शङ्करशापात् स्त्रीत्वं गता बुधस्तु तामुपयम्य पुरूरवस-
मुत्पादयामासेति पुराणे प्रसिद्धम् ।

इलावृत न॰इला पृथिवी वृता येन । नववर्षात्मकजम्बुद्वीपस्य
वर्षभेदे तत्र वर्षद् "पश्चान्माल्यवतः प्राच्यां गन्धमादन-
शैलतः । इलावृतं नीलगिरेर्याम्यतोनिषधादुदक्" इत्यु-
क्त चतुःसीमावच्छिन्ने देशेऽस्ति ।

इली स्त्री॰ इल-इन् ङीष् । (हात्छुरी) करवालिकायाम् ।

इलीश ॰ इलीव करवालिकेव शोभते शुभ-ड । करवालिका
सदृशावयवे स्वनामख्याते मत्स्यभेदे ।

इल्वल पु॰ इल-वलच् नि॰ गुणाभावः अत्यन्तचञ्चले मत्स्यभेदे,
वशिष्ठनाशिते दैत्यभेदे च मृगशिरोदेशस्थपञ्चताराशिर-
स्थासु तारासु स्त्री॰ ब॰व॰ ।

इव व्याप्तौ इदित् भ्वा॰पर॰सेट् सक॰ । इन्वति ऐन्वीत ।

इव अव्य॰ इवि-क । सादृश्ये, उत्प्रेक्षायाम्, ईषदर्थे, वाक्यालङ्कारे च

इष गतौ सर्पणे च दिवा॰पर॰सक॰सेट् । इष्यति, ऐषीत् ।

इष वाञ्छायाम् तुदा॰पर॰सक॰सेट् । इच्छति, ऐषीत् एषिता-
एष्टा एषित्वा इष्ट्वा । इष्टः । [एषितः एषित्वा ।

इष पौनःपुन्ये क्र्यादि॰ पर॰ अक॰ सेट् । इष्णाति ऐषीत् ।

इष पु॰ इष-गतौ क्विप् यात्रा जिगीषूणां सात्यस्मिन् अर्श
आद्यच् । आश्विने मासि ।

इषि(षी)का स्त्री॰ ईष गत्यादिषु (इ) ईकन् कित् ह्रस्वश्च ।
गजनेत्रगोलके । दीर्घमध्यस्तु काशे, मुञ्जामध्यवर्त्तितृणे च

इषु पु॰ स्त्री॰ ईष्यते हिंस्यतेऽनेन ईष-उ कित् ह्रस्वश्च । वाणे
तत्तुल्यसंख्ये पञ्चसंख्यान्विते च ।

इषुधि पु॰ स्त्री॰ इषवो धीयन्तेऽत्र धा-कि । वाणाधारे तूणे ।

इषुपुङ्खा स्त्री॰ इषोः पुङ्खमिव पुष्पमस्याः । शरपुङ्खावृक्षे ।

इष्ट त्रि॰ इष-क्त । पूजिते, अभिलषिते, प्रिये च । यज-क्त ।
यज्ञादौ कर्म्मणि, एरण्डवृक्षे च पु॰ । संस्कारे न॰ ।
"एकाग्निकर्म्म हवनं त्रेतायां यच्च हूयते । अन्तर्वेद्याञ्च
यद्दानमिष्टं तदभिधीयते । अग्निहोत्रं तपः सत्यं वेदाना-
ञ्चार्थपालनम् । आतिथ्यं वैश्वदेवञ्च प्राकुरिष्टमित्युक्तलक्षणे
धर्म्मकार्य्ये च ।

इष्टका स्त्री॰ इष-तकन् । (इट्) मृदादिनिर्म्मिते मृत्खण्डभेदे

इष्टकापथ न॰ इष्टकाभिनिर्म्मितः पन्थाः । इष्टकानिर्म्मिते
पथि । इष्टं कापथमपानं यस्य । अधोवायुहेतौ उशीरे ।

इष्टगन्ध त्रि॰ इष्टो गन्धो यस्य । सुगन्धिद्रव्ये । वालुकायां न॰

इष्टा स्त्री० इज्यतेऽनया यज-करणे क्त । शमीवृक्षे ।

इष्टापूर्त्त न० इष्टं च पूर्त्तञ्च द्वयोः समाहारः पूर्व्वपददीर्घः । प्रागुक्ते अग्निहोत्रादौ इष्टे, "वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" इति मनूक्ते पूर्त्ते च ।

[इष-क्तिन् । अभिलाषे ।

इष्टि स्त्री० यज-क्तिन् । यागे, दर्शपौर्णमासाङ्गयागभेदे च ।

इष्वसन पु० अस्यते क्षिप्यतेऽनेन अस-ल्युट् ६तत० । धनुषि ।

इष्वास पु० इषवः अस्यन्तेऽनेन अस-घञ् ६तत०। चापे । इषून् अस्यति अण् । बाणक्षेपके धन्विनि त्रि० ।

इह अव्य० इदम्+ह इशादेशः। अस्मिन् काले देशे दिशि वा ।

इहत्य त्रि० इह भवः इह+त्यप् । इहकालादिजाते ।

ई

ई स्त्री० अस्य विष्णोः पत्नी ङीष् । लक्ष्म्याम् ।

[ऐषीत्

ई कान्तौ अक०, गतौ व्याप्तौ च सक० अदा० पर० अनिट् । एति

ई गतौ दिवा० आत्म० सक० अनिट् । ईयते ऐष्ट ।

ईक्ष दर्शने भ्वादि० आत्म० सक० सेट् । ईक्षते ऐक्षिष्ट ।

ईक्षण न० ईक्ष-भावे ल्युट् । दर्शने । करणे ल्युट् । नेत्रे ।

ईक्षणिक त्रि० ईक्षणं हस्तरेखादीक्षणे शुभाशुभदर्शनं शिल्पमस्य ठन्। शुभाशुभफलकथनेनोपजीविनि दैवज्ञे । स्त्रियां टाप्

ईक्षा स्त्री० ईक्ष-अ । दर्शने ।

ईख गतौ इदित् भ्वादि० पर० सक० सेट् । ईङ्खति ऐङ्खीत् ।

ईज गतौ निन्दायाञ्च भ्वा० आत्म० सक० सेट् । ईजते ऐजिष्ट

ईज गतौ निन्दने च इदित् भ्वा० आत्म० सक० सेट् । ईञ्जते ऐञ्जिष्ट

ईड स्तुतौ चुरा० उभ० सक० सेट् । ईडयति ते ऐडिडत् त

ईड स्तुतौ अदा० आत्म० सक० सेट् । ईट्टे ईडिषे ईडिध्वे ऐडिष्ट

ईडा स्त्री० ईड-अ । स्तुतौ ।

ईडित त्रि० ईड-क्त । स्तुते कृतस्तवे ।

ईति स्त्री० ईयतेऽनया ई-क्तिन् । डिम्बे, उत्पादिते, प्रवादे, "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृता" इत्युक्ते कृषेरुपद्रवे च ।

[ईदृशी

ईदृक्ष त्रि० अस्येव दर्शनमस्य । इदम्+दृश-क्स इशादेशे दीर्घः।

ईदृश्(श) त्रि० अस्येव दर्शनमस्य । इदम्+दृश क्विन्-इशादेशः दीर्घः। एतादृशे। ट-ईदृशोऽप्यत्र । स्त्रियां ङीप् । [च्छायाञ्च ।

ईप्सा स्त्री० आप्तुमिच्छा आप-सन्-अ । प्राप्तुमिच्छायामि-

ईप्सित त्रि० आप-सन्-क्त । आप्तुमिष्टे, इष्टे, अपेक्षिते च ।

ईर गतौ वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट् । ईरयति ते ईरति ऐरिरत् त ऐरीत् ।

ईर कम्पे अक०, गतौ सक० अदा० आत्म० सेट् । ईर्त्ते ऐरिष्ट ।

ईर्क्ष्य ईर्ष्यायां भ्वादि० पर० अक० सेट् । ईर्क्ष्यति ऐर्क्ष्यीत् ।

ईर्म्म न० ईर-मक् । व्रणे । ह्रस्वादिरयमिति बहवः इर्म्मो० ह्रस्वः

ईर्ष्य ईर्ष्यायां भ्वादि० पर० अक० सेट् । ईर्ष्यति ऐर्ष्यीत् ।

ईर्ष्या स्त्री० ईर्ष्य-अ । परोत्कर्षासहिष्णुतायामक्षान्तौ ।

ईर्ष्यालु त्रि० ईर्ष्यां लाति ला-डु । ईर्ष्यायुक्ते ।

ईला स्त्री० ईड-क डस्य लत्वम् । पृथिव्यां, वाचि, गवि च ।

ईलित त्रि० ईड-क्त डस्य लत्वम् । स्तुते ।

ईश ऐश्वर्य्ये अदा० आत्म० सक० सेट् । ईष्टे ईशिषे ईशिध्वे ऐशिष्ट

ईश् पु० ईश-क्विप् । परमेश्वरे । स्वामिमात्रे त्रि० । [त्रि०।

ईश पु० ईश-क । महादेवे, परमेश्वरे, हिरण्यगर्भे च । स्वामिनि

ईशान पु० ईश-शानच् । महादेवे, परमेश्वरे, शिवस्य अष्टमूर्त्तिमध्ये सूर्य्यमूर्त्तौ च । शमीवृक्षे स्त्री० ङीप् । स्वामिनि त्रि० 'ईशानो भूतभव्यस्ये'ति श्रुतिः । शिवपत्न्याम् स्त्री० ङीप् ।

ईशिता स्त्री० ईशिनो भावः तल् । अणिमाद्यष्टैश्वर्य्यमध्ये सर्व्वेषां स्वामित्वरूपे ऐश्वर्य्ये ईशित्वमप्यत्र न० ।

ईश्वर पु० ईश-वरच् । महादेवे, कन्दर्पे, पातञ्जलोक्ते क्लेशकर्म्मविपाकाशयैरपरामृष्टे पुरुषविशेषे चैतन्यात्मनि, "ईश एवाहमत्यर्थं न च मामीशते परे । ददामि च सदैश्वर्य्यमीश्वरस्तेन कीर्त्त्यते" इत्युक्तलक्षणे परमेश्वरे, प्रभवादिमध्ये वत्सरभेदे च । आढ्ये, स्वामिनि च त्रि० स्त्रीत्वे गौरा० ङीष् । 'ईश्वरीं सर्व्वभूतानामि'ति श्रुतिः

ईश्वरी स्त्री० ईश्वरस्य शिवस्य स्त्री ङीष् । दुर्गायाम् । ईश-वनिप् ङीप् रान्तादेशश्च । लिङ्गिनीलतायां वन्ध्याकर्कट्याम्, क्षुद्रजटालतायाम्, नाकुलीवृक्षे च ।

ईष उञ्छे (उद्धृतशस्यक्षेत्रात् कणश आदाने) तुदा० पर० सक० सेट् । ईषति ऐषिष्ट ।

[ईषते ऐषिष्ट ।

ईष दाने ईक्षणे, मर्षणे हिंसने च भ्वादि० आत्म० सक० सेट् ।

ईषत् अव्य० ईष-अति । अल्पे, किञ्चिदर्थे च ।

[त्रि०

ईषत्कर पु० ईषत्+कृ-खल् । लेशे अल्पे च । अल्पप्रयाससाध्ये

ईषत्पाण्डु पु० ईषदक्तेति त० । श्वेतरक्ते धूसरे । तद्वति त्रि०

ईषदुष्ण पु० ईषदक्तेति त० । अल्पतप्ते मन्दोष्णे । तद्वति त्रि०

ईषद्रक्त पु० ईषदक्तेति त० । अव्यक्तरागेऽरुणवर्णे । तद्वति त्रि०

ईषा स्त्री० ईष-क । हलयुगयोर्मध्यस्थिते काष्ठे ।

ईषादन्त पु० ईषेव दन्तौ यस्य । ईषादीर्घदन्ते हस्तिनि ।

ईषिका स्त्री० ईषेव इवे प्रतिकृताविति कन् । गजाक्षिगोलके, तूलिकायाम्, अस्त्रविशेषे च । 'सोऽभिमन्त्र्य शरेषीकामैषीकास्त्रमि'ति रामा० । पर्फरीकादि० नि० ईषीकाप्यत्र

ईह चेष्टने भ्वादि० आत्म० अक० सेट्। ईहते ऐहिष्ट।

ईहा स्त्री० ईह-अ। चेष्टायाम्, उद्यमे, वाञ्छायाञ्च।

ईहामृग पु० ईहां मृगयते अण्। वृके (नेकड़ावाघ) अलङ्कारशास्त्रलक्षिते नाटकभेदे च साहि०दर्प०।

उ

उ शब्दे भ्वादि० आत्म० अक० अनिट्। अवते औष्ट।

उ अव्य० उ-क्विप् न तुक्। सम्बोधने कोपवचने, अनुकम्पायां, नियोगे, विस्मये च। ऊत-डु। शिवे पु०। [भावे क्त। कथने न०

उक्त त्रि० वच-क्त। कथिते। एकाक्षरपादके छन्दोभेदे स्त्री०।

उक्ति स्त्री० वच-क्तिन्। कथने।

उक्थ न० वच-थक्। नवविधात्मकसाम्नोऽवयवभेदे, महाव्रताख्ये यज्ञे प्रधानभूते शस्त्ररूपे सामवेदस्याङ्गे, प्राणे च। यज्ञभेदे पु०। एकाक्षरपादे छन्दोभेदे स्त्री०। उक्तेत्यन्ये

उक्थशास् पु० उक्थानि सामावयवशस्त्राणि शंसति-शंस् क्विप् नि०। यजमाने। [उक्षाम्बभूव आस चकार।

उक्ष सेचने भ्वादि० पर० सक० सेट्। उक्षति औक्षीत्।

उक्षतर पु० तनुरुक्षा उक्षन्+तनुत्वे-र्थे ष्टरच्। तृतीयवयःप्राप्ते वृषे। जातौ स्त्रीत्वे ङीष्। [त्रि०।

उक्षन् पु० उक्ष-कनिन्। वृषे, ऋषभौषधौ च। सेचनकर्त्तरि

उख गतौ भ्वादि० पर० सक० सेट्। ओखति औखीत् उवोख

उख गतौ इदित् भ्वादि०पर०सक० सेट्। उङ्खति औङ्खीत्।

उखा स्त्री० उख-क। पाकपात्रे पिठरादौ (हांड़ि)।

उख्य त्रि० उखायां स्थाल्यां संस्कृतं यत्। स्थालीपक्वे मांसादौ

उग्र पु० उच-रक् गश्चान्तादेशः। महादेवे, वायुमूर्त्तिधारिणि शिवे क्षत्रियात् ऊढायां शूद्रायामुत्पन्ने संकीर्णवर्णे, (आगुरी) उग्रगुणत्वात् शोभाञ्जनवृक्षे, केरलदेशे, क्रूरसंज्ञके "उग्रः पूर्व्वमघान्तका इतिज्योतिषोक्ते नक्षत्रसमुदाये च वत्सनाभाख्ये विषे न०। उत्कटे त्रि०। वचायां, यवान्यां, धन्याके, उग्रजातेः स्त्रियां च स्त्री० टाप्।

उग्रकाण्ड पु०उग्रः काण्डोऽस्य। (करेला) कारविल्ले वृक्षभेदे

उग्रगन्ध पु०उग्रः गन्धः पुष्पेऽस्य। चम्पके, कट्फले, अर्जकवृक्षे लशुने च। हिङ्गुनि न०। उत्कटगन्धाख्ये त्रि०। यवान्याम् वचायाम्, अजमोदायाञ्च स्त्री० टाप्।

उग्रचण्डा स्त्री० उग्रा चण्डा कोपना कर्म्म०। देवीभेदे।

उग्रतारा स्त्री० उग्रादपि भयात् तारयति भक्तान्। तारारूपायां देव्याम्। [शत्रुभिरसह्यधनुष्के त्रि०

उग्रधन्वन् पु०उग्रं धनुर्यस्य ब० अनङ् समा०। शिवे शक्रे च।

उग्रनासिक त्रि० उग्रा दीर्घा नासिका यस्य। दीर्घनासिके।

उग्रश्रवस् पु० उग्रम् उत्कटं श्रुतिधरं श्रवः कर्णौ यस्य। रोमहर्षणसुते पौराणिके सूते। [जनकत्वेन ख्याते नृपे

उग्रसेन पु० उग्रा सेनाऽस्य। यदुवंश्ये आहुकनामके कंसस्य

उच समवाये दि० पर० सक० सेट्। उच्यति औचत्-औचीत्

उचित त्रि० उच-क्त वच-कितच् वा। न्यस्ते, परिचिते, युक्ते।

उच्च त्रि० उत्क्षिप्य बाहु चीयते उद्+चि-ड। उन्नते।

उच्चटा स्त्री० उद्+चट-अच्। लशुनभेदे, गुञ्जायां, चूडालायाम्, भूम्यामलक्यां, नागरमुस्तायां, दम्भे (चेचुया) चञ्चायाञ्च

उच्चण्ड त्रि०उद्+चडि-अच्। अत्यन्तकोपे, त्वरायुक्ते अविलम्बिते

उच्चतरु पु०कर्म्म०। नारिकेले। [तया तत्र उच्चैर्हस्ततालदानात्

उच्चताल न० उच्चः तालः हस्ततालः यत्र। पानगोष्ठ्यां मत्त-

उच्चन्द्र पु० उच्छिष्टः स्वल्पावशिष्टश्चन्द्रो यत्र प्रादि० षत्व० व० शिष्टशब्दलोपः। रात्रिशेषे। [मुद्गत्यावचिते नीवारे

उच्चय पु०उत्पाद्य चयः चि-अच्। पुष्पादेरुत्तोलने। हस्ताभ्या-

उच्चाटन न० उद्+चट्-णिच्-ल्युट्। उत्पाटने स्वस्थानात् विश्लेषणे 'उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्' इति तन्त्रोक्ते षट्कर्म्मान्तर्गतेऽभिचारभेदे च। [विष्ठायाम्।

उच्चार पु०उद्+चर-णिच् घञ्। उच्चारणे। कर्म्मणि घञ्।

उच्चावच त्रि० उदक् उत्कृष्टञ्च अवाक् अपकृष्टञ्च मयू० नि०। उत्कृष्टापकृष्टात्मके नानाभेदे। [वस्त्रखण्डे।

उच्चूल पु० उन्नता चूडा यस्य उस्य लत्वम्। ध्वजोर्द्धस्थिते

उच्चैःश्रवस् पु० उच्चैरुन्नतं श्रवोऽस्य। उन्नतकर्णे समुद्रजाते श्वेतवर्णे इन्द्रस्य वाहनभूते अश्वभेदे। उच्चैरल्पशब्दं शृणोति श्रु-असुन्। बधिरे।

उच्चैर्घुष्ट न० उच्चैस्+घुष-क्त। (ढेडरा) उच्चघोषणायाम्।

उच्चैस् अव्य० उद्+चि डैसि। अत्यर्थे, महति, उन्नते च। अकवि उच्चकैरप्यत्र। [शास्त्रविरुद्धेऽधर्म्मकार्ये च।

उच्छास्त्र त्रि० उद्गतं शास्त्रात् ग०स०। अतिक्रान्तशास्त्रे

उच्छिख त्रि० उद्गता शिखा यस्य प्रा०ब०। उन्नताग्रे।

उच्छित्ति स्त्री० उद्+छिद-क्तिन्। उच्छेदे, नाशने च।

उच्छिलीन्ध्र उच्छिखं शिलीन्ध्रम्। छत्राके। विकसितशिलीन्ध्रयुक्ते त्रि०। 'उच्छिलीन्ध्रामवन्ध्यामिति' मेघदूतम्।

उच्छिष्ट त्रि० उद्+शिष-क्त। भुक्तावशिष्टे, त्यक्ते च।

उच्छिष्टभोजन पु० पञ्चयज्ञावशिष्टं देवनैवेद्यं वा भोजनमस्य। पञ्चयज्ञावशिष्टस्य देवनैवेद्यस्य च भोक्तरि।

उच्छिष्टमोदन न० उच्छिष्टं भ्रमरोच्छिष्टं मधु तेन मोदते वर्द्धते मुद ल्यु। (मोम) सिक्थके।

उच्छीर्षक न॰उत्थापितं शय्यातउत्तोल्य स्थापितं शीर्षं यस्मिन्
ब॰कप्। शीर्षोपधाने (वालिश)। उद्गतशीर्षके धान्यादौ त्रि॰

उच्छून त्रि॰ उद् श्वि-क्त। स्फीते 'हृयोच्छूनैः किमेभि'रिति
नाटकम् उन्नते च। [नियन्तृरहिते, अप्रतिबन्धे च।

उच्छृङ्खल त्रि॰ उद्गतं शृङ्खलातः गति ब॰। बन्धनरहिते,

उच्छेद पु॰ उद् छिद्-घञ्। छेदने, विनाशने च।

उच्छोषण त्रि॰उद+शुष-णिच्-ल्यु। सन्तापके,ऊर्द्धशोषके च

उच्छ्र(च्छ्रा)य पु॰ उद्-श्रि-अच् घञ् वा। उच्चतायाम् उन्नतौ

उच्छ्रित त्रि॰ उद्+श्रि-क्त। उच्चे, प्रवृद्धे,संजाते,समुन्नद्धे च

उच्छ्वसित त्रि॰ उद्+श्वस-क्त। विकाशिते,जीविते,स्फुरिते च

उच्छ्वास पु॰ उद्+श्वस-घञ्। अन्तर्मुखश्वासे, आख्यायिका
याः परिच्छेदे,प्राणे, आश्वासे च। [ति औञ्छीत्।

उछ उञ्छे (कणशआदाने) तुदा॰इदित् पर॰सक॰सेट्। उञ्छ

उछ बन्धे समापने च तुदा॰पर॰सक॰ सेट्। उच्छति औच्छीत्

उज्जय(यि)नी स्त्री॰ विक्रमादित्यराजधान्याम् अवन्त्यां पुर्य्याम्

उज्जासन न॰उद्+जस-हिंसायां स्वार्थे णिच्-ल्युट्। मारणे

उज्जृम्भ पु॰ उद्+जृभि-घञ्। विकाशे.स्फुटने च। [याम् न॰

उज्जृम्भित त्रि॰ उद्+जृभि-क्त। विकाशिते। भावे क्त। चेष्टा-

उज्ज्वल त्रि॰ उद्+ज्वल-अच्। दीप्ते,विशदे,विकाशिनि च।
स्वर्णे न॰। शृङ्गाररसे पु॰। [मुजज्झाम्बुकारे'ति रघुः।

उज्झ त्यागे तुदा॰पर॰सक॰सेट्। उज्झति 'औज्झीत् 'तल्प-

उञ्छ पु॰ उछि-घञ्। 'अबाधितस्थानेषु पथि,क्षेत्रेषु च अप्र-
तिहतावकाशेषु यत्र यत्रौषधयो विद्यन्ते तत्र तत्राङ्गुली-
भ्यामेकैकं कणं समुच्चिनोतीति स्मृत्युक्ते कणश आदाने।

उञ्छन पु॰ न॰ उछि-ल्युट्। आपणादिपतितस्य विक्रीता-
वशिष्टस्य धान्यादेः कणश आदाने।

उञ्छशिल न॰ उञ्छ+शिल-अपहारे क। क्षेत्रस्वामिना
गृहीतशस्यात् क्षेत्रात्कणशः समुच्चयरूपे उञ्छाचारे।

उट न॰ उ॰-ट नेत्त्वम्। तृणे, पर्णे च। [मुन्यादिकुटे।

उटज पु॰ न॰ उटेभ्यो जायते जन+ड। पत्रनिर्म्मितशालायां

उठ उपघाते भ्वा॰ पर॰ सक॰ सेट्। ओठति औठीत्।

उड संहतौ (सौत्रः) पर॰ अक॰ सेट्। ओडति औडीत्।

उडु स्त्री॰न॰ उड-उ। नक्षत्रे,जले च। स्त्रीत्वे वा ऊङ्।

उडु(डू)प पु॰उडूनि जलेपाति पा-क। प्लवे भेलायाम्। उडूनि
नक्षत्राणि पाति। चन्द्रे स हि ताराणां पतिरतोरक्षकः।

उडु(डू)पति पु॰ उडूनां पतिः। चन्द्रे, जलेशे वरुणे च।

उडुपथ पु॰ उडूनां पन्थाः। आकाशे।

उडुम्बर पु॰उं शम्भुं वृणोति वृ-अच् उम्बरः उत्कृष्ट उम्बरः
पृषो॰दस्य वा डत्वम्। (यज्ञडुम्बुर) यज्ञाङ्गे वृक्षे, ताम्रे च,
गृहावग्रहण्याम् देहल्याम्. कुष्ठभेदे च न॰।

उड्डामर त्रि॰ उत्कटं डामरम्। अत्यन्तप्रचण्डे।

उड्डीन न॰ उद्+डी-क्त। पक्षिणामूर्द्ध्वगमने।

उत अव्य॰ उ-क्त। विकल्पे, समुच्चये, वितर्के, प्रश्ने, अत्यर्थे च।

उत त्रि॰ वेञ् क्त संप्रसारणम् (वुना) स्यूते।

उतथ्य पु॰ अङ्गिरसः श्रद्धायां पत्न्यामुत्पन्ने गुरोर्ज्येष्ठभ्रातरि

उतथ्यतनय पु॰ ६त॰। गौतमे मुनौ।

उतथ्यानुज पु॰ ६त॰। बृहस्पतौ 'उतथ्यावरजो'प्यत्र।

उताहो अव्य॰उत च आहो च द्व॰। विकल्पे,प्रश्ने, विचारे च

उत्क त्रि॰ उद्गतं मनोऽस्य उद्+क नि॰। उन्मनस्के अन्यमनस्के

उत्कट पु॰ अतीव उद्+कटच्। रक्तेक्षौ, शरे च। त्वक्पत्रे।
गुडत्वचि (दारचिनि) च न॰। उद्गतः कटः आवरणं यस्य
प्रादि॰ब॰। मत्ते विषये, तीव्रे च त्रि॰। भिन्नकटे गजे पु॰।

उत्कण्ठा स्त्री॰उद्+कठि-अ। इष्टलाभे कालासहनरूपे औत्सुक्ये

उत्कण्ठित त्रि॰ उत्कण्ठा जाताऽस्य तारकादि॰ इतच्।
उत्कण्ठायुक्ते। नायिकाभेदे स्त्री॰। साहि॰दर्प॰

उत्कर पु॰ उद्+कॄ-अप्। धान्यादीनां राशीकरणे,प्रसारणे,
तृणापसारणे च हस्तपदादिविक्षेपे च।

उत्कर्ष पु॰ उद्+कृष-घञ्। अतिशये।

उत्कल पु॰ 'जगन्नाथप्रान्तदेश उत्कलः परिकीर्त्तित' इत्युक्ते
ओड्रदेशे। उत्कः सन् लाति ला+क। व्याधे, भार-
वाहके च। [जातायां स्मृतौ च।

उत्कलिका स्त्री॰ उद्-कल-वुन्। उत्कण्ठायाम्, कामादि-

उत्कलित त्रि॰ उद्+कल-क्त। उन्मनस्के, ऋद्धिमति च।

उत्कार पु॰उद्+कॄ-घञ्। धान्यानां, राशीकरणे,ऊर्द्ध्वक्षेपणे च

उत्कास पु॰ उच्छ्वासकः कासः। कासभेदे, वमनव्याधौ च।

उत्कीर्ण त्रि॰ उद्+कॄ-क्त। उल्लिखिते, क्षतवेधे च 'मणौ
वज्रसमुत्कीर्णे' इति रघुः।

उत्कुण पु॰ उद्+कुण-क। केशकीटे (उकुण) इति ख्याते।

उत्कृति स्त्री॰ षड्विंशत्यक्षरपादके छन्दोभेदे।

उत्कोच पु॰ उद्+कुच-घञ्। अन्याय्यकर्म्मकरणार्थं वादि-
प्रतिवादिभ्योऽर्थग्रहणे (घुस्) इति ख्याते।

उत्क्रम पु॰ उद्+क्रम-घञ् अवृद्धिः। व्युत्क्रमे, विपरीतक्रमे

उत्क्रोश पु॰ उद्+क्रुश-अच्। कुररीपक्षिणि।

उत्क्षेपण न॰ उद्+क्षिप-ल्युट्। ऊर्द्ध्वक्षेपणे। कर्म्मणि ल्युट्।
व्यजने। करणे ल्युट् धान्यमर्द्दने काष्ठभेदे। [इति रघुः

उत्खात त्रि॰उद्+खन-क्त। उत्पाटिते 'उत्खातप्रतिरोपिता'

उत्खातकेलि पु० 'उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडा निग-
द्यते' इत्युक्तलक्षणे वृषगजादेः शृङ्गादिना मृत्तिकाखनने

उत्त त्रि० उन्द्-क्त । क्लिन्ने आर्द्रीभूते नि ।

उत्तंस पु० उद्+तसि-अच् । कर्णाभरणे, शिरोभूषणे च ।

उत्तप्त त्रि० उद्+तप्-क्त । संतप्ते, स्नाते च । शुष्कमांसे न०

उत्तम त्रि० उद्+तमप् । उत्कृष्टे। प्रियव्रतनृपस्य पुत्रे पु० ।

उत्तमर्ण पु० उत्तममृणमस्य । ऋणप्रयोजके (महाजन) ।

उत्तमसाहस न० "साशीतिशतसाहस्रोदण्ड उत्तमसाहस-
मित्युक्ते दण्डभेदे ।

उत्तमाङ्ग न० कर्म्म० । मस्तके । [तो निवृत्तौ ।

उत्तम्भ पु० उद्+स्तम्भ-घञ् । प्रवृत्तिबाधिकायामनिष्टसाधन-

उत्तर न०उत्तीर्य्यते प्रकृताभियोगोऽनेन उद्+तॄ-अप् । राज-
समीपे वादिकृताभियोगशोधने उत्तराख्ये व्यवहाराङ्गे
"प्रश्नश्चोद्यधिया पृच्छा तस्य भञ्जनमुत्तरं मित्युक्ते दोष-
भञ्जनवाक्ये च । विराटराजपुत्रे पु० । उदीच्यां दिशि
विराटराजसुतायाञ्च स्त्री० । अनन्तरे देशे, काले च पु०।
अनन्तरदि देशकालवृत्तौ त्रि० ।

उत्तरकाल पु० कर्म्म० । भविष्यत्काले आयतौ ।

उत्तरकुरु पु० नववर्षात्मकस्य जम्बुद्वीपस्य वर्षभेदे ।

उत्तरकोशला स्त्री० अयोध्यानाम्न्यां नगर्य्याम् ।

उत्तरङ्ग न० उत्तरमङ्गम् कर्म्म० शकन्ध्वा० । द्वारोर्द्ध्वस्यदा-
रुणि । उद्गततरङ्गे त्रि० ।

उत्तरच्छद पु० कर्म्म०। शय्याया उपर्य्यास्तरणवस्त्रे ।

उत्तरपक्ष पु० वादे पूर्व्वपक्षस्य मर्द्दनक्षमे सिद्धान्तपक्षे ।

उत्तरफाल्गुनी स्त्री०फल्गु मनोहरं नयति । नी-ङी कर्म्म०।
अश्विन्यादिनक्षत्रेषु द्वादशे नक्षत्रे दक्षिणोत्तरस्थिततार-
काद्वयात्मके ।

उत्तरभाद्रपद् स्त्री० भद्राय हितः भाद्रः पद् पादश्चतुर्थांशो
यस्याः ब० ततः कर्म्म०। अश्विन्यादिनक्षत्रेषु षड्विंशे नक्षत्रे
पदशब्देन समासः टाप् । उत्तरभाद्रपदाप्यत्र ।

उत्तरमीमांसा स्त्री० कर्म्म० । ब्रह्ममीमांसायाम् वेदान्तदर्शने।

उत्तरा अव्य० उत्तर+आच् । उत्तरस्यां दिशि काले देशे वेत्यर्थे

उत्तरा 'प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु क्रियन्ते याः
क्रियाः पित्र्याः प्रोच्यन्ते उत्तराहि ता इत्युक्तासु सपिण्डी-
करणोत्तरासु श्राद्धक्रियासु । [त्तरस्मादुत्तरस्मिन्नित्यर्थे ।

उत्तरात् अव्य० उत्तर+आति । दिग्देशकालविषये उत्तरसु-

उत्तराधिकारिन् त्रि०उत्तरमधिकरोति अधि+कृ-णिनि ।
पूर्व्वस्वामिस्वत्वोपरमे तत्सम्बन्धाधीनस्वत्ववति जाताधिकारे
पुत्रपौत्रादौ दायादे । (अंशी) इति ख्याते । [त्तरे ।

उत्तराभास पु० उत्तरमिवाभासते आ+भास-अच् । दुष्टो-

उत्तरायण न० 'माघादि मासयुग्मैस्तु ऋतवः षट् क्रमादितः।
उत्तरायणमाद्यैस्तैरित्युक्तलक्षणे ऋतुत्रयात्मके माघादिके
मासषट्के काले । उत्तरा दिशि सूर्य्यस्य अयनं यस्मिन् काले
इति व्युत्पत्तेः । तदारम्भकाले मकरसंक्रमणदिनेऽपि ।

उत्तराषाढ़ा स्त्री० अश्विन्यादिनक्षत्रेषु एकविंशतितमे नक्षत्रे

उत्तरासङ्ग पु० उत्तरे ऊर्द्ध्वभागे आसज्यते आ+सन्ज-घञ् ।
उत्तरीयवस्त्रे । [रस्मिन् उत्तरस्मात् उत्तरमित्यर्थे

उत्तराहि अव्य० उत्तर+आहि । दिग्देशकालविषये उत्त-

उत्तरीय न०उत्तरस्मिन् देहभागे भवः छ। ऊर्द्ध्वदेहधार्य्ये वस्त्रे

उत्तरेण अव्य० आसन्नदिग्देशकालानां प्रथमान्तसप्तम्यन्ताना
मर्थेषु 'तत्रागारं धनपतिगृहानुत्तरेणास्मदीय'मिति मेघदूतम्

उत्तरेद्युस् अव्य० उत्तरस्मिन् दिने उत्तर+एद्युस् । आ-
गामिदिवसे इत्यर्थे ।

उत्तान त्रि० उद्गतस्तानो विस्तारोयस्मात् । विस्तारशून्ये,
(चित) भूमिलग्नपृष्ठतया ऊर्द्ध्वभावेन स्थिते, ऊर्द्ध्वमुखे च ।

उत्तानक पु० उद्-तन-ण्वुल् । उच्चटायाम् ।

उत्तानपत्रक पु० उत्तानमूर्द्ध्वमुखं पत्रमस्य । रक्ते एरण्डवृक्षे

उत्तानपाद पु० स्वयम्भुवो मनोः पुत्रे ध्रुवपितरि नृपभेदे।

उत्तानशय त्रि० उत्तानः ऊर्द्ध्वमुखः सन्नेव शेते शी-अच् ।
अतिशिशौ तस्य च तदानीमवतानेसामर्थ्याभावात् ।

उत्ताप पु० उद्+तप-घञ् । उष्णतायाम्, सन्तापे च ।

उत्तार त्रि०उद्गता तारा यस्य ! उद्गततारकनेत्रयुक्ते उत्कृष्ट
स्तारः । अत्यन्तोच्चे । [विकरणे, त्वरिते, उन्नते च । प्लवङ्गमे पु०

उत्ताल त्रि० चुरा० तल-प्रतिष्ठायाम् अच् । प्रतिष्ठिते महति ।

उत्तीर्ण त्रि० उद्+तॄ-क्त । मुक्ते, पारंगते च ।

उत्तुङ्ग त्रि० उत्कटं तुङ्गम् । अत्युन्नते । [(खइ) भ्रष्टधान्ये

उत्तुष पु० उद्गतः कण्डनाभावेऽपि तुषोऽस्मात् । लाजाख्ये

उत्तेजना स्त्री० उद्+तिज-णिच्-युच् । प्रेरणायाम्, व्यग्रता
करणे, उद्दीपने, तीक्ष्णीकरणे च ।

उत्तेजित त्रि० उद्+तिज-णिच्-क्त । प्रेरिते, उद्दीपिते च ।
भावे क्त । उत्तेजनायाम् "उत्तेजितं मध्यवेगं योजनं
श्लथवल्गयेत्युक्ते अश्वगतिभेदे न० ।

उत्तेरित न० उद्-तॄ भावे इतच् गुणे एत्वम् नि० । अश्व-
गतिभेदे । अर्श आद्यचि । "उत्तेरितोऽतिवेगाढ्यो न
शृणोति न पश्यती' त्युक्तगतियुक्तेऽश्वे पु०।

उत्तोलन न०उद्+तुल-उन्माने ल्युट् । ऊर्द्ध्वं नीत्वा तोलने,

उत्तोलित त्रि॰ उद्+चु॰तुल-क्त। उत्क्षिप्ते, कृततोलने च

उत्त्यक्त त्रि॰ उद्+त्यज-क्त। ऊर्द्ध्वक्षिप्ते, परित्यक्ते च।

उत्थान न॰ उद्+स्था-ल्युट्। ऊर्द्ध्वपतने, उद्यमे, ऊर्द्ध्वभवनचेष्टायाम्, उद्भवे च। करणे ल्युट्। उत्साहे, पौरुषे, हर्षे च। अधिकरणे ल्युट्। रणे, राज्यचिन्तनरूपे तन्त्रे, प्राङ्गणे, चैत्ये च।

उत्थानैकादशी स्त्री॰ उत्थानस्य हरेः निद्रातः प्रबोधनस्य काल एकादशी। चान्द्रकार्त्तिकशुक्लैकादश्याम्।

उत्थित त्रि॰ उद्+स्था-क्त। वृद्धियुक्ते, उद्यते, उत्पन्ने च।

उत्थिताङ्गुलि पु॰ उत्थिता उद्युक्ता अङ्गुलयो यत्र। (चापड़) विस्तृताङ्गुलिके करतले चपेटे।

उत्पत पु॰ उत्पतति ऊर्द्ध्वं गच्छति उद्+पत-अच्। पक्षिणि

उत्पतन न॰ उद्+पत-ल्युट्। ऊर्द्ध्वगमने, उत्पत्तौ च।

उत्पत्ति स्त्री॰ उद्+पद-क्तिन्। जन्मनि, जीवस्य देहसम्बन्धे, सांख्यादिमते आविर्भावे च। उद्+पत-क्तिन्। ऊर्द्ध्वगमने।

उत्पत्तिविधि पु॰ मीमांसकमते कर्म्मस्वरूपावेदके विधौ यथा अग्निहोत्रं जुहोतीत्यादि।

उत्पल न॰ उद्+पल-अच्। नीलपद्मे, कुमुदादौ, कुष्ठौषधौ च।

उत्पलगन्धिक न॰ उत्पलस्य गन्धइव गन्धोऽस्य इत् समा॰ संज्ञायां कन्। गोशीर्षाख्ये चन्दने।

उत्पलपत्र न॰ उत्पलस्य पत्रमिव। तिलकभेदे, स्त्रीणां स्तनादौ नखक्षते च। ६त॰। इन्दीवरस्य दले।

उत्पलिनी स्त्री॰ उत्पलानि सन्त्यस्मिन् देशे, तेषां समूहो वा इनि। उत्पलयुक्तलतायां, कुवलयसमुदाये च।

उत्पवन न॰ उद्+पू-करणे ल्युट्। कुशकण्डिकायां पवित्रेण जलादेरुत्क्षेपणे।

उत्पश्य त्रि॰ उद्+दृश-श। ऊर्द्ध्वदृष्टिकारके, उन्मुखे च।

उत्पाटन न॰ उद्+पट-णिच्+ल्युट्। उन्मूलने।

उत्पात पु॰ उद्+पत-घञ्। उपद्रवे। उद्+पत-ण। अकस्मादागते प्राणिनां शुभाशुभसूचके दैवनिमित्ते भूकम्पादौ।

उत्पादक पु॰ ऊर्द्ध्वस्थिताः पादा अस्य कप्। अष्टपदे शरभाख्ये गजारातौ पशुभेदे तस्य पृष्ठस्थचतुश्चरणत्वादूर्द्ध्वपादत्वम्। उत्-पद-णिच्-ण्वुल्। पितरि पु॰। उत्पादनकर्त्तरि त्रि॰। [(टिटिर) टिट्टिभपक्षिणि।

उत्पादशय पु॰ उत्पाद ऊर्द्ध्वक्षिप्तपादः सन् शेते शी-ल्यु।

उत्पिञ्जल त्रि॰ उद+पिजि-कलन्। अत्यर्थाकुले।

उत्प्रास पु॰ उद्+प्र+अस-दीप्त्यादिषु घञ्। उपहासे।

उत्प्रेक्षा स्त्री॰ उद्+प्र+ईक्ष-अ। उद्भावने अर्थालङ्कारभेदे च सा॰ १०प॰। [रूपे उन्मज्जने (भासा)।

उत्प्लवन न॰ उद्+प्लु-ल्युट्। उल्लम्फने, जलादेरुपरिस्थिति

उत्प्लवा स्त्री॰ उत् जलादेरुपरि प्लवते प्लु-अच्। नौकायाम्।

उत्फुल्ल त्रि॰ उत्+फल-क्त। दलानामन्योन्यविश्लेषेण विकाशिते कुसुमादौ। [ज्जले च।

उत्स पु॰ उन्द-स। पर्व्वतादितः स्रवज्जलस्य पातस्थाने, स्रव-

उत्सङ्ग पु॰ उद्-सन्ज-घञ्। क्रोड़े। सङ्गादुत्क्रान्ते त्रि॰।

उत्सर्ग पु॰ उद्+सृज-घञ्। व्याकरणोक्ते सामान्यविधाने, न्याये, त्यागे, दाने, यागभेदे, अपानवायोर्व्यापारे च।

उत्सर्ज्जन न॰ उद्+सृज-ल्युट्। दाने त्यागे च। [च

उत्सर्पण न॰ उद्+सृप-ल्युट्। उत्सृज्य पुरतोगतौ, उल्लङ्घने

उत्सव पु॰ उद्+सू-अप्। आनन्दजनकव्यापारे विवाहादौ।

उत्सवसङ्केत पु॰ उत्सव आनन्दजनकः सङ्केतः स्त्रीपुंसयोः रत्यर्थमनुरागादाह्वानम् यस्य। असेयं स्त्रीत्येवं दाम्पत्यनियमशून्ये स्त्रीपुंसयोरनुरागमात्रहेतुकस्वैरविहारशालिनि पार्व्वतीये जातिभेदे। 'शरैरुत्सवसङ्केतानिति' रघुः।

उत्सादन उद्+सद-णिच्-ल्युट्। उत्सारणे, उद्वर्त्तने च।

उत्सारक पु॰ उद्+सृ-णिच्-ण्वुल्। द्वारपाले तेन हि प्रभुद्वारतो जना दूरीक्रियन्ते। [स्थानान्तरकरणे च।

उत्सारण न॰ उद्-सृ-णिच्-ल्युट्। दूरीकरणे, चालने,

उत्साह पु॰ उद्+सह-घञ्। उद्यमे, अध्यवसाये, कर्त्तव्यकृत्येषु स्थिरतरे प्रयत्ने "उत्साहो मन्त्रमूलं स्यादिति नीतिविदां मतम्। प्रभुशक्तिर्मन्त्रमूला तस्मादुत्साहवान् भवेदि"त्युक्ते राज्ञां गुणविशेषे, कल्याणे, सूत्रे, वीरत्वेरसस्य भावदे च साहि॰ ३परि॰।

उत्साहवर्द्धन पु॰ उत्साहं वर्द्धयति वृध-णिच्-ल्यु। वीररसे। वृध-ल्युट् ६त॰। उत्साहस्य वृद्धौ न॰।

उत्साहशक्ति स्त्री॰ उत्साहएव शक्ति र्बलम्। राज्ञां विक्रमहेतौ बले। [सेकयुते, उपप्लुते, त्यक्तमर्य्यादे च।

उत्सिक्त त्रि॰ उद्+सिच-क्त। गर्व्विते उद्धते, वर्द्धिते, उपरि-

उत्सुक त्रि॰ उद्+सू-क्विप् कनि ह्रस्वः। इष्टार्थसम्पादनाय उद्युक्ते, अभीष्टोगमिष्यतीत्युत्कण्ठान्विते च।

उत्सृष्ट त्रि॰ उद्+सृज-क्त। त्यक्ते, कृतोत्सर्गे, दत्ते च।

उत्सेक पु॰ उद्+सिच्-घञ्। गर्व्वे, उद्रेके उद्धृत्य वहिःसेचने च

उत्सेध पु॰ उद्+सिध-घञ्। देहे, उन्नतौ 'पयोधरोत्सेधनिपातेति कुमारः।

उद् अव्य॰ उ-क्विप् तुक् पृषो॰ दत्वम्। प्रकाशे, विभागे, प्राकट्ये, ऊर्द्ध्वे, उत्कर्षे, प्राबल्ये, अस्वास्थ्ये, शक्तौ, प्राधान्ये,

10219731

बन्धने, भावे,मोक्षे, 'तस्य उदिति नामेति' श्रुतेर्ब्रह्मणि च

उदक न० उन्द्-ण्वुल् नलोपश्च नि०। जले पृषो० कलोपे उदमप्यत्र । [करञ्जभेदे ।

उदकीर्य्य पु०उदेन जलेन कीर्य्यते कॄ-क्यप् । (डहरकरमचा)

उदकुम्भ पु० उदकेन पूर्णः कुम्भः शाक० त० । जलपूर्णकुम्भे शान्त्युदकुम्भहस्ता इति भट्टिः । [ऋतुमत्याम् ।

उदक्या स्त्री०उदकं शुद्ध्यर्थं स्नानजलं चतुर्थदिने अर्हति यत्।

उदगद्रि उदगुत्तरस्यामद्रिः । हिमाचले ।

उदगयन न० उदक् उदीच्यामयनम् । उत्तरायणे माघादिके मासषट्के 'उदगयने आपूर्य्यमाणे' पक्षे इति स्मृतिः ।

उदग्र त्रि० उद्गतमग्रं यस्य । उच्चे। [घृतादिपात्रे (कुपो)।

उदङ्क पु० उदच्यते उद्ध्रियतेऽत्र उद्+अच-घञ् । चर्म्ममये

उदच् अव्य० उदच् दिग्देशकाले वाच्ये प्रथमापञ्चमीसप्तम्यर्थे अस्ताति तस्य लुक्। प्रथमान्ताद्यर्थवृत्तौ उत्तरदिगादौ । उद्+अनृच-क्विन् । उत्तरे देशे काले च पु०। स्वादौ उदङ् उदञ्चौ। दिशि स्त्री० ङीप् उदीची ।

उदज पु० उद्+अज-अच् । पशुप्रेरणे ।

उदञ्चन न० उद्+अनृच-करणे ल्युट् । पिधानार्थे पात्रे (ढाकना)। भावे ल्युट् । ऊर्द्ध्वक्षेपणे ।

उदञ्चित त्रि० उद्+अनृच-क्त । ऊर्द्ध्वक्षिप्ते, पूजिते च ।

उदधि पु० उदकानि धीयन्तेऽस्मिन् धाञ्-आधारे कि उदादेशः । समुद्रे, घटे च ।

उदधिमल पु० उदधेर्मल इव । समुद्रफेने ।

उदन्त पु० उद्गतोऽन्तोनिर्णयो यस्मात् । वार्त्तायाम् वृत्तान्ते कुशलादिकथने, साधौ च । [अ। पिपासायाम्।

उदन्या स्त्री० अतिगार्द्धेन उदकमिच्छति क्यच् उदनृभावः

उदन्वत् पु०उदकानि सन्त्यस्य मतुप् उदनृभावः मस्य वः। समुद्रे

उदप आघाते (सौत्रः) पर०सक० सेट्। उदपति। औदपीत्-

उदपान पु०न० उदकं पीयतेऽस्मिन् पा-ल्युट् उदादेशः । कूपसमीपस्थे खाते क्षुद्रजलाधारे ।

उदमान पु० 'कुल्या स्यादष्टभिर्द्रोणैः द्रोणपादेन चाढ़कः। अस्यार्द्धशतिकोभाग उदमान उदाहृत इत्युक्ते मानभेदे ।

उदय पु० उद्+इ-अच् । ज्योतिषोक्ते राशेरुदयरूपे लग्ने । आधारे अच्। उदयाचले पूर्व्वपर्व्वते 'यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृत' इत्युक्तलक्षणे दृष्टियोग्यस्थाने च भावे अच् । प्रथमदर्शनयोग्यभवन, वृद्धौ,समुन्नतौ उत्पत्तौ च ।

उदयन पु० उद्+इ-ल्यु । वत्सराजे, अगस्त्ये मुनौ, कुसुमाञ्जलिप्रभृतिग्रन्थकारके उदयनाचार्य्ये च। भावे ल्युट् । उदये

उदर न०उद्+दृ-अप् । जठरे नाभिस्तनयो र्मध्यभागे। आधारे अप् । युद्धे। उद्+इ-अप् उदो दलोपश्च। उदररोगे।

उदरग्रन्थि पु० उदरे ग्रन्थिरिव । गुल्मनामकरोगे। [बन्धवस्त्रे

उदरत्राण न० उदरं त्रायतेऽनेन ल्युट्। (कमरबन्ध) उदर-

उदरपिशाच त्रि० उदरे तत्पूर्त्तौ पिशाच इव । सर्व्वान्नभक्षके।

उदरम्भरि त्रि० उदरं बिभर्त्ति भृ-खि मुम् च । पञ्चयज्ञाद्यकरणेनात्मोदरमात्रपोषके ।

उदररोग पु० ६त०। उदरी इति ख्याते रोगे। [ख्याते रोगे

उदरामय पु० उदरस्यामं रोगं याति नयति या-क । स्वनाम

उदरावर्त्त पु० उदरे आवर्त्त इव गभीरत्वात् । नाभौ ।

उदरिणी स्त्री० उदरे गर्भोऽस्त्यस्याः इनि । गर्भवत्याम् ।

उदरिन् त्रि० उदरं वृहत् अस्यास्ति महत्त्वे मत्वर्थीय इनि । तुन्दिले (भुडियुक्ते) । इल । उदरिलोऽप्यत्र ।

उदर्क पु० उद्+अर्क-अर्च+वा घञ् । उत्तरकाले भाविफलके शुभाशुभकर्म्मणि च ।

उदर्चिस् पु० उद् ऊर्द्ध्वमर्च्चिः रश्मिरस्य । उच्छिखे वह्नौ । उत्कृष्टकान्तित्वात् कन्दर्पे ऊर्द्ध्वरेतस्त्वात् शिवे च । प्रा०स० । उद्गतायां शिखायां न० ।

उदवसित न० उद्+अव+षि-क्त । गृहे। [जलेन मथिते तक्रे

उदश्वित् न० उदेन जलेन श्वयति वर्द्धते श्वि-क्विप् । अर्द्ध-

उदात्त पु० उद्+आ+दा-क्त । वर्णोत्पत्तिस्थानेषु उच्चैःस्वरेण उच्चारिते । दृश्ये,महति,दातरि च त्रि०। अलङ्कारभेदे न०

उदान पु० उद्+अन-घञ् । ऊर्द्ध्वगमनोत्क्रमणवृत्तियुक्ते कण्ठस्थे वायौ, उदरावर्त्ते नाभौ, सर्पभेदे च ।

उदार त्रि० उद्+आ+रा-क । दातरि, महति, सरले, दक्षिणे, गम्भीरे, असाधारणे च ।

उदावर्त्त पु० उद्+आ+वृत-घञ् । 'यत्रोर्द्ध्वं जायते वायोरावेगः स चिकित्सकैः । उदावर्त्त इति प्रोक्तो व्याधि'-रित्युक्तलक्षणे वातव्याधौ ।

उदासीन त्रि० उद्+आस-शानच् । मध्यस्थे, विवदमानयोरेकतरपक्षानवलम्बके, जिगीषोर्नृपतेः शत्रुमित्रभूमितो व्यवहिते परतरे, उपेक्षके च ।

उदास्थित त्रि० उद्+आ+स्था-क्त । चरे, द्वारपाले, अध्यक्षे, प्रव्रज्यारूपस्थानच्युते नष्टसन्न्यासे परिव्राजके च।

उदाहरण न० उद्+आ+हृ-भावे ल्युट् । एकदेशप्रसिद्ध्या सकलसिद्ध्यर्थं कथने। कर्म्मणि ल्युट् । इष्टसिद्ध्यर्थमुच्यमाने दृष्टान्ते,प्रकृतसिद्ध्यर्थं निदर्शनरूपे उपोद्घाते च । [ते च ।

उदाहृत त्रि० उद्+आ+हृ-क्त। दृष्टान्ततयोपन्यस्ते, कथि-

उदित त्रि०वद-क्त। कथिते। उद्+इण्-क्त। उत्थिते,उद्गते,वृद्धे च

उदीच्य त्रि०उदीचि उत्तरकालादौ भवः यत्। उत्तरकालादिभवे वस्तुनि,शरावत्या नद्याः पश्चिमोत्तरदेशे, (बाला) गन्धद्रव्ये च

उदीरण न० उद्+ईर-ल्युट्। कथने, उच्चारणे च।

उदीर्ण त्रि० उद्-ऋ-क्त। उदारे, महति,उद्रिक्ते च उदीर्णरागप्रतिरोधकमिति माघः।

उदुम्बर पु० उडुम्बरवत् सर्व्वम्। डत्वाभावः।

उदुम्बरपर्णी स्त्री० उडुम्बरपर्णीवत् सर्व्वम्। न डत्वम्।

उदुम्बरफला स्त्री० उडुम्बरफलावत् सर्व्वम्। न डत्वम्।

उदूखल न० ऊर्द्ध्वं खं लाति ला-क पृषो०नि०। तण्डुलादिकण्डनार्थं काष्ठादिरचिते द्रव्ये, गुग्गुलौ च।

उदूढ़ त्रि० उद्+वह-क्त। ऊढे,स्थूले,धृते च। उदूढलोकत्रितयेनेति माघः।

उद्गत त्रि० उद्+गम-क्त। उदिते,उत्पन्ने,ऊर्द्ध्वगते,उद्वान्ते च।

उद्गमनीय न० उद्+गम-अनीयर्। धौतवस्त्रद्वये 'गृहीतपत्युद्गमनीयवस्त्रेति' कुमारः। [त्रि०

उद्गाढ़ न० उद्+गाह-क्त। अतिशये। अत्यन्ते। अतिशययुक्ते

उद्गातृ पु० उच्चैर्गायति साम उद्+गै-तृच्। सामवेदगायके।

उद्गार पु० उद्+गॄ-घञ्। उद्वमने। [भेदे च

उद्गीति स्त्री० उद्+गै-क्तिन्। उच्चैर्गाने, मात्रावृत्ते आर्य्या-

उद्गीथ पु० उद्+गै-थक्। सामवेदावयवभेदे।

उद्गूर्ण त्रि० उद्+गुरी-उद्यमे क्त। उद्यते।

उद्ग्राहित त्रि० उद्+ग्रह-णिच्-क्त। उपन्यस्ते, बद्धे, उदीर्णे, प्रत्यायिते, ग्राहिते च। [च। प्रशस्ते त्रि०

उद्घ पु० उद्+हन-अप् नि०। हस्तपुटे, वह्नौ,वायौ, प्रशंसायां

उद्घन पु० उद्+हन-अप् नि०। काष्ठतक्षणसाधनेऽधःस्थकाष्ठे यदुपरि निधाय काष्ठं तक्ष्यते।

उद्घर्षण न० उद्+घृष-ल्युट्। इष्टकया (झामा) गात्रादिघर्षणे।

उद्घाट पु० उद्+घट-णिच्-घञ्। राजस्वग्रहणस्थाने घट्टे।

उद्घाटक पु० न० उद्+घट-णिच्-ण्वुल्। कूपात् जलोद्धारणार्थे यन्त्रभेदे (अरघट्) (घुरना) इति ख्याते। करणे ल्युट् उद्घाटनमप्यत्र न०। भावे ल्युट् उद्घाटनम्। प्रतिबन्धनिरासे, कृतबन्धस्य बन्धापकरणे च न०।

उद्घात पु० उद्+हन-घञ्। आरम्भे, पादस्खलने 'प्राणेन मेर्व्वमाणेन अपानः पीड्यते यदि। गत्वा चोर्द्ध्वं निवर्त्तेत एतदुद्घातलक्षण'मित्युक्तलक्षणे प्राणायामाङ्गकुम्भकभेदे, उत्कर्षे, मुद्गरे, शस्त्रे, ग्रन्थपरिच्छेदे च।

उद्दंश पु० उद्दशति। मस्तकदंशके (उकुण) कीटभेदे।

उद्दान न० उद् दो-ल्युट्। बन्धे,चूल्ल्याम्,वाड़वानले, मध्यलग्ने च

उद्दामन् त्रि० उद्गतं दाम्नः। बन्धरहिते, अप्रतिबन्धे,स्वतन्त्रे, अत्युग्रे च। उत्कृष्टं श्रेष्ठं दाम पाशाख्यमस्त्रं यस्य। वरुणे पु०।

उद्दाल पु० उद्+दल+णिच्-अच्। बहुवारकवृक्षे, वनकोद्रवे च। संज्ञायां कन्। वेदप्रसिद्धे ऋषिभेदे।

उद्दिष्ट त्रि० उद्+दिश-क्त। उपदिष्टे, अभिलषिते च छन्दःशास्त्रे प्रस्तारविशेषज्ञानसाधने न०।

उद्दीपन न० उद् दीप-णिच्-ल्युट्। प्रकाशने, उत्तेजने च। ल्यु। अलङ्कारोक्ते रसाद्युद्दीपके चन्द्रादौ विभावे सा०३प०

उद्देश पु० उद् दिश-घञ्। अनुसन्धाने, अन्वेषणे,अभिलाषे च

उद्देशतस् अव्य० उद्देश+तसिल् एकदेशेनेत्यर्थे संक्षेपार्थे च।

उद्द्राव पु० उद्-द्रु-घञ्। पलायने।

उद्द्योत पु० उद्+द्युत-घञ्। प्रकाशे। [प्रगल्भे,आहते च त्रि०

उद्धत पु०उद्+हन-क्त। राजमल्ले। वाक्यादिचञ्चले,अविनीते,

उद्धरण न० उद्+हृ-भावे ल्युट्। मुक्तौ,वमने, ऋणशुद्धौ, उन्मूलने च। कर्म्मणि ल्युट्। वान्तेऽन्नादौ।

उद्धर्ष न० पु० उद्+हृष-णिच्-घञ्। उत्सवे।

उद्धर्षण न० उद्+हृष-णिच्-ल्युट्। रोमाञ्चे।

उद्धव पु० उद्+हु-अप्। यज्ञाग्नौ, कृष्णदयिते यादवविशेषे च

उद्धान न०उद्धीयतेऽस्मिन् धाञ्-ल्युट्। चूल्ल्याम्,वमिते,उद्गते च

उद्धार पु० उद्ध्रियते उद्+हृ-कर्म्मणि घञ्। ऋणे। भावे घञ्। मुक्तौ, उद्धारे च। [दृढे भारशून्ये च।

उद्धुर त्रि० उद्गता धूरस्मात् प्रा० ब० अच् समा०। निर्भरे,

उद्धूत त्रि० उद् धू-क्त। उत्क्षिप्ते, उत्कम्पिते च।

उद्धूनन न० उद् धू-णिच्-ल्युट्। उत्क्षेपणे।

उद्धूलन न० उन्मर्द्दितं धूलिं करोति उद्धूलि+णिच्-भावे ल्युट्। धूलिमर्द्दने। 'एलालवङ्गकर्पूरकस्तूरीमरिचत्वचाम्। चूर्णस्योद्धूलनं देयं भोज्ये क्षीरेक्षुसम्भवे मांसमत्स्यभवेष्वेवा'मित्युक्तरूपे व्यञ्जनोपकरणे चूर्णभेदे च।

उद्धृत त्रि० उद्-हृ-धृ-वा क्त। उत्क्षिप्ते,भुक्तोज्झिते, कृतोद्धारे, पृथक्कृते, उच्छेदिते च। [उत्तरीयवहिष्कृतहस्ते।

उद्धृतपाणि त्रि० उत्तरीयात् उद्धृतः वहिष्कृतः पाणिर्येन।

उद्ध्मान न० उद्धमति वह्निरत्र उद्+ध्मा-ल्युट्। चूल्ल्याम्

उद्ध्य पु० उज्झत्युदकम् उज्झ-यत् नि०। नदभेदे।

उद्बन्धन न० उद्+बन्ध-ल्युट्। गलरज्ज्वादिनात्मबन्धने 'उद्बन्धनमृता ये चेति स्मृतिः।

उद्बुद्ध त्रि० उद्+बुध-क्त। विकसिते न्यायादिमते ज्ञातवस्तुनः संबन्धिज्ञानादिना कृतोद्दीपने संस्कारे च। यथा हस्ति-

दर्शनात् अनुभूतहस्तिपकसंस्कारस्य उद्बोधरूपे उद्दीपने कृते हस्तिपकः स्मर्य्यते इति प्रबुद्धे जागरिते, उद्बुद्धां च जगद्धात्रीमिति स्मृतिः । [ननाय संस्कारोद्दीपने च

उद्बोध पु० उद्+बुध-घञ् । किञ्चिद्बोधे न्यायादिमते स्मृतिज-

उद्भट पु० उद्+भट-अच् । कच्छपे,तण्डुलादेः प्रस्फोटनहेतौ शूर्पे,श्रेष्ठाशये महाशये,प्रवरे,ग्रन्थादहिर्भूते श्लोकादौ च

उद्भव पु० उद्+भू-अप् । जन्मनि उत्पत्तौ । अपादाने अप् । परमेश्वरे । [चु० भू० ल्युट् । चिन्तने ।

उद्भावन न० उद्+भू-णिच्-ल्युट् । कल्पने,उत्पादने च । उद्-

उद्भिज्ज त्रि० उद्+भिनत्ति क्विप् उद्भित् तथा सन् जायते जन-ड । भूमिमुद्भिद्य जाते तरुगुल्मादौ 'उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः' इति मनुः ।

उद्भिद् त्रि० भूमिमुद्भिनत्ति उद्+भिद्-क्विप् । वृक्षतृणगुल्मवल्लीलतारूपे पञ्चविधे स्थावरभेदे । यागविशेषे पु० ।

उद्भिद त्रि० उद्+भिद्-क । वृक्षादौ पञ्चविधे स्थावरे ।

उद्भूत त्रि० उद्+भू-क्त । उत्पन्ने । न्यायमते प्रत्यक्षयोग्ये च

उद्भेद पु० उद्भिद्यतेऽङ्गमत्र घञ् । रोमाञ्चे । भावे घञ् । स्फुरणे

उद्भ्रम पु० उद्भ्राम्यत्यनेन उद्+भ्रम-घञ् अवृद्धिः । उद्वेगे ।

उद्यत त्रि० उद्+यम-क्त । उद्युक्ते,ऊर्द्ध्वीकृते,प्रवृत्ते,ग्रन्थाध्याये च ।

उद्यम पु० उद्+यम-घञ् अवृद्धिः । उद्योगे ।

उद्यान न० उद्+या-आधारे ल्युट् । आक्रीडे वने । भावे-ल्युट् । निःसरणे । कर्म्मणि ल्युट् । प्रयोजने ।

उद्योग पु० उद्+युज-घञ् । यत्ने, चेष्टायाम्,उद्यमे च ।

उद्र पु० उनत्ति क्लिद्यति उन्द-रक् । जलविड़ाले । (उद्बिराव)

उद्रथ पु० उद्गतोरथो यस्मात् । रथकीले । उद्गतरथतुल्यः पक्षो यस्य (ताम्रचूड़विहगे ।

उद्रिक्त त्रि० उद्+रिच-क्त । अतिशयिते,अधिके,स्फुटे च ।

उद्रेक पु० उद्+रिच-घञ् । वृद्धौ, अतिशये, उपक्रमे च ।

उद्वर्त्त पु० उद्+वृत-घञ् । अतिशयिते, अधिके च ।

उद्वर्त्तन न० उद्वर्त्यतेऽनेन उद् वृत-णिच् ल्युट् । शरीरनिर्मलीकरणद्रव्यादौ । भावे ल्युट् । विलेपने,घर्षणे च । उद्+वृत-ल्युट् । उत्पतने ।

उद्वह पु० उद्वहति ऊर्द्ध्वं नयति पितॄन् वह अच् । पुत्रे 'प्रणमामि रघूद्वह'मिति तन्त्रम् । ऊर्द्ध्वेन वहति अच् । प्रवहवायोरूर्द्ध्वस्थिते वायुभेदे ,

उद्वान्त पु० उद्गतं वान्तमन्तर्जलमस्मात् प्रा० व० । निर्मदे गजे । उद्+वम क्त । उद्गीर्णे उद्गते च त्रि० ।

उद्वासन न० उद्+चु० वस-ल्युट् । मारणे उद्+वस+णिच्-ल्युट् । विसर्जने । [रूपे परिणये ।

उद्वाह पु० उद्+वह-घञ् । विवाहे भार्य्यात्वसंपादकव्यापार-

उद्वाहु त्रि० उद्गतौ बाहू यस्य । ऊर्द्ध्वमुत्तोलितबाहौ 'उद्वाहुरिव वामन' इति रघुः । [तया व्याकुलचित्ते,क्षुभिते च

उद्विग्न त्रि० उद्+विज-क्त । उद्वेगयुक्ते, दुःखपरिहाराक्षम

उद्वृत्त त्रि० उद्गतो वृत्तात् प्रा० त० । दुर्वृत्ते । उद्+वृत-क्त । उत्क्षिप्ते , भुक्तोज्झिते च ।

उद्वेग पु० उद्+विज-घञ् । व्याकुलचित्ततायाम् विरहजन्ये दुःखोद्गमे, भये च । गुवाकफले न० । उद्गतोवेगो ऽस्मात् । निश्चले, स्तिमिते । शीघ्रगामिनि च ।

उद्वेल त्रि० उद्गतो वेलाम् । अतिक्रान्तमर्य्यादे ।

उद्वेष्टन न० उद्+वेष्ट-ल्युट् । हस्तपादयोर्वन्धने, उपश्लेषे च उद्गतं वेष्टनात् त्रि० । उन्मुक्तबन्धने त्रि० ।

उध्रस उञ्छे क्र्या० पर० अक० सेट् । उध्रस्नाति औध्रासीत्

उध्रस उत्क्षेपे उञ्छे च(कणश आदाने) चु०सक०सेट् । उध्रासयति ते

उन्द क्लेदे रुधा०पर०अक० सेट् । उनत्ति । औन्दीत् । [वार्थे

उन्दरु पु०उन्द-अरु । मूषिके उर-उरु । उन्दुरः उन्दुरुश्चा-

उन्दुरकर्णी स्त्री० उन्दुरस्य कर्ण इव पर्णमस्याः । आखुकर्ण्याम्

उन्दूर पु० उन्द-ऊरु । मूषिके ।

उन्न त्रि० उन्द-क्त क्लिन्ने आर्द्रे (भिजे) दयापरे च ।

उन्नत त्रि० उद्+नम-क्त । उच्चे, महति च ।

उन्नतानत त्रि० उन्नतं च तदानतञ्च । उच्चनीचस्थानादौ ।

उन्नति स्त्री० उद् नम-क्तिन् । वृद्धौ,उदये, गरुड़भार्य्यायाञ्च ।

उन्नद्ध त्रि० उद्+नह-क्त । उद्बद्धे, उत्कटे च ।

उन्नमित त्रि० उद्+नम-णिच्-क्त । उत्तोलिते,ऊर्द्ध्वीकृते च ।

उन्न(न्ना)य पु०उद्+नी-अच् घञ् वा । कूपादितो जलादेरुत्तोलने

उन्नयन न० उद्+नी-ल्युट् । वितर्के, ऊर्द्ध्वप्रापणे च ।

उन्नस त्रि० उन्नता नासा यस्य नसादेशः । उन्नतनासिके ।

उन्निद्र त्रि० उद्गता निद्रा मुद्रा यस्य । विकसिते ।

उन्मज्जक पु० उद्+मज्ज-ण्वुल् । 'कण्ठदघ्ने जले स्थित्वा तपः कुर्व्वन् प्रवर्त्तते । उन्मज्जकः स विज्ञेयस्तापसोलोकपूजित' इत्युक्तलक्षणे तापसे । जलादेरुपरि उत्प्लावके त्रि० ।

उन्मत्त पु० उद्+मद-करणे क्त । धूस्तुरे मुचकुन्दवृक्षे च । कर्त्तरि क्त । उन्मादवति, ग्रहावेशवति च त्रि० ।

उन्मद त्रि० उद्गतो मदोहर्षोऽस्य । उन्मादयुक्ते । करणे अच् मादके द्रव्ये । [मनस्के च ।

उन्मनस् त्रि० उद्भ्रान्तं मनोऽस्य । उत्कण्ठायुक्ते, अन्य-

उन्मन्थ पु० उद्+मन्थ-घञ् । बधे ।

उन्माथ पु० उन्मथ्यतेऽनेन उद्+मथ-करणे घञ् । आमिष-दानेन मृगादिबन्धनार्थं निवेशिते कूटयन्त्रे (फांद) इति ख्याते । भावे घञ् । विलोड्योत्थापने, हिंसने च ।

उन्माद पु०उद्+मद-घञ् । चित्तविभ्रमे, भूताद्यावेशात् चित्त स्यानवस्थितौ, विरहिणां स्मरकृतावस्थाभेदे, कायिकरोग-कृते मतिभ्रंशे च । [देवस्य वाद्यभेदे ।

उन्मादन पु० उद्+मद-णिच्-ल्यु । उन्मत्ततकारके काम-

उन्मान न० उद्+मा-करणे ल्युट् । उर्द्धमाने स्वर्णादेस्तुल्य-मानसाधने, तोलकादौ, परिमाणमात्रे च । [प्रकाशिते च ।

उन्मिषित त्रि० उद्+मिष-क्त । प्रफुल्ले, विकसिते किञ्चित्

उन्मीलन न० उद्+मील ल्युट् । उन्मेषे, विकाशने च ।

उन्मुख त्रि० उद्+ऊर्द्धं मुखमस्य । ऊर्द्धास्ये, उद्युक्ते च ।

उन्मुद्र त्रि० उद्गता मुद्रा यस्मात् । त्यक्तमुद्रे, विकसिते च ।

उन्मूलन न० उन्मूल+णिच्-ल्युट् । उत्पाटने उद्धृतमूलकरणे ।

उन्मेष पु०उद्+मिष-घञ् । चक्षुरादेरुन्मीलने, किञ्चित्प्रकाशे च

उप अव्य०वप-क । अधिकार्थे,हीने, आसन्ने, सामीप्ये, सादृश्ये, प्रतियत्ने-गुणाधाने, व्याप्तौ, पूजायाम् शक्तौ, आरम्भे, दाने, दोषाख्याने, आश्चर्यकरणे अत्यये, निदर्शने च ।

उपकण्ठ त्रि० उपगतः कण्ठं गति०। निकटे, कण्ठासन्ने च। ग्रामान्ते, अश्वानाम् स्कन्दितगतौ च न०।

उपकरण न० उपक्रियतेऽनेन उप-कृ-ल्युट् । प्रधानसाधक गुणेऽङ्गे यथान्नभोजनादौ व्यञ्जनादि, शयने खट्वादि, स्नाने-ऽनुलेपनादि, पूजायां पुष्पादि । भूपादीनां छत्रचामरादि परिच्छेदे च ।

उपकार पु० उप-कृ-घञ् । प्रधानस्यानुगुण्यसंपादने, उपकृतौ

उपकारक त्रि०उप+कृ-ण्वुल् । उपकारकर्त्तरि । स्त्रीत्वे टापि अतइत्त्वे उपकारिका । नृपालये, पटनिर्म्मितराजसदने च

उपकार्य्य त्रि० उप+कृ-ण्यत् । उपकारयोग्ये । राजालये, पटनिर्म्मितराजसदने च स्त्री० टाप् ।

उपकुञ्चि स्त्री० उप+कुनृज-इ । कृष्णजीरके । स्वुलि टापि अतइत्त्वे । उपकुञ्चिकाप्यत्र तुत्थायां सूक्ष्मैलायाञ्च ।

उपकुर्व्वाण पु० उप-कृ-शानच् । सावधिकब्रह्मचर्य्यकारिणि वेदाध्ययनार्थं कञ्चित्कालं ब्रह्मचर्य्यव्रतधारिणि ।

उपकुल्या स्त्री० उप+कुल-क्यप् । पिप्पल्याम् उपगतः कुल्यां कृत्रिमं सरः । कुल्यासन्ने त्रि०। [जलाशये

उपकूप पु० उपगतः कूपं गति० । कूपसमीपस्थे खातरूपे

उपक्रम पु०उप-क्रम-घञ् । उपायज्ञानपूर्व्वकारम्भे, प्रथमारम्भे चिकित्सायाञ्च ।

उपक्रोश पु०उप+क्रुश-आह्वाने घञ् । निन्दायाम् । आसन्न-क्रोशे त्रि० । अव्ययी०। क्रोशसमीपे अव्य० ।

उपक्रोष्टृ पु० उप+क्रुश-तृच् । गर्द्दभे । निन्दके त्रि० ।

उपक्लृप्त त्रि० उप+कृप-क्त । विन्यस्ते, उपभोगार्थं प्रस्तुते च ।

उपगत त्रि० उप-गम-क्त । स्वीकृते, उपस्थिते, ज्ञाते च । [च

उपगम पु०उप+गम-घञ् अवृद्धिः । समीपगमने, अङ्गीकारे, ज्ञाने

उपगीति स्त्री० उप+गै-क्तिन् । आर्य्याविशेषे छन्दोभेदे ।

उपगूह्य त्रि० उप+गुह-ण्यत् । आलिङ्ग्ये, ग्राह्ये च । भावे ण्यत् । आलिङ्गने ।

उपगूहन न० उप+गुह-ल्युट् । आलिङ्गने, ग्रहणे च ।

उपग्रह पु०उप+ग्रह-अप् । कारावन्धने, वन्दीकरणे, उपयोगे, अनुकूलने च । कर्म्मणि घञ् । कारारुद्धे वन्द्याम् । ज्योति-षोक्ते ग्रहतुल्ये गगनस्थे ज्योतिःपदार्थे धूमकेत्वादौ च ।

उपग्राह्य न० उप+ग्रह-ण्यत् । उपढौकने (भेट) ।

उपघात पु० उप-हन-घञ् । अपकारे, नाशने, रोगे च ।

उपघ्न पु० उप+हन-क नि० । आसन्ने आश्रये ।

उपचक्र पु० उपमितं चक्रेण तुल्यनामत्वात् । चक्रवाकपक्षिणि ।

उपचय पु० उप+चि-अच् । वृद्धौ, उन्नतौ, ज्योतिषोक्तेषु लग्नतः तृतीयषष्ठदशमैकादशस्थानेषु च ।

उपचरित त्रि० उप+चर-क्त । उपासिते लक्षणया बोधिते च।

उपचर्य्या स्त्री० उप+चर-क्यप् । चिकित्सायां, सेवायाञ्च ।

उपचाय्य पु० उपचीयते संस्क्रियतेऽसौ नि०। यज्ञे संस्कृताग्नौ ।

उपचार पु० उप+चर-घञ् । चिकित्सायां, सेवायां, व्यवहारे, उत्कोचे, लक्षणया शक्यार्थत्यागेनान्यार्थपरत्वकल्पने, अयथार्थ-वाक्येन सन्तोषकरणे च उपचारपदं न चेदिदमिति कुमारः ।

उपचित त्रि० उप+चि-क्त । दग्धे, समृद्धे, सञ्चिते, समा-हिते, अवयववृद्ध्या वर्त्तुलीभूते च ।

उपचित्रा स्त्री०उपगता चित्रं वर्णम् । उन्दुरपर्ण्याम् चित्रा-तारासमीपस्थायां स्वातौ च ।

उपच्छन्द पु० उप+छन्द-घञ् । ग्रहणार्थं प्रार्थनेऽनुरोधे च । तस्मिन्नुपच्छन्दयति प्रयोज्यमिति रघुः ।

उपजाति स्त्री० वर्णवृत्ते छन्दोभेदे ।

उपजाप पु० उप+जप-घञ् । भेदे,विच्छेदे, 'उपजापः कृतस्ते-ने'ति माघः । उपांशुजपे च ।

उपजिह्वा स्त्री० उपगता ऊर्द्ध्वमुखी जिह्वा यस्याः । काकी भेदे। प्रा०स० । उपरिस्थायां जिह्वायाञ्च (आलजिभ्) ।

उपजीविका स्त्री० उपजीवयति उप+जीव-करणे कर्तृत्वोप-चारात् ण्वुल् अत इत्त्वम्। जीवनोपायभूतायां वृत्तौ ।

उपजीविन् त्रि॰ उप+जीव-णिनि । आश्रिते ।

उपजीव्य त्रि॰ उप+जीव-ण्यत् । आश्रये ।

उपज्ञा स्त्री॰उप+ज्ञा-कर्म्मणि अङ् । विनोपदेशेन स्वयमुद्भाव्ये प्रथमं ज्ञायमाने । भावे अङ् । आद्ये ज्ञाने । [उपायने

उपढौकन न॰ उप+ढौक-कर्म्मणि ल्युट् । (भेट) उपहारे

उपत्यका स्त्री॰ उप+त्यकन् । पर्व्वतस्यासन्नायां भूमौ ।

उपदंश पु॰ उप+दन्श-घञ् । मद्यपानरोचके (चाटनी) भक्ष्य द्रव्ये,भक्ष्यद्रव्योपकरणमात्रे, उपस्थरोगभेदे च ।

उपदर्शक पु॰उप+दृश-णिच्-ण्वुल् । द्वारपाले । दर्शयितरि त्रि॰

उपदा स्त्री॰ उप+दा-अङ् । उत्कोचे,उपढौकने च ।

उपदेश पु॰ उप+दिश-घञ् । मन्त्रादिकथने, अनुशासने, हितकथने,प्रवर्त्तकवाक्ये च ।

उपद्रव पु॰ उप+द्रु-अप् । उत्पाते शुभाशुभसूचके भूकम्पादौ, रोगजन्येऽन्यस्मिन् पिपासादाहादौ विकारे च ।

उपद्रुत त्रि॰ उप+द्रु-क्त । व्याकुले, प्राप्तोपद्रवे च ।

उपधा स्त्री॰ उप-धा-अङ् । 'धर्म्मार्थकाममोक्षैश्च प्रत्येकं परिशोधने । उपेत्य धीयते यस्मादुपधा तेन कीर्त्तिते'त्युक्ते धर्म्मार्थाद्युपन्यासेन मन्त्रिणां परीक्षणे, व्याकरणोक्ते, अन्त्यवर्णात् पूर्व्ववर्णे च ।

उपधातु पु॰ उपमितः धातुभिः । स्वर्णादिप्रधानधातुसदृशेषु 'सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् । तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतु' इत्युक्तेषु सप्तसु द्रव्येषु, शरीरस्थेषु रसादिजन्येषु स्तनदुग्धादिषु च ।

उपधान न॰उपधीयते शिरोऽत्र । (बालिश) शिरोधाने,प्रणये, व्रतभेदे, विषे च । [शनरूपे कपटे,रथचक्रे च ।

उपधि पु॰उप+धा-कि । अन्यथा स्थितस्य वस्तुनोऽन्यथा प्रका-

उपधूपित त्रि॰ उप+धूप-क्त । आसन्नमरणे,सन्तापयुते च ।

उपधृति स्त्री॰ उप+धृ-क्तिन् । किरणे ।

उप(पा)ध्मानीय पु॰उप्यस्य ध्मायतेऽनेन उपध्मानमोष्ठस्तत्रोच्चार्य्यमाणः । पफयोः परयोः उच्चार्य्यमाणे विसर्गसदृशे वर्णभेदे तस्य व्यञ्जिका अर्द्धविसर्गाकारा रेखा । उपाध्मानीयश्च

उपनत त्रि॰ उप+नम-क्त । उपस्थिते, प्राप्ते च ।

उपनय पु॰ उप+नी-अच् । उपनयने 'यद्योक्तकर्म्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगाद् बालस्योपनयं विदु'रिति स्मृत्युक्ते संस्कारविशेषे । न्यायमते यो यो धूमवान् स वह्निमान् अयमपि तथेत्यादिवाक्यरूपे न्यायावयवभेदे, ज्ञानलक्षणाजन्ये ज्ञानभेदे च ।

उपनयन न॰ उप+नी-ल्युट् । स्मृत्युक्ते संस्कारभेदे उपनयार्थे

उपनाह पु॰उप+नह-घञ् । वीणायां तन्त्रबन्धनस्थाने,व्रणाद्युपशमार्थं लेपनद्रव्ये च । [द्रव्ये ।

उपनिधि पु॰ उप+नि+धा-कि । न्यासे विश्वासेन स्थापिते

उपनिषद् स्त्री॰ उपनिषीदति प्राप्नोति ब्रह्मात्मभावोऽनया । उप+नि+सद-क्विप् । ब्रह्मविद्यायां, तत्प्रतिपादके वेदशिरोभागे वेदान्ते च । [वीथौ राजमार्गे ।

उपनिष्कर न॰उपनिष्किरन्ति सैन्यान्यत्र (उप-निस्-कृ+अप् ।

उपनिष्क्रमण न॰ उप+निस्-क्रम-ल्युट् । राजपथे ।

उपनेत्र न॰ उपगतं नेत्रम् । नेत्रसमीपे धृते काचादिनिर्म्मिते नेत्रोपकारके द्रव्ये (चसमा) ।

उपन्यास पु॰ उप+नि+अस-घञ् । वाक्योपक्रमे ।

उपपति पु॰ उपमितः पत्या । जारे ।

उपपत्ति स्त्री॰ उप+पद-क्तिन् । युक्तौ, सङ्गतौ च ।

उपपद न॰ उपोच्चारितं पदम् प्रा॰स॰ । समीपोच्चारिते नामोत्तरे उच्चारिते शर्म्मवर्म्मादिरूपे शब्दे, व्याकरणे प्रत्ययादिविधायकसूत्रे सप्तम्यन्तपदेन निर्द्दिश्यमाने पदे च । यथा कर्म्मण्यण् इत्यादौ कर्म्मणीतिसप्तम्यन्तं पदम् अण्प्रत्ययविधाने उपपदम् । [रघुः ।

उपपन्न त्रि॰उप+पद-क्त । युक्तियुक्ते,'उपपन्नं ननु शिवमि'ति

उपपातक न॰ उपमितं पातकेन । गोवधादिरूपे पापे ।

उपपादन न॰ उप+पद+णिच्-ल्युट् । युक्त्या समर्थने सम्यक्प्रतिपादने च । [प्रतिपादिते च ।

उपपादित त्रि॰उप-पद+णिच्-क्त । युक्त्या समर्थिते, सम्यक्

उपपुर न॰ उप समीपे पुरम् । पुरसमीपे शाखानगरे ।

उपपुराण न॰ उपमितं पुराणेन । सर्गप्रतिसर्गाद्युक्तिरूपपुराणलक्षणयुक्तेषु सनत्कुमाराद्युक्तेषु अष्टादशसु ग्रन्थेषु ।

उपप्लव पु॰ उप+प्लु-अप् । गगनादुल्कापातादिरूपे उपद्रवे, चन्द्रार्कोपग्रहणे च ।

उपप्लुत त्रि॰उप+प्लु-क्त । पीडिते,ग्रस्ते-चन्द्रेऽर्के च उपद्रुते च । 'उपप्लुतं पातुमद' इति माघः । [शोपकारके ।

उपभूषण न॰ उपभूष्यतेऽनेन ल्युट् । घण्टाचामरादौ भूष-

उपभोग पु॰ उप+भुज-घञ् । भोजनादिजन्ये सुखानुभवे भोगे

उपमर्द्द पु॰ उप+मृद-घञ् । आलोडने,हिंसने, पूर्व्वधर्म्मविनाशनेन धर्म्मान्तरोत्पादने च । [सा॰द॰

उपमा स्त्री॰ उप+मा-अङ् । सादृश्ये, अर्थालङ्कारभेदे च ।

उपमान न॰ उपमीयतेऽनेन उप+मा-ल्युट् । सादृश्यज्ञानसाधने सादृश्यप्रतियोगिनि च, येन सादृश्यं भवति तस्मिन्, यथा चन्द्र इव सुखमित्यादौ चन्द्र उपमानम् । भावे ल्युट् । सादृश्यज्ञाने

उपमिति स्त्री० उप+मि-क्तिन् । सादृश्यज्ञाने उपमायाम् ।
उपमेय त्रि० उपमीयतेऽसौ उप+मि-यत् । सादृश्याश्रये यथा चन्द्र इव मुखमित्यादौ मुखम् ।
उपमेयोपमा स्त्री० अर्थालङ्कारभेदे साहि० १० प० ।
उपयन्तृ पु० उप+यम-तृच् । स्त्रियो विवाहकर्त्तरि पत्यौ ।
उपयम पु० उप+यम्-घञ् अवृद्धिः । विवाहे । वा वृद्धिः । उपयामश्चात्र । [वैवाहिके मन्त्रे ।
उपयमन न० उप+यम-ल्युट् । विवाहे । करणे ल्युट् ।
उपयाचक त्रि० उपगम्य याचकः याच-ण्वुल् । समीपे आगम्य याच्ञाकर्त्तरि । [देवाय देये पश्वादौ च ।
उपयाचितक न० उप+याच-क्त स्वार्थे कन् । प्रार्थिते, स्वेष्टसिद्धये
उपयुक्त त्रि० उप+युज-क्त । न्याय्ये, रचिते, भुक्ते च ।
उपयोग पु० उप+युज-घञ् । आचरणे भोजने, इष्टसिद्धि-साधने व्यापारे च । [साधनतायाम्, प्रयोजने च ।
उपयोगिता स्त्री० उपयोगिनो भावः तल् । आनुकूल्ये, इष्ट-
उपयोगिन् त्रि० उप+युज-घिणुन् । इष्टसाधने अनुकूले उपयुक्ते च । [सनेऽभ्यासक्ते, रञ्जनद्रव्येण रक्ते च ।
उपरक्त पु० उप+रन्ज-क्त । राहुग्रस्ते चन्द्रे सूर्य्ये च । व्य-
उपरक्षण न० उप+रक्ष-ल्युट् । रक्षार्थं सैन्यादिस्थापने ।
उपरत त्रि० उप+रम-क्त । विरते, निवृते, मृते, सर्व्व-कामनाशून्ये च ।
उपरतस्पृह त्रि० उपरता निवृत्ता स्पृहा यस्य । सत्यपि जीवने स्वामित्वे, विषयभोगादौ च अत्यन्तनिवृत्ताभिलाषे । 'पित-र्य्युपरतस्पृहे' इति स्मृतिः ।
उपरति स्त्री० उप+रम-क्तिन् । विरतौ, लब्धप्राप्तावौदासीन्ये, विषयेभ्य इन्द्रियाणां निवारणे, विहितकर्म्मणाम् विधा-नतस्त्यागरूपे संन्यासे "पुमर्थः कर्म्मणा नेति धीर्य्या सोपप-रतिर्भवेदित्युक्तरूपायां बुद्धौ च ।
उपरत्न न० उपमितं रत्नेन गति० । मणिसदृशेषु 'उपरत्नानि काचश्च कर्पूरोऽश्मा तथैव च । मुक्ताशुक्तिस्तथा शङ्ख इत्युक्तकाचादिषु । [च 'फेनोपरमे दद्यादि'ति वैद्यकम् ।
उपरम पु० उप+रम-घञ् अवृद्धिः विषयवैराग्ये, निवृत्तौ ।
उपराग पु० उप+रन्ज-घञ् । रविचन्द्रयोर्ग्रहणे । ग्रहणञ्च राह्वधिष्ठितभूमिच्छायया चन्द्रस्य, चन्द्रमण्डलेन च रवे र्मण्डलाच्छादनमिति सिद्धान्ते स्थितम् ।
उपरि अव्य० ऊर्द्ध+रिल् उपादेशश्च । प्रथमापञ्चमीसप्तम्य-न्तार्थवृत्तेः ऊर्द्ध्वशब्दस्यार्थे ।
उपरिष्टात् अव्य० ऊर्द्ध-रिष्टाति उपादेशश्च । उपरिशब्दस्यार्थे

उपरोध पु० उप+रुध-घञ् । आनुकूल्याय कथनरूपेऽनुरोधे, समीपे रोधने च । [त्रि० ।
उपरोधक न० उप+रुध-ण्वुल् । वासगृहे । अनुरोधकर्त्तरि
उपल पु० उपनीयते उपस्तीर्य्यते गिरिरनेन नी-ड नस्य लत्वम् । प्रस्तरे । अर्श आदित्वादच् । पाषाणचितायां मृदि स्त्री० ।
उपलक्षण समीपस्थस्य स्वसंबन्धिनश्च लक्षणं ज्ञानं यस्मात् । स्वस्य स्वान्यस्य च अजहत्स्वार्थया लक्षणया बोधके शब्दे यथा काकेभ्योदधि रक्ष्यतामित्यत्र काकपदं स्वस्य स्वान्या-देः श्वादेश्च बोधकम् । ['उपलब्धेरिति' वेदान्तसूत्रम्
उपलब्धि स्त्री० उप+लभ-क्तिन् । ज्ञाने, प्राप्तौ च । 'नाभाव
उपलम्भ पु० उप+लभ-घञ् मुम् च । लाभे, ज्ञाने च ।
उपलिङ्ग न० उपमितं लिङ्गेन । लोकसिद्धसाधनभावेन लिङ्गेनानुमापकेन सदृशे अलौकिकसाधनभावके अरिष्ट-सूचके भूकम्पादौ उपद्रवे ।
उपवट पु० उपमितो वटेन । वटवृक्षसदृशे प्रियासालवृक्षे ।
उपवन न० उपमितं वनेन । वनतुल्ये कृत्रिमे आरोपितवृक्ष-समूहे उद्याने । [वर्हणमप्यत्र न० ।
उपवर्ह पु० उप+वृह-घञ् । शिरोधाने (बालिश) ल्युट् । उप-
उपवसथ पु० उप+वस-अथ । ग्रामे ।
उपवास पु० उप+वस-घञ् । "तपनोदयमारभ्य यामाष्टकम-भोजनम् । उपवास इति ख्यात" इति स्मृत्युक्ते अनाहारे ।
उपवाह्य पु० उप+वह-ण्यत् । राजवाहके ।
उपविष पु० उपमितं विषेन । 'अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका । धस्तूरः करवीरश्च पञ्च चोपविषाः स्मृता इत्युक्तेष्वर्कक्षीरादिषु ।
उपवीत न० उप+अज-क्त-वीभावः । वह्निर्भूतदक्षिणहस्ततया वामांशस्थापिते कार्पासे यज्ञसूत्रे ।
उपवीतिन् त्रि० उपवीतं विद्यतेऽस्य । यज्ञोपवीतवति ।
उपवृंहित त्रि० उप+वृन्ह्-क्त । वर्द्धिते ।
उपवेद पु० उपमितः वेदेन । वेदसदृशे आयुर्वेदादौ ।
उपव्याघ्र पु० उपमितो व्याघ्रेण । व्याघ्रतुल्ये मृगान्तके (चितावाघ) चित्रकाख्ये पशुभेदे ।
उपशम पु० उप+शम-घञ् अवृद्धिः । इन्द्रियाणां निग्रहे, तृष्णानाशे, रोगप्रतीकारे, शान्तौ च ।
उपशय पु० उप+शी-अच् । समीपशयने, 'औषधान्नविहारा-णामुपयोगं सुखावहम् । विद्यादुपशयं व्याधेरिति वैद्य-कोक्ते उपयोगभेदे च ।
उपशल्य न० उपगतं शल्यम् अस्थिस्थानं (भागाड़) । ग्रामान्ते

उपशाय पु०उप+शी-घञ् । यामिकभटानां पर्य्यायेण शयने ।
उपश्रुति स्त्री० उप+श्रु-क्तिन् । अङ्गीकारे देवशुभाशुभप्रश्ने च ।
उपश्लेष पुः उप ईषत् एकदेशेन श्लेषः संबन्धः । आधाराधे-
यथोरेकदेशसंबन्धे । यथा स्थल्घटयोः । [दिग्धि त्रि०
उपष्टम्भक न० उप+स्तम्भ-ण्वुल् । स्थूणायाम् । स्तम्भका-
उपसंग्रह पु० उप+सम्+ग्रह-अप् । पादस्पर्शपूर्व्वकनमस्कारे
उपसंयम पु० उप+सम्+यम-घञ् अवृद्धिः । उपसंहारे ।
उपसंव्यान न०उपसंवीयतेऽनेन व्येञ्-ल्युट् । परिधानवस्त्रे ।
उपसंहार पु० उप+सम्+हृ-घञ् । समाप्तौ,संग्रहे च ।
उपसत्ति स्त्री०उप+सद-क्तिन् । सेवायां,सङ्गमाते,प्रतिपादने च
उपसन्न त्रि०उप+सद-क्त । उपस्थिते, निकटागते च ।
उपसम्पन्न त्रि०उप+सम्+पद-क्त । यज्ञार्थहते प्रोक्षिते पशौ,
पाकेन संस्कृते मांसादौ,पर्य्याप्ते, मृते च । [धानायोपगमे ।
उपसर पु० उप+सृ-अप् । स्त्रीगव्यादिषु पुंगवादीनां गर्भा-
उपसर्ग पु०उप+सृज-घञ् । रोगविकारे उपद्रवे, शुभाशुभ-
सूचके महाभूतविकाररूपे उत्पाते, व्याकरणोक्तेषु "नि-
पाताश्चादयोज्ञेयाः प्रादयस्तूपसर्गकाः । द्योतकत्वात् क्रिया-
योगे लोकादवगताइमे"इत्युक्तलक्षणेषु क्रियायोगे प्रादिषु च
उपसर्ज्जन न० उप+सृज-ल्युट् । अमुख्ये गौणे, विशेषणे,
व्याकरणोक्ते समासशास्त्रे प्रथमान्तनिर्द्दिष्टे च ।
उपसर्य्या स्त्री०उपस्रियतेऽसौ सृ-यत् । गर्भग्रहणयोग्यायाम्
ऋतुमत्यां गवि । [कन् । चन्द्रार्कसमीपे मण्डलाकारे परिधौ
उपसूर्य्यक न० उपगतं सूर्य्यं सूर्य्यमिव चन्द्रं वा संज्ञायां
उपसूर्य्यकमण्डल न० उपसूर्य्यकं मण्डलं वेष्टनम् कर्म्म० ।
चन्द्रार्कवेष्टने परिधौ । [युक्ते, विसृष्टे च त्रि० ।
उपसृष्ट न० उप+सृज-क्त । मैथुने । व्याकरणोक्ते प्राद्युपसर्ग-
उपसेक पु० उप+सिच+घञ् । सेचनेन मृदूकरणे ।
उपस्कार पु० उप+कृ-अप् सुट् च । व्यञ्जनादिसंस्कारके पिष्ट
धन्याकहरिद्रादौ (वाटना) गृहोपकरणे दृषदुलूखलादौ च
उपस्थातृ त्रि०उप+स्था-तृच् । सेवके, उपगते, ऋत्विग्भेदे च ।
उपस्थान न० उप+स्था-ल्युट् । उपेत्य स्थितौ,नमस्कारे च
उपस्थित त्रि० उप+स्था-क्त । समीपस्थिते, प्राप्ते, आगते च
उपस्पर्श पु० उप+स्पृश-घञ् । स्पर्शे, स्नाने च । उपस्पृशन्ति
इन्द्रियाण्यत । विधिना जलपानपूर्व्वके मुखादिस्पर्शरूपे
वैधाचमने । तथेत्युपस्पृश्येति रघुः ।
उपस्पृष्ट त्रि० उप+स्पृश-क्त । आचान्ते कृताचमने, समीपे
आसनादौ स्पृष्टे च । [हारसमीपे अव्य० ।
उपहार पु० उप+हृ-घञ् । (भेट) उपढौकये । अव्ययी० ।

उपह्वर पु० उप+ह्वृ-अप् । युद्धे । निर्जने निकटे च न० ।
उपांशु अव्य० उप+अनुश-उ । निर्जने अप्रकाशे च । 'जिह्वोष्ठौ
चालयेत् किञ्चित् देवतागतमानसः । निजश्रवणयोग्यः
स्यादुपांशुः स जपः स्मृत इत्युक्तलक्षणे मन्त्रादेर्जपे पु० ।
'उपांशुः स्याच्छतगुण इति मनुः ।
उपाकरण न० उप+आ+कृ-ल्युट् । उपनयनपूर्व्वकं वेदस्य
ग्रहणे, श्रावण्यां पूर्णिमायां कर्त्तव्ये वैधकर्म्मविशेषे, संस्का-
रपूर्व्वकं यज्ञे पशूनां हनने, आरम्भे च ।
उपाकर्म्म न० उप+कृ-मनिन् । उपाकरणशब्दार्थे ।
उपाकृत त्रि० उप+आ+कृ-क्त । यज्ञे हननार्थं कृतसंस्कारे
पशौ, आरब्धे च ।
उपाख्यान न० उप+आ+ख्या-ल्युट् । पूर्व्ववृत्तकथने, 'रामो
पाख्यानमत्रैवे'ति महाभारतम् । कथनमात्रे च । [गमने च ।
उपागम पु० उप+आ+गम-घञ् अवृद्धिः । स्वीकारे,समीपा-
उपाङ्ग न० उपमितमङ्गेन गति० । अङ्गसदृशे प्रधानोपयोगिनि
'साङ्गोपाङ्गैरिहोदिता' इत्यमरः ।
उपाजे अव्य० उप+अज-के वीभावाभावः । दुर्बलस्य बलाधाने
उपात्त त्रि० उप+आ+दा-क्त । गृहीते, प्राप्ते च 'वयं
कोविदुपात्तस्येति स्मृतिः । अन्तर्गतमदे गजे पु० ।
उपात्यय पु० उप+अति+इण्-अच् । लोकशास्त्राचाराति-
क्रमे, व्यतिक्रमे,क्रमोल्लङ्घने, नाशे च ।
उपादान न० उप+आ+दा-ल्युट् । ग्रहणे, स्वस्वविषयेभ्य
इन्द्रियाणां निवारणरूपे प्रत्याहारे, कार्य्यजननार्थमुपादी-
यमाने कार्य्यान्विते कारणे, यथा मृदादि घटादेः, स्वर्णादि
अलङ्कारादेः, जननार्थं गृह्यते । तत्र सर्व्वदा कार्य्येष्वनुगतम्
उपादेय त्रि० उप+आ+दा-यत् । उत्कृष्टे, ग्राह्ये, प्रधाने,
विधेये च उपादेये गुणो भवेदिति भट्टकारिका ।
उपाधि पु० उप+आ+धाञ्-कि । धर्म्मचिन्तायाम्, विशेषणे
उपाधिर्भिद्यते न तु तद्वानिति सांख्यसूत्रम् । स्वधर्म्मस्यान्य-
गततयावभासके, यथा दर्पणादि स्वगतं नीलिमादिकं
स्वप्रतिबिम्बितमुखगततया, जवापुष्पं च स्वगतं रक्तत्वं
स्फटिकगतयाऽवभासयति अतोऽत्र दर्पणादि नीलिमाद्य-
वभासने उपाधिः । न्यायमते हेत्वव्यभिचारोद्भावके
साध्यव्यापके साधनाव्यापके पदार्थे च ।
उपाध्याय पु० उपेत्याधीयतेऽस्मात् उप+अधि+इङ्-घञ् ।
'एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति
वृत्त्यर्थमुपाध्यायः स उच्यते' इति मनूक्तलक्षणे वेदैकदेश-
तदङ्गाध्यापके । स्त्रियां ङीपि उपाध्याया उपाध्यायीतिरूप-

ध्यम् । उपाध्यायस्य पत्नीत्यर्थे ङीष् आनुक् वा उपाध्या-
यानी उपाध्यायी च । [कायाम् ।

उपानह् स्त्री० उप+आ-नह्-क्विप् उपसर्गदीर्घः । चर्म्मपादु-

उपान्त पु० उपमितमन्तेन प्रा०स० । निकटे, प्रान्ते च ।

उपान्त्य त्रि० उपान्ते भवः यत् । अन्त्यसमीपभवे ।

उपाय पु० उप+अय+घञ् । साधने, उपगमे, राज्ञां रिपु-
निराकरणहेतुषु सामादिषु च । [गमने च ।

उपायन न० उप+अय-ल्युट् । तोषकारके उपहारे, समीप-

उपारत त्रि० उप+आ+रम-क्त । निवृत्ते 'उपारताः पश्चिम-
रात्रगोचरादि'ति भारविः ।

उपालम्भ पु० उप+आ+लभ-घञ् मुम् च । निन्दापूर्व्वक-
दुष्टवचने, परस्परदूषणे च ।

उपावृत्त त्रि० उप+आ+वृत-क्त । श्रमापनयनाय पुनःपुन-
र्भूमिलुठितेऽश्वे, प्रतिनिवृत्ते च । [त्रि० ।

उपासक त्रि० उप+आस-ण्वुल् । उपासनकर्त्तरि, सेवके च

उपासङ्ग पु० उपासज्यन्ते शरा अत्र । उप+आ+सन्ज-घञ् ।
तूणे । [सेवने । युच् । देवताद्याराधने स्त्री० ।

उपासन न० उप+अस-क्षेपे ल्युट् । शराभ्यासे । आस+ल्युट्

उपासित त्रि० उप+आस-क्त । सेविते, कृतोपासने देवादौ च ।

उपास्ति स्त्री० उप+आस-क्तिन् । उपासनायाम् 'यदुपास्तिम-
सावत्वेति' कुसुमाञ्जलिः ।

उपाहित पु० उप आसन्नमहितं यतः । उल्कापातादौ अन्यान्या
तरूपे उपद्रवे । उप+आ+धा-क्त । आरोपिते, योजिते च त्रि०

उपेक्षक त्रि० उप+ईक्ष-ण्वुल् । विवादिनोर्जयपराजयासंसृष्टे,
तत्कृतहर्षविषादशून्ये, उदासीने, प्रतीकारानुद्यते च

उपेक्षा स्त्री० उप+ईक्ष-अ । त्यागे "इदं न मम स्यादिती"-
च्छाभेदे, औदासीन्ये, अनपेक्षणे च ।

उपेन्द्र पु० उपगत इन्द्रम् अनुजत्वात् । विष्णौ । स हि
कश्यपात् अदितौ इन्द्रादपरं वामनरूपतया संजातः ।

उपेन्द्रवज्रा स्त्री० एकादशाक्षरपादके छन्दोभेदे ।

उपेय त्रि० उप+इण्-यत् । उपायसाध्ये, प्राप्तव्ये च ।

उपोढ त्रि० उप+वह-क्त । सन्निवेशविशेषयुक्ते व्यूढे सैन्ये
निकटे, ऊढे कृतविवाहे च ।

उपोत्तम त्रि० उपगतमुत्तममन्त्यम् । अन्त्यसमीपे उपान्त्ये ।

उपोदकी स्त्री० उपगतमुदकमत्र । पूतिकायाम् (पुइशाक ।

उपोद्घात पु० उप+उद्+हन-घञ् । प्रकृतोपपादके उदाहरणे
प्रकृतार्थं वर्णयितुमर्थान्तरवर्णने, "चिन्तां प्रकृतसिद्ध्यर्थामु-
पोद्घातं विदुर्बुधा" इत्युक्तलक्षणायां चिन्तायाञ्च ।

उपोषण न० उप+उष-ल्युट् । उपवासे अहोरात्राभोजने ।

उपोषित न० उप+वस+भावे-क्त । उपवासे । कर्त्तरि क्त ।
उपवासकर्त्तरि त्रि० । [धान्यादौ क्षेत्रे ।

उप्त त्रि० वप-क्त । कृतवापे धान्यादौ । अधिकरणे क्त । उप्त-

उप्तकृष्ट त्रि० पूर्व्वमुप्तं पश्चात् कृष्टं पूर्व्वकालेत्यादि स० । वीज
वपनानन्तरं कृष्टे क्षेत्रे (बीजाकृते क्षेत्रे) । (काडान) ।

उब्ज आर्जवे तुदा० पर० अक० सेट् । उब्जति औब्जीत् ।

उभ त्रि० द्विव० । उ-भक् । द्वित्वविशिष्टार्थे । अस्य समासादि
वृत्तौ प्रयोगो नास्ति । [ऽर्थे ।

उभय त्रि० उभौ अवयवौ यस्य उभ+अयट् । द्वित्वविशिष्टे-

उभयतस् अव्य० उभ-तसिल् वृत्तौ अयः । उभयपार्श्वे ।

उभयथा अव्य० उभ+थाच् । वृत्तौ अयः । उभयप्रकारेणेत्यर्थे

उभयद्युस् अव्य० उभ-द्युस् वृत्तौ अयः । उभयदिनयोः ।
एद्युस् । उभयेद्युरप्यत्र ।

उम् अव्य० उ-डुम् । रोषे, स्वीकारे, प्रश्ने च ।

उमा स्त्री० ओः शिवस्य मा लक्ष्मीः । दुर्गायाम् 'उमेति मात्रा
तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगामे'तिनिरुक्तायां
पार्व्वत्याम् । उं शिवं माति पतित्वेन मन्यते मा+क ।
शिवपत्न्याम् । वे-मक् संप्रसारणम् । हरिद्रायाम्
अतसीवृक्षे (मसिना) कीर्त्तौ, कान्तौ, शान्तौ च ।

उमाकट पु० उमाया अतस्या हरिद्राया वा रजः कटच् ।
अतस्या हरिद्रायाश्च रजसि । [मेषादयोऽप्यत्र ।

उमाधव पु० उमाया धवः पतिः ६त० । महादेवे । उमाकान्तो-

उमासुत पु० ६त० । कार्त्तिकेये । उमापुत्रादयोऽप्यत्र ।

उम्भ पूर्त्तौ तुदा० पर० सक० सेट् । उम्भति औम्भीत् ।

उर गतौ (सौत्रः) पर० सक० सेट् । ओरति औरीत् ।

उरग पु० उरसा गच्छति उरस्+गम-ड सलोपश्च । सर्पे,
तद्देवताके अश्लेषानक्षत्रे च ।

उरगाशन पु० उरगानश्नाति उरग+अश-ल्यु उप० स० ।
गरुडे । ल्युट् । उरगाशनम् सीसके न० ।

उरण पु० ऋ० क्यु, धातोरुच्च । मेषे । [(दादमर्द्दन) वृक्षे ।

उरणाक्ष पु० उरणस्य मेषस्य अक्षीव अक्षि पुष्पं यस्य । दद्रुघ्ने

उरभ्र पु० उरु उत्कटं भ्रमति भ्रम-ड पृषो० उलोपः । मेषे ।

उररी अव्य० वे-ररीक् । अङ्गीकारे, विस्तारे च ।

उररीकृत त्रि० उररी+कृ-क्त । अङ्गीकृते, विस्तृते च ।

उरश्छद पु० उरश्छाद्यतेऽनेन छद-णिच्-घ ह्रस्वः । कवचे ।

उरस् न० ऋ-असुन् धातोरुच्च । वक्षःस्थले ।

उरसिज पु० उरसि जायते जन-ड स० सप्तम्या अलुक् ।

स्त्रीवक्षोजाते स्तने। [प्रशस्तवक्षोयुते।
उरसिल त्रि० प्रशस्तमुरोऽस्त्यस्य प्रागस्त्ये मत्वर्थीय इलच्।
उरस्कट पु० उरः कट्यते आव्रियतेऽनेन कट-घञर्थे क।
बालानामुत्तरीयभेदे तदीये यज्ञोपवीताकारे वस्त्रभेदे च।
(बुकवाछाड़)। [उरस्त्राणमप्यत्र न०।
उरस्त्र न० उरस्त्रायते त्रै-क। वक्षोरक्षके कवचे। ल्युट्।
उरस्य पु० उरसा निर्मितः उरस्+यत्। स्वजाते औरसे पुत्रे
उरस्वत् त्रि० प्रशस्तमुरोऽस्त्यस्य प्राशस्त्ये मतुप् मस्य वः।
प्रशस्तवक्षोयुते।
उरी अव्य० वेञ् रीक्। अङ्गीकारे, विस्तारे च।
उरीकार पु० उरी+कृ-घञ्। स्वीकारे, विस्तारे च।
उरीकृत त्रि०उरी+कृ-क्त। अङ्गीकृते, विस्तृते च। [वा ङीष्
उरु त्रि० ऊर्णु-कु नुलोपो ह्रस्वश्च। विशाले, महति च स्त्रियां
उरुक्रम पु० उरुर्महान् क्रमः पादविक्रमो वा यस्य। विष्णौ
उरुवूक पु० उरु-वै-ऊक आलोपश्च। एरण्डवृक्षे रक्तैरण्डे च
उरोज पु०उरस् जन-ड त०। स्त्रीस्तने। [(माकड़सा) मर्कटके
उर्णनाभ पु० उर्णेव सूत्रं नाभौ गर्भेऽस्य अच् समा० ह्रस्वः।
उर्णा स्त्री० ऊर्णूयते आच्छाद्यते ऊर्णु-ड ह्रस्वश्च। मेषादिलोम्नि
उर्द माने स्वादे च सक० क्रीड़ायाम् अक० भ्वा० आत्म० सेट्। उर्दते
उद्र पु० उर्द-रक्। जलविड़ाले (उद्बिराल)
उर्व हिंसायां भ्वा० पर० सक० सेट्। उर्वति और्वीत्।
उर्वरा स्त्री० उरु-ऋ-अच्। सर्वशस्ययुक्तायां भूमौ।
उर्व्वशी स्त्री० उरून् अश्नुते वशीकरोति उरु+अश-क गौरा०
ङीष्। स्वर्गवेश्यायाम्।
उर्व्वशीरमण पु० ६त०। चन्द्रवंश्ये बुधपुत्रे पुरूरवोनामके राज्ञि
उर्व्वारु पु० उरु-ऋ-उण्। कर्कट्याम्। स्वार्थे कन् अत्रैव।
उर्व्वी स्त्री० उरु+स्त्रियां गुणवचनत्वात् ङीष्। भूमौ।
उल दाने (सौत्रः) पर० सक० सेट्। ओलति औलीत्।
उलप पु० न० वल-कपच् संप्रसारणम्। शाखापत्रप्रचययुतायां
लतायाम्। कोमले तृणभेदे न० (उलुखड़)।
उलूक पु० वल-समवाये ऊक संप्रसारणम्। पेचके, इन्द्रे, दुर्यो
धनामातुलशकुनिपुत्रे च। तृणभेदे न०। (उलुखड़)
उलूखल न० ऊर्द्ध्वं खम् उलूखं पृषो० तत् लाति गृह्णाति
ला-क। धान्यादिकण्डनसाधने काष्ठमये पात्रे (उखरी)
गुग्गुलौ च। [शिशुके, (शोशक) मत्स्यभेदे च
उलूपिन् पु० ओः शम्भोरिव रूपमस्यास्ति इनि रस्य लत्वम्।
उलूलु पु०उरु उरु इति रस्य लत्वम्। हृद्धिसूचके माङ्गल्यादौ
स्त्रीध्वनिभेदे "उच्चैरुलूलुध्वनिरुच्चचार" इति नैषधम्।

उल्का स्त्री० उष-दाहे क नि० षस्य लः। रेखाकारे गगनात्
पतत्तेजःपुञ्जे। (भेदे (स्त्याकृ:याली)
उल्कामुखी स्त्री०उल्केव ज्वाला ज्वलत् मुखं यस्याः। शृगाली
उल्मुक न० उष-दाहे मुक, षस्य लः। अङ्गारे।
उल्लल त्रि० उद् लल-अच्। बहुरोमयुक्ते।
उल्ललित त्रि० उद् लल-क्त। तरलिते, आन्दोलिते च। [पु०
उल्लाघ त्रि०उद्+लाघ-क्त नि०। रोगनिर्मुक्ते, दक्षे, शुचौ, च। मरिचे
उल्लाप पु० उद्+लप-घञ्। काकुवाक्ये, शोकरोगादिना
ध्वनेर्विकारे च। [स्थानीये परिच्छेदे च
उल्लास पु० उद्+लस+घञ्। प्रकाशे, आह्लादे, ग्रन्थस्याध्याय
उल्लिखित त्रि० उद्+लिख-क्त। उत्कीर्णे तनूकृते उपरि
लिखिते, चित्रिते च।
उल्लेख पु०उद्+लिख-घञ्। उच्चारणे, अलङ्कारभेदे साहि०१०प
उल्लेखन न० उद्+लिख-ल्युट्। वमने, खनने, उच्चारणे च
उल्लोच पु० उद्+लोच-घञ्। चन्द्रातपे विताने।
उल्लोल पु० उद्+लोड़-घञ् डस्य लत्वम्। महातरङ्गे।
उल्व न० वल-वक् संप्रसारणञ्च। गर्भवेष्टनचर्म्मणि जरायौ।
उल्वण त्रि० उद्+वण-अच् पृषो० दस्य लः। व्यक्ते, स्पष्टे।
उ(व)शती स्त्री० उष-शतृ, वश-शतृ संप्रसारणम् वा।
स्त्रियां ङीप्। अकल्याणायां वाचि।
उशनस् पु० वश-कनसि। भार्गवे शुक्रे। सौ उशना संबुद्धौ
उशनन् उशन, उशनः।
उशीर पु० न० वश-ईरन् किच्च। (खस खस्) वीरणमूले।
उष वधे, दाहे च भ्वादि० पर० सक० सेट्। ओषति, औषीत्।
उष वधे दाहे च भ्वादि०पर०सक०वेट्। ओषति औषीत, औक्षत्
उष पु०उष-क दिने गुग्गुलौ, रात्रिशेषे, चारम्भिकायां च
कामनायुक्ते त्रि०। [च (चइ)।
उषण न० उष-क्युन्। मरिचे। पिप्पल्यां, शुण्ठ्यां चव्यिके
उषर्बुध पु० उषसि संध्यायां बुध्यते होमार्थं प्रज्वालने प्रकाशते
उषस्+बुध-क अहरादित्वात् रः। अग्नौ, रक्तचित्रके च।
उषस् न०उष-असि किच्च। प्रत्यूषे, पञ्चपञ्चाशद्घटिकोत्तरकाले
उषसी स्त्री०उषं तापकत्वात् दिवसं स्यति उष+षो-क गौरा०
ङीष्। सायं सन्ध्यायाम्।
उषा स्त्री०उष-क टाप्। "तेजःपरिहानिरुषा भानोरर्द्धोदयं
यावदि"ति वराहोक्ते काले वाणराजसुतायाञ्च।
उषाकल पु० उषायां कलः शब्दोऽस्य। कुक्कुटे।
उषापति पु० उषाया वाणराजसुतायाः पतिः। अनिरुद्धे
कन्दर्पात्मजे कृष्णपौत्रे। उषाकान्तादयोऽप्यत्र।

उषित त्रि॰ उष-क्त । पर्य्युषिते दग्धे च । वस-क्त । स्थिते ।

उष्ट्र पु॰ उष-ष्ट्रन् किच्च । खनामख्याते पशुभेदे, वाह्यरथे च ।

उष्ण पु॰ उष-नक् । ग्रीष्मे ऋतौ, आतपे, पलाण्डौ नरकभेदे, शीतभिन्ने स्पर्शे च । तद्वति, आलस्यरहिते दक्षे च त्रि॰।

उष्णक त्रि॰ उष्णमिव करोति कन् । अनलसे, क्षिप्रकारिणि च उष्णं करोति उष्ण+णिच् । ण्वुल् ज्वरे पु॰ ।

उष्णगु पु॰ उष्णा गावः किरणा अस्य । सूर्य्ये । उष्णरश्मिरप्यत्र

उष्णनदी स्त्री॰ कर्म्म॰ "यमद्वारे महाघोरे तप्ता वैतरणी नदी'त्युक्तायाम् उष्णनद्यां वैतरण्याम् ।

उष्णवारण न॰ उष्णं वारयति वृ-णिच्-ल्यु । आतपत्रे, छत्रे

उष्णवीर्य्य पु॰ उष्णमुग्रं वीर्य्यमस्य । शिशुमाराख्ये जलजन्तौ । उग्रवीर्य्यवति त्रि॰ ।

उष्णांशु पु॰ उष्णा अंशवो यस्य । सूर्य्ये ।

उष्णागम पु॰ उष्णस्यागमोऽस्मिन् । निदाघकाले ।

उष्णासह पु॰ उष्ण आसह्यतेऽत्र आ+सह-अच् । हेमन्ते ऋतौ । उष्णं न सहते अच् । असह्योष्णे त्रि॰ ।

उष्णिका स्त्री॰अल्पमन्नमस्याम् अल्पार्थे कन् नि॰.अन्नस्य उष्णादेशः । यवाग्वाम् (याउ) । उष्णकशब्दात् टाप् । दक्षायाम्

उष्णिह् स्त्री॰ उत्स्निह्यति क्विन् नि॰ षत्वम् । सप्ताक्षरपादके छन्दोभेदे । स्वादौ उष्णिक् उष्णिग्भ्याम् ।

उष्णीष पु॰ न॰ उष्णमीषते हिनस्ति ईष-क शक॰ पररूपम् । शिरोवेष्टनवस्त्रे, (पागडी) किरीटे च ।

उष्णोपगम पु॰ उष्णस्य उपगमोऽत्र । निदाघकाले ।

उष्म पु॰ उष-मक् । निदाघे, आतपे, ग्रीष्मे ऋतौ च ।

उष्मपा पु॰ उष्मं पिबन्ति पा-क्विप् । भृगोः पुत्रे पितृगणभेदे ।

उस्र पु॰ वसन्ति रसा अत्र वस-रक् । किरणे, सूर्य्यकिरणानां जलहेतुत्वात् रसवत्त्वम् । वृषे च । सुरभ्यां उपचित्रा लतायां च स्त्री॰ । [ऊवोह ऊहतुः

उह वधे भ्वादि॰पर॰सक॰सेट् । ओहति औहत्, औहीत्,

उह अव्य॰ उ च ह च द्व॰ । संबोधने, एवार्थे च ।

उहह अव्य॰ उह च ह च । सम्बोधने । [कर्म्मणि च ।

उह्यमान त्रि॰ वह-कर्म्मणि शानच् । आकृष्यमाणे, वहन-

ऊ

ऊ अव्य॰ वेञ् क्विप् । संबोधने, वाक्यारम्भे, दयायां, रक्षायाञ्च

ऊ पु॰अवतीति अव-क्विप् ऊठ् । महादेवे चन्द्रे च । पालके त्रि॰

ऊत त्रि॰ ऊय-तन्तुसन्ताने क्त । स्यूते, सूत्रेण ग्रथिते च ।

ऊति स्त्री॰ ऊय-क्तिन् । स्यूतौ । अव-क्तिन् नि॰ । रक्षणे, लीलायां, क्षरणे च । [क्षीराधारे आपीने (मेड़)

ऊधस् न॰ उन्द-असुन् निपा॰ उतोदीर्घः । स्त्रीगव्यादेः

ऊधस्य न॰ ऊधसि भवम् ऊधस्+यत् । दुग्धे ।

ऊन परिहाणे अदन्तचुरा॰ उभ॰ अक॰ सेट् । ऊनयति ते औनिनत् त औनयीत् औनयिष्ट ।

ऊन त्रि॰ ऊन-हानौ अच् । हीने, असंपूर्णे च ।

ऊम् अव्य॰ ऊय-मुक् । रोषोक्तौ, प्रश्ने, निन्दायां, स्पर्द्धायाञ्च

ऊय तन्तुसन्ताने भ्वा॰ आत्म॰सक॰सेट् । ऊयते औयिष्ट ।

ऊररी अव्य॰ ऊय-ररीक् । अङ्गीकारे, विस्तारे च ।

ऊरव्य पु॰ ऊरु+भवार्थे यत् । वैश्ये । तस्य ब्रह्मण ऊरुतो जन्म 'ऊरू वैश्य' इति श्रुतेः प्रसिद्धम् । ऊरुसम्भवे त्रि॰।

ऊरी अव्य॰ ऊय-रीक् । अङ्गीकारे, विस्तारे च ।

ऊरु पु॰ ऊर्णूयते आच्छाद्यते ऊर्णु-कर्म्मणि कु नुलोपश्च । जानूपरिभागे ।

ऊरुज पु॰ ऊरोर्ब्रह्मण ऊरोर्जायते जन-ड । वैश्ये ।

ऊरुपर्व्वन् पु॰ ऊरोः पर्वेव । जानुनि (हांटु)

ऊरुस्तम्भ पु॰ ऊरुं स्तभ्नाति अण् । स्वनामख्याते रोगे ।

ऊरुस्तम्भा स्त्री॰ऊरोरुपमानभूतः स्तम्भो यस्याः । कदलीवृक्षे ।

ऊर्ज्ज जीवने बले च चु॰ उभ॰ अक॰ सेट् । ऊर्ज्जयति, ते और्ज्जिजत् त ।

ऊर्ज्ज पु॰ऊर्ज्ज-आधारे वञ् । कार्त्तिके मासि । भावे घञ् । बले, उत्साहे च । असुनि सान्तोऽप्ययमत्रार्थे ।

ऊर्ज्जस्वल त्रि॰ ऊर्ज्जस्+अस्त्यर्थे वलच् । बलवति । विनि । ऊर्ज्जस्वीत्यप्यत्र ।

ऊर्ज्जित त्रि॰ ऊर्ज्ज-क्त । बलातिशययुक्ते, वृद्धियुक्ते च ।

ऊर्णनाभ पु॰ ऊर्णेव तन्तुर्नाभावस्य अच् समा॰ ह्रस्वः । मर्कटे (माकडसा) अजभावे ऊर्णनाभिरप्यत्र भ्रुवोर्मध्यस्थे महापुरुषचिह्ने आवर्त्ताकारे लोमसङ्घये च ।

ऊर्णा स्त्री॰ ऊर्णु-करणे ड । मेषलोमनि ।

ऊर्णायु पु॰ ऊर्णाः सन्त्यस्य युच् । मेषे, कम्बले, ऊर्णनाभे, क्षणभङ्गुरे च ।

ऊर्णु आच्छादने अदा॰ उभ॰ सक॰ सेट् । ऊर्णौति, ऊर्णुते, और्णावीत् और्णुवीत् और्णवीत् और्णविष्ट और्णुविष्ट ।

ऊर्द्ध त्रि॰ उद् हाङ्-ड पृषो॰ ऊरादेशः । उच्चे उपरि च

ऊर्द्धक पु॰ ऊर्द्धः सन् कायति शब्दायते । मृदङ्गभेदे स च गोपुच्छवदाकारस्त्रितालपरिमितः मुखेऽष्टाङ्गुलः ऊर्द्धं कृत्वा वाद्यते । [तुङ्गे उपरि च

ऊर्द्ध त्रि॰ उत् उपरि ध्वन्यते ध्वन-ड आदेरूरादेशः । उच्चे

ऊर्द्ध्वकण्ठी स्त्री० ऊर्द्ध्वः कण्ठः मुखमस्याः ब० गौरा० ङीष्। महाशतावरीलतायाम् ।

ऊर्द्ध्वजानु त्रि० ऊर्द्ध्वे जानुनी यस्य। उपरिभागे स्थूलजानुयुक्ते

ऊर्द्ध्वज्ञु त्रि० ऊर्द्ध्वे जानुनी यस्य जानुनो वा ज्ञु । उपरिभागे स्थूलजानुयुक्ते ।

ऊर्द्ध्वपाद पु० ऊर्द्ध्वाः पृष्ठस्थाः चत्वारः पादा अस्य । शरभाख्ये [गजारातौ पशुभेदे

ऊर्द्ध्वपुण्ड्र पु० ऊर्द्ध्व ऊर्द्ध्वमुखः पुण्ड्रः इक्षुयष्टिरिव । ललाटस्थे ऊर्द्ध्वमुखे पुण्ड्रेक्षुवत् रेखात्रयात्मके तिलकभेदे । तद्धारणे विधिनिषेधादिकं ह्रहदभिधाने वक्ष्यते ।

ऊर्द्ध्वम् अव्य० उद्-ह्वेञ् डम् आदेरूरादेशश्च । ऊर्द्ध्वशब्दार्थे ।

ऊर्द्ध्वमान न० ऊर्द्ध्वमारोप्य मीयते येन मा-ल्युट् । पलकर्षादिमिते पाषाणादौ (बाटखारा) । तेन हि तुलादावारोपितेन स्वर्णादेर्गुरुत्वमनुमीयते । उच्चतापरिच्छेदकपरिमाणे च ।

ऊर्द्ध्वरेतस् पु० ऊर्द्ध्वं न पतत् रेतो यस्य । महादेवे, सनकादौ सन्न्यासिनि, भीष्मे च ।

ऊर्द्ध्वलिङ्ग पु० ऊर्द्ध्वमुत्कृष्टं लिङ्गं चिह्नमस्य । महादेवे ऊर्द्ध्वलिङ्गं विरूपाक्षमिति सन्ध्याङ्गमन्त्रः ।

ऊर्द्ध्वलोक पु० कर्म्म० । स्वर्गे ।

ऊर्द्ध्वासित पु० ऊर्द्ध्वमुपरिभागे असितः कृष्णः आसितो वा । कारवेल्ले (करला) ऊर्द्ध्वोपविष्टे त्रि० ।

ऊर्म्मि पु० स्त्री० ऋ-मि-अर्त्तेरुच्च । तरङ्गे, प्रकाशे, वेगे, वस्त्रसङ्कोचरेखायाम्, पीड़ायाम्, उत्कण्ठायाम्, बुभुक्षादिषु, षट्सु च 'यथा बुभुक्षा च पिपासा च प्राणस्य, मनसः स्मृतौ । शोकमोहौ, शरीरस्य जरामृत्यू षडूर्म्मय' इति । "पङ्क्तीकृतानामश्वानां गमनोद्गमनाकृतिः । अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृते'त्युक्तलक्षणायामश्वगतौ स्त्री० ।

ऊर्म्मिका स्त्री० ऊर्म्मिरिव कायति कै-क । तरङ्गवत्प्रकाशमाने अङ्गुरीयके । स्वार्थे कन् । तरङ्गादौ च ।

ऊर्म्मिमत् त्रि० ऊर्म्मिरिव वक्रतास्त्यस्य मतुप् यवा० मस्य न वः । वक्रे तरङ्गवति च ।

ऊर्म्मिमालिन् पु० ऊर्म्मिमालाऽस्त्यस्य इनि । समुद्रे ।

ऊष पु० ऊष-रुजायां क । क्षारमृदि, प्रभाते, रन्ध्रे चन्दनादौ च

ऊषण न० ऊष-ल्युट । मरिचे, पिप्पलीमूले, शुण्ठ्याञ्च । (चिता) चित्रके पु० । पिप्पल्यां चव्ये च (चइ) स्त्री० ।

ऊषर त्रि० ऊष+मत्वर्थीयो रः । ऊषवति क्षारमृत्तिकायुक्ते देशे यस्मिन्नुप्तं बीजं न प्ररोहति ।

ऊषरज न० ऊषराज्जायते जन-ड । (पाङ्गा) लवणभेदे ।

ऊषवत् त्रि० ऊष-मतुप् मस्य वः । ऊषरभूमौ ।

ऊष्मन् पु० ऊष-मनिन् । घोष्मे व्याकरणोक्तेषु सोष्मवायुनोच्चार्य्यमाणेषु शषसहरूपेषु वर्णेषु ।

ऊह वितर्के भ्वादि० आत्म० सक० सेट् । ऊहते औहिष्ट ।

ऊह पु० ऊह-घञ् वितर्के आगमाविरोधिना तर्केण आगमार्थस्य संशयपूर्व्वपक्षनिवारणेन, उत्तरपक्षव्यवस्थापनेन निर्णयरूपे परीक्षणे, अनन्वितार्थकविभक्तिलिङ्गत्यागपूर्व्वके अन्वययोग्यविभक्त्यादिकल्पने, यथा पार्व्वणे सौम्यास इति बहुवचनमन्वितमपि एकोद्दिष्टे अनन्वितत्वात् सौम्य इत्येकवचनान्ततया कल्पनम् पदान्तरेणाकाङ्क्षापूरणे च । [च ।

ऊहा स्त्री० ऊह अ स्त्रीत्वात् टाप् । अध्याहारे ऊहशब्दार्थे

ऋ

ऋ गतौ भ्वा० पर० सक० अनिट् । ऋच्छति । आरत् आर्षीत् ।

ऋ गतौ जुहोत्यादि० पर० सक० अनिट् । इयर्त्ति आरत् ।

ऋ हिंसायां स्वा० पर० सक० अनिट् । ऋणोति । आर्षीत ।

ऋक्थ न० ऋच-थक् । धने स्वर्णे, स्मृतिप्रसिद्धे दायरूपे धने च

ऋक्ष पु० ऋष-स कित् । भल्लूके । नक्षत्रे मेषादौ च पु० न० ।

ऋक्षगन्धा स्त्री० ऋक्षान् गन्धयति हिनस्ति गन्ध-अच् । ऋषिजाङ्गलीवृक्षे, महाश्वेतायां, क्षीरविदार्य्याञ्च ।

ऋक्षगिरि पु० कर्म्म० । कुलाचलभेदे ऋक्षनामके पर्व्वते ।

ऋक्षराज पु० ऋक्षाणां राजा न० टच् । जाम्बवति, चन्द्रे च

ऋक्षवत् पु० ऋक्षाः सन्त्यस्मिन् मतुप् मस्य वः । नर्म्मदातीरस्थे पर्व्वतभेदे ।

ऋग्वेद पु० ऋक्प्रधानो वेदः । देवदैवत्ये स्वनामख्याते वेदभेदे

ऋच स्तुतौ तुदा० पर० सक० सेट् । ऋचति आर्चीत् ।

ऋच् स्त्री० ऋच्-क्विप् । अर्थवशेन नियताक्षरपादयुते वेदांशे ।

ऋच्छ मोहे मूर्त्तौ गमने च तुदा० पर० सक० अक० च । सेट् । ऋच्छति आर्च्छीत् । आनर्च्छ । [आनर्च्छे

ऋज गतौ अर्जने च भ्वा० आत्म० सक० सेट् । अर्जते आर्जिष्ट

ऋजीष न० ऋज-ईषन् कित्त्व । भर्ज्जनपात्रे कटाहादौ । धने, नरकभेदे च ।

ऋजु त्रि० ऋज-कु । सरले । स्त्रियां वा ङीष् ऋज्वी ऋजुः ।

ऋण गतौ तना० उभ० सक० सेट् । अर्णोति ऋणोति, ऋणुते आर्णीत् आर्णिष्ट ।

ऋण न० ऋ-क्त नि० नत्वम् । अधमर्णेन उत्तमर्णात् पुनर्देयत्वेनाभ्युपगम्य गृहीते धने, (धार) जले, दुर्गे, दुर्गभूमौ च । देवर्षिपितृगणोद्देशेन यथाक्रमं यज्ञवेदाध्ययनपुत्रोत्पादनरूपे ऽवश्यकार्य्यकृत्ये ऋणमन्त्यमवेहीति रघुः ।

ऋणमत्कुण पु॰ इदम् ऋणं मम देयमिति कुणति अभ्युपगम्य शब्दायते ऋण+अस्मद् कुण-क। न्यस्ते प्रतिभुवि (जामिन)

ऋणमार्गण ऋणं परकीयमृणमात्मीयत्वेन मार्गयति चुरा॰ मृग-ल्युट्। प्रतिभुवि। (जामिन)।

ऋणमुक्ति स्त्री॰ मुच-क्तिन् ६त॰। ऋणशोधने।

ऋणादान न॰ ऋणस्यादानम्। उत्तमर्णेनाधमर्णात् दत्तधनतुल्यधनस्य सवृद्धिकग्रहणे अष्टादशव्यवहारमध्ये व्यवहारभेदे। "तेषामाद्यमृणादान"मित्यादि स्मृतिः।

ऋणिन् पु॰ त्रि॰ ऋण+मत्वर्थीय इनि। ऋणवति अधमर्णे ऋणयुक्ते 'ऋणी न स्याद् यथा पिते'ति स्मृतिः। [च.र्त्तिष्ट

ऋत गतौ (सौत्र:) पर॰ सक॰ सेट्। ऋतीयते आर्त्तीयिष्ट

ऋत न॰ ऋ-क्त। 'ऋतमुञ्छशिलं ज्ञेय'मित्युक्तेः ब्राह्मणस्य उपजीव्यवृत्तौ मोक्षे, जले, कर्म्मफले "ऋतं पिबन्ता"विति श्रुतिः सुप्रिये वाक्ये मानसादिसत्ये च। दीप्ते, सत्ये, पूजिते च त्रि॰।

ऋतधामन् पु॰ ऋतं सत्यं धाम यस्य। परमेश्वरे, विष्णौ च।

ऋतम् अव्य॰ ऋत-कमि। सत्यमित्यर्थे।

ऋतम्भरा स्त्री॰ ऋतम् बिभर्त्ति ऋतम्+भृ-अच्। योगशास्त्रप्रसिद्धे विपर्य्यासशून्ये यथार्थज्ञानरूपे चित्तवृत्तिभेदे।

ऋति स्त्री॰ ऋ-क्तिन्। गतौ स्पर्द्धायाम् निन्दायाञ्च। कर्म्मणि क्तिन्। वर्त्मनि मङ्गले च।

ऋतु पु॰ ऋ-तु किच्च। 'शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः। माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादिमे' इत्युक्ते कालभेदे। शोणितदर्शनयुक्ते गर्भधारणयोग्ये स्त्रीणामवस्थाभेदे "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः" इति मनुः। दीप्तौ मासे च। [अवन्ध्यवृक्षे।

ऋतुप्राप्त त्रि॰ ऋतुस्तद्योग्यः पुष्पादिः प्राप्तोऽनेन, फलेग्रहौ

ऋतुमती स्त्री॰ ऋतु+मतुप्। रजस्वलायां स्त्रीधर्म्मिण्याम्।

ऋतुराज पु॰ ऋतूनां राजा ६त॰ टच् समा॰। वसन्ते ऋतौ।

ऋतुवृत्ति पु॰ ऋतूनां वृत्तिः पर्य्यायेणावर्त्तना यत्र। वत्सरे।

ऋते अव्य॰ ऋत (सौत्रः) के। वर्ज्जने विनार्थे च।

ऋत्विज् ऋतु+यज्-क्विन्। याजके, 'अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते' इति मनूक्ते स्वानुष्ठेयवैदिकादिकर्म्मकरे।

ऋद्ध न॰ ऋध-क्त। पक्वमर्द्दितधान्ये सिद्धान्ते च। समृद्धे सम्पन्ने च त्रि॰।

ऋद्धि स्त्री॰ ऋध-क्तिन्। वृद्धौ, देवभेदे, ओषधिभेदे च।

ऋध वृद्धौ दिवा॰ स्वा॰ च पर॰ अक॰ सेट्। ऋध्यति ऋध्नोति आर्द्धीत् आर्द्धत्। [तुदा॰पर॰सेट्। ऋफति आर्फीत्।

ऋफ दाने हिंसायां निन्दायां युद्धे च सक॰ श्लाघायां अक॰

ऋभु पु॰ अरि स्वर्गे अदितौ वा भवति ऋ+भू-डु। देवे।

ऋभुक्ष पु॰ ऋभवो देवाः क्षियन्ति वसन्त्यत्र क्षि+ड। स्वर्गे वज्रे इन्द्रे च। [स्वादौ ऋभुक्षाः ऋभुक्षाणौ।

ऋभुक्षिन् पु॰ ऋभुक्षः वज्रं स्वर्गो वाऽस्यास्ति इनि। इन्द्रे

ऋष गतौ तुदा॰पर॰सक॰ सेट्। ऋषति आर्षीत्।

ऋषभ पु॰ ऋष-अभक्। वृषभे, ओषधिभेदे, मुनिभेदे च।

ऋषभतर पु॰ तनुः ऋषभः तनुत्वे ष्टरच्। भारवहने मन्दशक्तौ वृषभे। जातित्वेन स्त्रियां ङीप् वृषभतरी।

ऋषभध्वज पु॰ ऋषभो ध्वजो यस्य। शिवे। वृषभध्वजोऽप्यत्र

ऋषभा स्त्री॰ ऋषभ इवाचरति ऋषभ+क्विप्-अच्। पुमाकारायां स्त्रियां, शूकशिम्ब्याम्, शिरालतायाञ्च।

ऋषि पु॰ ऋष-इन् किच्च। वेदे, मन्त्रद्रष्टरि मुनौ, अनुष्ठेयकर्म्मज्ञापकसूत्रकृदाचार्य्ये, गोत्रप्रवरप्रवर्त्तके मुनौ च।

ऋषियज्ञ पु॰ ऋष्युद्देश्यको यज्ञः। ब्रह्मयज्ञे वेदाध्ययने।

ऋष्टि स्त्री॰ ऋष-करणे क्तिन्। उभयतो धारायुक्ते खड्गे।

ऋष्य पु॰ ऋष, क्यप्। मृगभेदे। [वृक्षे

ऋष्यगन्धा स्त्री॰ ऋष्यस्य गन्ध इव गन्धो यस्याः। वृद्धदारके

ऋष्यप्रोक्ता स्त्री॰ ऋषिभिरप्रोक्ता। शतावर्य्याम्, अतिबलायाम्, शूकशिम्बीवृक्षे च।

ऋष्यमूक पु॰ ऋष्यो मृगो मूको यत्र। 'ऋष्यमूकस्तु पम्पायाः पुरतः पुष्पितद्रुम इति रामायणोक्ते पर्वतभेदे।

ऋष्यशृङ्ग पु॰ ऋष्यस्य मृगभेदस्य शृङ्गमिव शृङ्गमस्य। विभाण्डकपुत्रे लोमपादराजकन्यायाः शान्तायाः पत्यौ।

ॠ

ॠ गतौ जुहो॰पर॰सक॰सेट्। आर्त्ति आरीत्। आर आरतुः।

ए

ए अव्य॰ इण्-विच्। दयायां, स्मृतौ आमन्त्रणे, असूयायां, आह्वाने च। विष्णौ पु॰।

एक त्रि॰ इण्-कन्। एकत्वरूपप्रथमसंख्यान्विते, केवले, मुख्ये, अन्यार्थे, सत्ये, अद्वितीये, समाने, अल्पे च।

एकक त्रि॰ एक+कन्। असहाये। [परस्परस्मारके छात्रे च।

एककार्य्य त्रि॰ एकं कार्य्यं प्रयोजनमस्य। एकरूपकार्य्यकरे,

एकगुरु पु॰ एकोऽभिन्नो गुरुर्यस्य। समानाध्यापके सतीर्थ्ये।

एकचक्र न॰ एकं चक्रं यत्र। हरिग्दृहे। सूर्य्यरथे पु॰।

पुरोभेदे स्त्री०यत्र वकासुरवधार्थं पाण्डवाः स्थिताः [सर्पादौ

एकचर त्रि० एकः सन् चरति पचाद्यच् । एकाकिचारिणि

एकचर्य्या स्त्री०एकस्य चर्य्या चर,क्यप् । असहायगमने ।

एकजाति पु० एका जातिर्जननं यस्य । शूद्रे । एकजन्माप्यत्र

एकजातीय त्रि० एकः प्रकारो विधा यस्य प्रकारार्थे जातीयर् । तुल्यप्रकारा ।

एकतम त्रि० एक+डतमच् । बहूनां मध्ये जात्यादिभिर्निर्द्धार्य्ये एकस्मिन् । यथा भवतामेकतमः साधुः ।

एकतर त्रि० एक+डतरच् । द्वयोर्मध्ये जात्यादिभिर्निर्द्धार्य्ये एकस्मिन् । यथा, भवतोरेकतरः साधुः ।

एकतान त्रि० एकं तानयति चु० तन-श्रद्धायाम् अण् । अनन्यचित्तवृत्तौ एकविषयासक्तचित्ते तद्गतचित्ते च ।

एकताल पु० एकः समस्तालोमानं यत्र । समन्वितलये, विच्छेदरहिते च नृत्यगीतादौ ।

एकत्र अ० एक+त्रल् । एकस्मिन्नित्यर्थे । [व्यावर्त्तके च ।

एकत्व न०एक-त्व । ऐक्ये, अभेदे,साम्ये, सायुज्यमुक्तौ, भेद-

एकदण्डिन् पु० एकः केवलः शिखायज्ञोपवीतादिशून्यो दण्डोऽस्यास्ति । "यदा हृदाध्यवसितं परंब्रह्म सनातनम् । तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेदित्युक्तलक्षणे परिव्राजके ।

एकदन्त पु० एको दन्तोऽस्य । गणेशे । एकदंष्ट्रोऽप्यत्र ।

एकदा अव्य० एक+काले दाच् । एकस्मिन् काले इत्यर्थे ।

एकदृक् त्रि० एका दृक् यस्य । एकनेत्रे काणे । काके पु० । एकं सर्व्वमभिन्नं पश्यति दृश-क्विप् । शिवे ।

एकदेश पु० कर्म्म० । अवयवे, प्रतीके ।

एकधा अव्य० एक+प्रकारे धाच् । एकप्रकारे "एकधा बहुधा चैव दृश्यते जलचन्द्रवदि"ति श्रुतिः ।

एकधुरा स्त्री० एका धूः कर्म्म० अच् । एकभारे । तद्वहतीत्यर्थेऽण् तस्य लुक् । एकभारवाहके गवादौ । [वाहके गवादौ ।

एकधुरावह त्रि० एकधुरां वहतीति वह-अच् । एकभार-

एकधुरीण त्रि०एकधुरां वहतीति ख । एकभारवाहके गवादौ

एकपक्ष त्रि० एकः पक्षो यस्य । सहाये ।

एकपत्नी स्त्री० एकः समानः अनन्योवा पतिर्यस्याः ङीप् नुक् च । सपत्न्यां पतिव्रतायाञ्च । योधर्म्मएकपत्नीनामिति मनुः

एकपद न० एकं पदं पदगतियोग्यकालो यत्र । एकपदगतियोग्यकाले तत्काले । कर्म्म० । एकस्मिन् पदे । निहन्ति स एकपदे इति माघः । [वर्त्मनि पथि ।

एकपदी स्त्री० एकः पादोऽस्याम् । स्वाङ्गत्वात् ङीप् पद्भावः ।

एकपदे अव्य० एक+पद-के । अकस्मादित्यर्थे 'कथमेकपदे निरागसमिति कुमारः ।

एकपिङ्ग पु०एकं नेत्रं पिङ्गमस्य । कुवेरे स हि साहूयं गौरीं निरीक्ष्य तच्छापात् नष्टनेत्रो जातः पुनः शिवप्रसादात् तच्चक्षुषः पिङ्गलत्वं जातमिति पुराणकथा । एकपिङ्गलोऽप्यत्र

एकभक्तव्रत पु न० 'दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तं रात्रौ तन्न कदाचने"त्युक्ते व्रतभेदे ।

एकयष्टिका स्त्री० एका यष्टिरिवावली यस्याः ब० कप् । (एकनर) एकावलीहारभेदे ।

एकराज् पु० एको राजते क्विप् । सार्व्वभौमे ।

एकवचन न० वच-ल्युट् ६त० । व्याकरणोक्ते एकसंख्यावाचके स्वादौ तिङादौ च । [गवि ।

एकवर्षिका स्त्री० एको वर्षो वयःकालो यस्याः । एकहायन्यां

एकविंशति स्त्री० एकाधिका विंशतिः । एकाधिकविंशतिसंख्यायां तद्वति च । एकत्रिंशदादयस्त्वेवम् । [भेदे च ।

एकवीर पु० एको वीरः कर्म्म० । महावीरे अतिवीरे वृक्ष-

एकशफ पु०एकः शफोऽस्य । एकखुरयुक्तेषु खरादिषु "खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा । एते चैकशफा" इत्युक्तेषु पशुषु ।

एकशेष पु० एकः शेषो यत्र । व्याकरणप्रसिद्धे द्वन्द्वस्थानीये वृत्तिभेदे । यथा घटः घटौ इत्यत्र घटौ ।

एकश्रुति स्त्री०एका अभिन्ना उदात्तादिशून्या श्रुतिरुच्चारणम् । प्रातिशाख्ये प्रसिद्धे उदात्तानुदात्तस्वरितानामविभागेनोच्चारणे ।

एकसर्ग त्रि० एकस्मिन् सर्गो निश्चयो यस्य । अनन्यमनसि एकाग्रचित्ते । [वर्षवयस्कायां गवि ।

एकहायनी स्त्री० एकोहायनो वयोमानं यस्या ङीप् । एक-

एकाकिन् त्रि० एक+आकिन् । असहाये ।

एकाक्ष पु० एकमक्षि यस्य षच् समा० । काके । काणे त्रि० ।

एकाग्र त्रि० एकमग्रं विषयो यस्य । विषयान्तरव्यावृत्त्या एकमात्रमनस्के विक्षेपरहितज्ञाने च । स्वार्थे ष्यञ् ऐकाग्र्यमप्यत्र

एकादश त्रि० एकादशन्+पूरणे डट् । एकादशानां पूरणीभूते । [संख्यायुक्ते ।

एकादशन् त्रि० एकश्च दश च आत्वम् । एकाधिकदश-

एकादशद्वार न० एकादश द्वाराणि यत्र । शरीराख्ये पुरे तत्र हि नासिकाश्रोत्रनेत्राणां द्वयं द्वयमिति षट् मुखस्थानि, मुखमेकम्, नाभ्या सह अधःस्थानि त्रीणि, ब्रह्मरन्ध्रञ्चैकमित्यमेकादश द्वाराणि सन्ति ।

एकादशी स्त्री० एकादशानां पूरणी । उभयपक्षीयप्रतिपदा

ऐकात्म्य न० एक आत्मा स्वरूपं यस्य तस्य भावः ष्यञ्। ऐक्ये एकस्वरूपत्वे।

ऐकान्तिक त्रि० एकान्तं व्याप्नोति ठञ्। अव्यभिचारिणि, अवश्यं भाविनि। स्त्रियां ङीप्। 'ऐकान्तिको हरेर्भक्तिरत्यातायैव कल्पते इति पुराणम्।

ऐकाह्निक त्रि० एकाहे भवः कालात् ठञ्। एकदिननिष्पन्ने। एकाहमतीत्य भवः। एकाहानन्तरं जायमाने ज्वरे दिने दिने एकसमये जायमाने ज्वरे च पु०। ऐकाह्निकं ज्वरं हन्ति तस्य नामानुकीर्त्तनमिति ज्वरनाशकमन्त्रः।

ऐक्य न० एकस्य भावः एक+ष्यञ्। अभेदे एकरूपतायाम्।

ऐक्षव त्रि० इक्षोर्विकारः इक्षु-अण्। इक्षुविकारे गुड़ादौ। "ऐक्षवं गुडवर्ज्जित"मिति स्मृतिः।

ऐक्ष्वाक पु० इक्ष्वाकोर्गोत्रापत्यम् अण् नि०। सूर्य्यवंश्ये नृपे

ऐङ्गुद न० इङ्गुद्याः फलम् फले अण् तस्य न लुक्। इङ्गुदीवृक्षफले।

ऐण त्रि० एणस्य कृष्णमृगस्येदम् अण्। कृष्णमृगचर्म्मादौ।

ऐणेय त्रि० एण्या इदम् ढक्। कृष्णमृगीचर्म्मादौ।

ऐतिह्य न० इतिह पारम्पर्य्योपदेशः अनिर्द्दिष्टप्रवक्तृकोपदेश इति यावत् स्वार्थे ष्यञ्। पारम्पर्य्योपदेशे। यथात्र वटे यक्षः प्रतिवसतीत्यादि परम्परापदेशमात्रम्। न तु केनाप्येतदुपलभ्य कथितम्।

ऐन्दव न० इन्दुर्देवताऽस्य। मृगशिरोनक्षत्रे चन्द्रसम्बन्धिनि त्रि०। सोमराज्याम् स्त्री० ङीप्।

ऐन्द्र त्रि० इन्द्रस्येदम् इन्द्र+अण्। शक्रसम्बन्धिनि। ज्येष्ठानक्षत्रे न०। स्त्रियां ङीप्। 'ऐन्द्री तमसुरेश्वर'मिति दुर्गादेवतार्थेऽण्। इन्द्रदेवताके त्रि०। प्राच्यां दिशि स्त्री०।

ऐन्द्रजालिक त्रि० इन्द्रजालेन चरति। मायाकारके। (वाजिकर)

ऐन्द्रि पु० इन्द्रस्यापत्यम् इञ्। इन्द्रपुत्रे, जयन्ते, अर्ज्जुने, सुग्रीववानरे, काके च। [प्रकाश्ये।

ऐन्द्रियक त्रि० इन्द्रियेण प्रकाश्यः वुञ्। इन्द्रियजन्यप्रत्यक्षेण

ऐर न० इरा अन्नं तद्विकारः। अन्नमये ब्रह्मलोकस्थे सरसि च।

ऐरावण पु० इरा सुरा वनसुदकं यत्र पूर्व्वपदादिति णत्वम् तत्र भवः अण्। इन्द्रगजे ऐरावते।

ऐरावत पु० इरा जलानि सन्त्यस्य इरा+मतुप् मस्य व इरावान् समुद्रस्तत्र भवः अण्। समुद्रजाते इन्द्रगजे।

ऐरावती स्त्री० इराः सन्त्यस्य मतुप् मस्य वः इरावान् तत्र समुद्रः भवा अण्। विद्युति।

ऐरिण न० इरिणे ऊषरे भवः। लवणभेदे। (पाङ्गा)।

ऐरेय न० इरा अन्नम् तत्र भवः ढक्। अन्नभवे मद्ये।

ऐल पु० इलायाः अपत्यम्। बुधपुत्रे पुरूरवोनामके नृपतौ।

ऐलविल पु० इलविलाया अपत्यम् अण्। कुबेरे।

ऐशानी स्त्री० ईशानो देवताऽस्याः। उत्तरपूर्व्वदिशि।

ऐश्वर्य्य न० ईश्वरस्य भावः। अणिमाद्यष्टविधविभूतिभेदे।

ऐषमस् अव्य० अस्मिन् वत्सरे नि०। वर्त्तमानवत्सरे। [जाते

ऐहलौकिक त्रि० इह लोके भवः ठञ् द्विपदवृद्धिः। इहलोक

ऐहिक त्रि० इह भवः कालाट्ठञ्। इहलोकभवे गृहीतशरीरसम्बन्धिनि स्रक्चन्दनादिसुखानुभवादौ च।

ओ

ओक पु० उच-क नि० चस्य कः। पक्षिणि वृषले च।

ओकस् न० उच-असुन् न्यङ्क्वादित्वात् कुत्वम्। गृहे आश्रयमात्रे च। [(उकुण) केशकीटे।

ओकोदनी स्त्री० ओक आश्रयः मूर्द्धरूपम् अदनं भक्ष्यं यस्याः।

ओखृ शोषणे, भूषणे, निवारणे च सक० सामर्थ्ये अक० भ्वा० पर० सेट्। ओखति औखीत्। [इतन्त्वे च।

ओघ पु० उच-घञ् पृषो० घ। समूहे, जलवेगे, परम्परायां

ओङ्कार पु० अव-मन् तस्याकारलोपः, ऊठ् गुणः ओम् ततः स्वरूपे कार। प्रणवे। [औजिजत्-त

ओज बले अद० चुरा० उभ० अक० सेट्। ओजय-ति-ते

ओजस् न० उब्ज-असुन् बलोपे गुणः। दीप्तौ अवष्टम्भे, प्राणबले, प्रकाशे, सामर्थ्ये, ज्योतिषोक्ते प्रथमतृतीयादौ विषमराशौ, शस्त्रादिकौशले, धातुतेजसि, ज्ञानेन्द्रियाणां पाटवे, काव्यगुणभेदे, गौडरीत्याम्, वैद्यकोक्ते 'भ्रमरैः फलपुष्पेभ्यो यथा सम्ब्रियते मधु। तद्वदोजः शरीरेभ्यो धातुः सम्ब्रियते नृणाम्" इति लक्षणे धातुरसपोषके वस्तुभेदे च। अच्। ओजशब्दोऽप्यत्र।

ओजिष्ठ त्रि० अतिशयेनोजस्वी ओजस्विम् इष्ठन् मतो र्लुक्। अतितेजस्विनि सारतमे च। [(उड़िधान) नीवारे।

ओडिका स्त्री० उ-ड तस्य नेत्त्वम् गौरा० ङीष् स्वार्थे क ह्रस्वः।

ओडी स्त्री० उ-ड तस्य नेत्त्वम् गौरा० ङीप्। (उड़ीधान) नीवारे

ओड्र पु० न० आ+ईषत् उनत्ति उन्द-रक् दस्य डः। जयापुष्पे

ओड्रपुष्प पु० ओड्रं पुष्पमस्य। जवावृक्षे।

ओण अपसारणे भ्वा० पर० सक० सेट्। ओणति औणीत्।

ओत त्रि० आ+वेञ्+क्त। अन्तर्व्याप्तौ 'ओतश्च प्रोतश्चेति' श्रुतिः। पटे दीर्घतन्तौ च।

दितः एकादशपूरण्यां तिथौ । यत्र हि हरिवासरव्रतम्
एकाद्नविंशति स्त्री० एकेन न विंशति एक+नञ् आदुक् ।
एकोनविंशतिसंख्यायां तद्युक्ते च । एवमेकाद्नत्रिंशदादयः ।
एकान्त त्रि० एकः अन्तो निश्चयो यत्र । अत्यन्ते ।
एकान्ततस् अव्य० एकान्त+तसिल् । अव्यभिचारिणि ।
एकान्न त्रि० एककालमेवान्नं भक्ष्यं यत्र । एकभक्तव्रते ।
एकान्नविंशति स्त्री० एकेन न विंशतिः । एक+न+आदुक् दस्य वा न । एकोनविंशतिसंख्यायां, तद्युक्ते च । एवमेकान्नत्रिंशदादयः । [गवि ।
एकाब्दा स्त्री० एकः अब्दो वयोमानं यस्याः । एकहायन्यां
एकायन त्रि० एकमयनं विषयो यस्य । विषयान्तरव्यावृत्तचित्ते एकाग्रमनस्के । कर्म० एकस्थाने । [एकाग्रचित्ते ।
एकायनगत त्रि० एकायनमेकविषयं मनोद्वारा गतः ।
एकावली स्त्री० एकाऽद्वितीया आवली माला मणिश्रेणी । (एकनर) हारभेदे, अर्थालङ्कारभेदे च ।
एकाश्रय त्रि० एक आश्रयो यस्य । अनन्यगतिके ।
एकाष्ठील पु० एकमस्थि काण्डं तत्तुल्यं लाति ला-क मत्वं दीर्घश्च । वकवृक्षे पाठायां स्त्री० । [पुस्त्वम् । एकदिने ।
एकाह पु० एकमहः द्विगु० अच् । अह्नाहान्ताः पुंसीति
एकाहगम त्रि० एकाहेन गम्यते गम-घञ् । एकाहगम्ये देशे
एकाहार पु० एकस्मिन् दिवसे एक आहारो भोजनम् । एकदिनवृत्त्येकवारभोजने । ब० । तद्वति त्रि० । [एकत्वे
एकीभाव पु० अनेकस्य एकस्य भावः एक+च्वि-भू-उप० घञ् ।
एकीय त्रि० एक+छ । एकपक्षभवे, एकसम्बन्धिनि च ।
एकोद्दिष्ट न० एक उद्दिष्टो यत्र । एकोद्देशेन विहिते श्राद्धे "एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं तदुच्यते" इति स्मृतिः । तच्च प्रेतश्राद्धं तत्तुल्यविधिकं सांवत्सरिकं श्राद्धमिति ।
एज कम्पने भ्वादि० आत्म०अक० सेट् । एजते ऐजिष्ट ।
एज दीप्तौ भ्वादि० पर०सक० सेट् । एजति ऐजीत् ।
एठ बाधने भ्वादि०आत्म०सक० सेट् । एठते ऐठिष्ट ।
एड ०पु० इल-स्वप्ने अच् डस्य लः मेषे । बधिरे त्रि० ।
एडक पु० इल-ण्वुल् डस्य लः । वनच्छगले, पृथुशृङ्गे मेषे मेषमात्रे च जातित्वात् स्त्रीत्वे अजादित्वात् टाप् एडका ।
एडगज पु० एडो मेषो गजो भक्षकत्वादस्य । दद्रुघ्ने (दादमर्द्दन)
एडमूक त्रि० श्रुतिरहितएडोबधिरस्तासौ मूकः । वाक्श्रुतिशक्तिरहिते ।
एडु(डू)क न० ईड्-(ऊ)उक नि० गुणः । हिंसायाम् । अन्तर्न्यस्तास्थियुक्ते कुड्ये, भित्तौ च ।
एण पु० इ-ण तस्य नेत्त्वम् । कृष्णवर्णे मृगे । स्त्रियाम् एणी
एणतिलक पु० एणः तिलकमिव चिह्नं यस्य । मृगाङ्के चन्द्रे ।
एत त्रि० पु० इण् तन् । कर्बूरवर्णे । तद्वति त्रि० । स्त्रियामेनी च
एतद् त्रि० इण्-अदि तुक् च । पुरोवर्त्तिनि बुद्धिस्थे ।
एध वृद्धौ भ्वा० आत्म०अक० सेट् । एधते ऐधिष्ट । [काष्ठे
एध पु० इध्यतेऽग्निरनेन इन्ध-करणे घञ् नि० नलोप गुणौ ।
एधस् न० इध्यतेऽग्निरनेन इन्ध असि नि० नलोप गुणौ । काष्ठे
एधित त्रि० एध-क्त । वृद्धियुक्ते 'मधुसम्वृद्धिसमेधिते'ति माघः ।
एनस् न० इण-असुन् नुट् च । पापे, अपराधे च ।
एरका स्त्री० इण-रक । निर्यन्थितृणभेदे ।
एरण्ड पु० ईरयति वायुम् मलं वा ईर-अण्डच् नि० गुणश्च । वृक्षभेदे (एरडी) । (भेरण्डा)
एरण्डपत्रिका स्त्री० एरण्डस्य पत्रमिव पत्रमस्याः ब० संज्ञायां कन् अत इत्त्वम् । दन्तीवृक्षे ।
एला स्त्री० इल-अच् । एलालतायाम् (एलाची) ।
एलापर्णी स्त्री० एलायाः पर्णमिव पर्णमस्याः । रास्नायाम् (काटा आमरुल) ।
ए(ल)लावालुक न० एलेव वलते वल-उण् संज्ञायां कन् । वा ह्रस्वः । गन्धद्रव्यभेदे ।
एव अव्य० इण्-वन् । सादृश्ये, अनियोगे, अवधारणे, चारनियोगे, विनिग्रहे, परिभवे ईषदर्थे च । विशेष्यसङ्गतः अन्ययोगव्यवच्छेदे । यथा पार्थ एव धनुर्द्धरः इत्यादौ पार्थान्यपदार्थे प्रशस्तधनुर्द्धरत्वम् व्यवच्छिद्यते । विशेषणसङ्गतः अयोगव्यवच्छेदे, यथा शङ्खः पाण्डर एवेत्यादौ शङ्खे पाण्डरत्वायोगो व्यवच्छिद्यते । क्रियासङ्गतः अत्यन्तायोगव्यवच्छेदे यथा नीलं सरोजं भवत्येवेत्यादौ सरोजे नीलत्वात्यन्तायोगो व्यवच्छिद्यते । तद्वति त्रि० ।
एवम् अव्य० इण्-वम् । सादृश्ये, इत्थंप्रकारे, 'एववादिनि देवर्षाविति' कुमारः अवधारणे, स्वीकारे, प्रश्ने च ।
एष गतौ भ्वा० आत्म० सक० सेट् । एषते ऐषिष्ट ।
एषण पु० एष-ल्यु । लौहमये वाणे । युच् । इच्छायां पुत्रलोकधनकामनायं स्त्री० । ल्युट् । स्वर्णकारादीनां तुलासाधने न० । विस्फोटभेदके अस्त्रभेदे स्त्री० ङीप् । स्वार्थे कन् । एषणिकाप्यत्र ।

ऐ

ऐकागारिक त्रि०एकमसहायमगारं प्रयोजनमस्य ठक् । चौरे
ऐकाग्र त्रि०एकाग्र+स्वार्थेऽण् । एकाग्रचित्ते अनन्यासक्तचित्ते

ओतु त्रि॰ अव-तुन् ऊठ् गुणः । विड़ाले ।

ओदन पु॰ उन्द-युच् नलोपो गुणश्च । भक्ते सिद्धान्ने ।

ओदनपाकी स्त्री॰ ओदनस्य पाक इव पाको यस्याः ङीष् । नीलझिण्टिकायाम् ओषधिभेदे च ।

ओदनी स्त्री॰ ओदन इवाचरति ओदन+क्विप्-ततः अच् गौरा॰ ङीष् । (बेलेडा) बलायाम् ।

ओम् अव्य॰ अव-मन् तस्यातोल्लोपः गुणः । प्रणवे, आरम्भे, स्वीकारे, ओमित्युक्तवतोऽथेति माघः । अनुमतौ, अपाकृतौ, अस्वीकारे, मङ्गले, शुभे, ज्ञेये, ब्रह्मणि च ।

ओल पु॰ आ-उनत्ति आ+उन्द-क नलोपे पृषो॰ दस्य लत्वम् । सूरणे (ओल) इति ख्याते कन्दे । आर्द्रे त्रि॰

ओलज क्षेपे इदित् भ्वा॰पर॰सक॰सेट् । ओलञ्जति औलञ्जीत्

ओलड क्षेपे वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰सक॰ सेट् । ओलडयति ते ओलडति औलिलडत् त औलडीत् ।

ओष पु॰ उष-घञ् । दाहे ।

ओषण पु॰ उष-ल्यु । कटुरसे (झाल) इति ख्याते रसभेदे ।

ओषधि स्त्री॰ ओषोदाहो धीयतेऽत्र । ओष+धा-कि जातिविषयत्वात् स्त्रीत्वे वा ङीप् ओषधी च । फलपाकान्ते व्रीहियवादौ । [हिमालयपुरे ।

ओषधिप्रस्थ पु॰ न॰ । ओषधिप्रधानः प्रस्थः शाक॰ ।

ओषधिपति पु॰ ६त॰ । चन्द्रे । ओषधीशोऽप्यत्र । [कर्पूरे ।

ओष्ठ पु॰ उष्यते उष्णाहारेण उष-कर्म्मणि थन् । (ओठ) दशन-

ओष्ठपुष्प पु॰ ओष्ठोपमानं पुष्पं यस्य । बन्धूकवृक्षे ।

ओष्ठी स्त्री॰ ओष्ठ इवाचरति ओष्ठ+क्विप् ततः अच् गौरा॰ ङीष् । विम्बफलनामके (तेलाकुचा) वृक्षे ।

ओष्ठोपमफला स्त्री॰ ओष्ठ उपमीयतेऽनेन ओष्ठोपमं फलं यस्याः । विम्बिकालतायाम् ।

औ

औक्ष न॰ उक्ष्णां वृषाणां समूहः अण् टिलोपः वृषसमूहे । वुञ् । औक्षकमप्यत्र ।

औख्य त्रि॰ उखायां पक्वम् ष्यञ् । स्थालीपक्वे मांसादौ ।

औचिती स्त्री॰ उचितस्य भावः ष्यञ् स्त्रीत्वपक्षे षित्वात् ङीष् यलोपः । न्याय्यत्वे सत्यत्वे च ।

औचित्य न॰ उचितस्य भावः ष्यञ् । उचितस्य भावे न्याय्यत्वे

औडुम्बर पु॰ चतुर्दशसु यमेषु मध्ये यमभेदे, कुष्ठरोगभेदे च ।

औत्कण्ठ्य पु॰ उत्कण्ठाया भावः ब्राह्म॰ ष्यञ् । उत्कण्ठायाम्

औत्तानपादि पु॰ उत्तानपादस्य नृपभेदस्यापत्यम् इञ्

ऐहिकभोगसाधनकर्म्मान्ते ज्योतिर्म्मण्डले निश्चलतया तारकारूपेण स्थिते ध्रुवनामके नृपतौ ।

औत्सर्गिक त्रि॰ उत्सर्गं सामान्यविधिमर्हति ठञ् । सामान्य विधियोग्ये । [कथेन कृतत्वरेति रत्नावली' ।

औत्सुक्य न॰ उत्सुकस्य भावः ष्यञ् । उत्कण्ठायाम् 'औत्सु-

औदनिक त्रि॰ ओदनः शिल्पमस्य ठञ् । सूपकारे ।

औदरिक त्रि॰ उदरे प्रसितः ठक् । आद्यूने, (पेटुक) उदर-मात्रपूरणापेक्षके ।

औदश्वित न॰ उदश्विति अर्द्धजलमथिते तक्रे संस्कृतम् अण् । उदश्वित्संस्कृते द्रव्ये । तत्रार्थे ठकि औदश्वित्कमप्यत्र ।

औदार्य्य न॰ उदारस्य भावः गुणवचनत्वात् ष्यञ् । उदारतायाम्

औदासीन्य न॰ उदासीनस्य भावः ष्यञ् । शुभाशुभयोरुपेक्षायाम् ताटस्थ्ये ।

औदास्य न॰ उदास्ते उद्+आस-अच् भावार्थे ष्यञ् । वैराग्ये अनुरागशून्यतायाम् मनोयोगविरहे ।

औद्दालक न॰ 'प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः । कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु इत्युक्ते मधुनि

औद्भिद न॰ 'उद्भिदं पांशुलवणं यज्जातं भूमितः स्वयमि'त्युक्ते पांशुलवणे, 'विदार्य्य भूमिं निम्नां यत् महत्या धारया स्रवेत् । तत्तोयमौद्भिदं नामे'त्युक्तलक्षणे जले च । उद्भिद्य जायते जन-ड उद्भिज्जं ततः स्वार्थेऽण् औद्भिज्जमप्यत्र ।

औद्वाहिक न॰ उद्वाहकाले लब्धं ठञ् । विवाहकाले लब्ध-धनादौ । 'मैत्रमौद्वाहिकञ्चैवे'ति स्मृतिः ।

औपचारिक पु॰ उपचार एव विनयादित्वात् स्वार्थे ठक् । उपचारार्थे ।

औपनिषद पु॰ उपनिषत्स्वेव वेद्यः अण् । वेदान्तमात्रवेद्ये परमात्मनि 'तं त्वौपनिषदं पुरुषमि'ति श्रुतिः ।

औपनीविक त्रि॰ नीविसमीपे व्याप्ततं ठक् । नीविसमीपे व्याप्ते । "औपनीविकमरुन्ध किल स्त्री"ति माघः ।

औपम्य न॰ उपमैव चतुर्वर्णा॰ स्वार्थे ष्यञ् । सादृश्ये ।

औपयिक त्रि॰ उप+अय-घञ् उपायस्तेन लब्धः ठक् ह्रस्वश्च । उपायलब्धे, युक्ते न्यायागतवस्तुनि च ।

औपसर्गिक पु॰ उपसर्गेण निष्पादितः ठञ् । वातादिसन्निपातजाते रोगभेदे ।

औरभ्र न॰ उरभ्रस्य मेषस्येदम् अण् । मेषादिलोमजाते कम्बले

औरभ्रक न॰ उरभ्राणां समूहः वुञ् । मेषसमूहे ।

औरस पु॰ उरसा निर्म्मितः अण् । "सवर्णायां संस्कृतायां स्वय-मुत्पादयेत्तु यम् । औरसं तं विजानीयादि"त्युक्तलक्षणे पुत्रे ।

और्द्ध्वदेहिक त्रि॰ ऊर्द्ध्वो देहः प्रेतदेहः तत्र भवं तस्मै देयं वा श्राद्धादि ठक्। मृतदिनमारभ्य सपिण्डीकरणान्तं क्रियमाणे जलदानश्राद्धादिलक्षणे कर्म्मकलापे। अनुशतादित्वात् द्विपदवृद्धौ और्द्ध्वदैहिकमप्यत्र।

और्व पु॰ उर्वस्यापत्यम् अण्। वाडवानले तस्यौर्वमुनिजातत्वात् तत्स्थानस्य भूगोलस्य दक्षिणसीमायाम्। उर्व्यां भवः। पांशुलवणे।

औलूक न॰ उलूकानां समूहः अण्। पेचकसमूहे।

औलूक्य पु॰ वैशेषिकदर्शनकारके कणादमुनौ तच्छास्त्रवेत्तरि च।

औशनस न॰ उशनसा शुक्रेण प्रोक्तम् अण्। शुक्रप्रोक्ते उपपुराणादौ दण्डप्रणयनक्रमे शास्त्रे च।

औशीर न॰ वश-ईरन् किच्च ततः प्रज्ञाद्यण्। समुदितयोः शय्यापीठयोः।

औषध न॰ ओषधौ भवः अण्। रोगनाशके ओषधिभवे द्रव्ये, रोगहारके द्रव्यमात्रे च।

औड्र न॰ उड्रस्येदम् अण्। उड्रदुग्धादौ।

औड्रक न॰ उड्राणां समूहः वुञ्। उड्रसमूहे। [र्णादौ

औष्ठ्य त्रि॰ ओष्ठे भवः यत्। ओष्ठस्थानोच्चार्य्यमाणे उवर्णपव-

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते शब्दस्तोममहानिधौ
स्वरवर्णादिकाः शब्दाः समाप्ताः।

ओंतत्सत्।

Bayerische Staatsbibliothek MÜNCHEN

10219731

10219731

10219731

Buchbinderei-Landesanst.
f. Körperbehind. Jugendl.
München, Kurzstr. 2

10219731